
श्रीवैष्णववैभवमहाकाव्यस्य श्रीविष्णुस्वामिसम्प्रदायदृष्ट्या पर्यालोचनम्



आद्याचार्य जगद्गुरु श्री विष्णुस्वामी जी महाराज



श्री रणछोड़दास जी महाराज
पूज्यपाद आदि श्री सतुआ बाबा

डॉ. मङ्गलदत्तद्विवेदी

श्रीवैष्णववैभवमहाकाव्यस्य श्रीविष्णुस्वामीसम्प्रदायदृष्ट्या पर्यालोचनम्

❃

लेखक
डॉ. मङ्गलदत्त द्विवेदी
शिक्षक
श्री न.ला.बा.सं.म.वि.
अस्सी, वाराणसी

❃

प्रकाशक
श्री सतुआ बाबा आश्रम
(सिद्धपीठ)
मणिकर्णिकाघाट, वाराणसी

संरक्षक :
अनन्त श्रीविभूषित जगद्गुरु विष्णुस्वामीसम्प्रदायाचार्य
श्री यमुनाचार्य जी महाराज श्री सतुआ बाबा जी
षष्ठपीठाधीश्वर, श्री सतुआ बाबा आश्रम, काशी।

❖

प्रकाशक :
सतुआ बाबा आश्रम
सी.के. १०/४८, मणिकर्णिकाघाट,
वाराणसी, उत्तर प्रदेश।

❖

प्रकाशन तिथि :
- आषाढ़ शुक्ल गुरुपूर्णिमा, वि.सं. २०६५
  तदनुसार १८ जुलाई, २००८
- द्वितीय संस्करण : २५ जनवरी २००९

❖

❖


श्री सतुआ बाबा आश्रम द्वारा पुस्तकाकार सहयोग :
डॉ. रविप्रकाश पाण्डेय एवं डॉ. अरविन्द कुमार शर्मा

❖

मूल्य : रूपये १५०.०० मात्र ($ = 5)

❖

मुद्रक :
श्रीजी प्रिण्टर्स
नाटी इमली, वाराणसी
फोन : (०५४२) २२०११०४



श्री रणछोड़दास जी महाराज
पूज्यपाद आदि श्री सतुआ बाबा

जन्म सन् : 1774 गोलोकवास सन् :1818



आद्याचार्य जगद्गुरु श्री विष्णुस्वामी जी महाराज

प्रवृत्तौ बीजम्

यस्मिन्काले मया महापुरुषाणां व्याख्याने एतच्छ्रुतमासीद् यद्—

दुर्लभं त्रयमेतद्वै देवानुग्रहहेतुकम्।

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः।।३।।

(विवेकचूडामणिः)

तत्कालत एतादृशी जिज्ञासासीत् यदेतादृशं शोधकार्यमुचितं यस्मिन् मनुष्यताया मुमुक्षाया महापुरुषाश्रयताया विमर्शः स्यादत एव **वैष्णववैभवमहाकाव्यस्य श्रीमद्विष्णुस्वामिसम्प्रदायदृष्ट्या पर्यालोचनं** शोधविषयो गृहीतः।

●

स्वकीयवक्तव्यम्

।। नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ।।

प्रस्तुत ग्रन्थः मम शोधप्रबन्धस्य श्रीवैष्णववैभवमहाकाव्यस्य श्रीमद्विष्णुस्वामिसम्प्रदायदृष्ट्या पर्यालोचनस्य संशोधितरूपः परमात्मा अनन्तकालतः जननमरणादिनानादुःखैर्दुःखितानां जीवानां दुःखनिरसनाय वैदिकपरम्परायाः रक्षणाय च कलावतार रूपान्महापुरुषानवतारयति, एते महापुरुषाः स्वकीयकार्यं कृत्वा पुनः भगवन्तं सेवन्ते अथवा सारुप्यमेव धारयन्ति। एते कलावताराः समयानुसारेण शतवर्षानन्तरं सहस्रवर्षानन्तरं वा भवन्ति।

अधिकग्लानौ तु स्वयमेव परमात्मा आविर्भवति—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

एतेषु कलावतारेषुमध्येश्रीविष्णुस्वामी विद्यते, यद्यपि सन्तस्यानन्तं चरितम् उडुपेन सागरस्य तितीर्षुरयज्ञनः श्रीवैष्णववैभवमहाकाव्य-माधारीकृत्य श्रीमद्विष्णुस्वामिसम्प्रदायदृष्ट्या पर्यालोचनरूपपुष्पमाचार्य-चरणाभ्यां समपर्यति।

श्री वैष्णवविरक्तपरम्परा में परस्पर अनन्य निष्ठा से जुड़े हुए चार भाई माने गये हैं।

रामानन्द जगद्गुरु निम्बादित्यमहान्।
विष्णुस्वामिगुणखानिपुनि माधवपरमसुजान।।

भूमिका

नत्वा चिन्तामणिं देवं ध्यात्वा दुर्गां परात्पराम्।
शोधकार्ये प्रवेशाय भूमिका लिख्यते मया।।

भूमिरिव भूमिका यथा अपूर्वे भवनादिनिर्माणे भूमेरावश्यकता तथैव निबन्धेऽपि विषयस्य दिग्दर्शनस्यावश्यता विद्यते।

अस्मिन् निबन्धे पञ्च परिच्छेदाः, तेषु मध्ये प्रथमपरिच्छेदस्य—

(क) काव्यस्वरूपविमर्शे कविभेदाः यथा—शास्त्रकविः-काव्यकव्युभयकवि भेदेन त्रिधेति। विवेचनं कृतम्

काव्य निर्माणे हेतूनां विवेचनम् काव्यलक्षणविवेचनं काव्यात्मा विमर्शश्चकृतः।

(ख) प्रथम परिच्छेदस्य काव्यभेदे उत्तमोत्तमोत्तममध्यमाधमभेदेन चतुर्धा काव्यभेदाः प्रदर्शिताः।

(ग) खण्डेपद्यकाव्यभेदौ सामान्यतो द्विविधौ जातिवृतभेदेन जातिर्नियतमात्रिका वृत्तं नियतगुरुलघुविन्यास इत्यादिरूपेण विमर्शनं वृतानां भेदनिरूपणञ्च विहितम्।

(घ) महाकाव्यस्वरूपे

महतां चरितैर्युक्तं ग्राम्यशब्दैर्रहितमर्थ—

सौष्ठवेन युक्तमलङ्कारान्वितं सत्पुरुषाश्रितं सर्गबन्धेन युतं महाकाव्यमित्यादिरूपेण विवेचनंकृतम्।

(ङ) वैष्णववैभवस्य महाकाव्यत्वे भेदे शान्तभक्तिरसेन परिपूर्णं श्लेषादिनानालङ्कारैर्युतं वसन्ततिलकादि नानाछन्दोभिर्विशिष्टं नव-सर्गात्मकं वैष्णववैभवकाव्यंमहाकाव्यकोटौ विराजते।

श्रीमद्वैष्णववैभवमहाकाव्येप्रतिपादिताविषया निम्नलिखिताः सन्ति।

प्रथमे सर्गे

मङ्गलाचरणम्, नादपरम्परा, विन्दुपरम्परा सम्प्रदायस्य वरीयस्त्वम्, भक्तिस्वरूपम्, वैष्णवभक्तिः, गोलोकस्वरूपम्, तत्र शिवेन गोकुलेश्वरतः सगुणभक्ति-प्रचारात्मकसम्प्रदायप्रवर्तनारूपवरप्राप्तिः, ततः भगवतः शिवस्य आनन्दोल्लासः, भगवतः शिवतो नारदेन तन्मन्त्रप्राप्तिः, ततः सम्प्रदायप्रवर्तनम्, ततो विष्णुस्वामिसम्प्रदाय-प्रारम्भः, सर्गसमाप्तिः।

द्वितीये सर्गे

कैलासे शिवगणानामानन्दोद्रेकः, नारदकर्तृकः सम्प्रदायविस्तार-विचारः, द्वापरसन्ध्यंशकाले शान्तनुशासने व्यासावतारः, वासवीप्रसङ्गः, व्यासोत्पत्तिः, नारदाद् वेदव्यासेन मन्त्रलाभः, ततः शुकेन तल्लाभः, शुकाच्च विष्णुस्वामिना तल्लाभः, कलिकालवर्णनम्, कलिशान्त्यै शुद्धभक्तिसनाथसगुणोपासनात्मक उपायः, सर्गसमाप्तिः।

तृतीये सर्गे

सम्राड्युधिष्ठिरराज्यवर्णनम्, तदा द्रविडदेशे कस्यचिद्राज्ञो नारायणभट्टो नाम मन्त्री, तत्पुत्रो माधवभट्टः, स एव विष्णुस्वामी, माधवभट्टपितुर्देहावसानम्, माता सती जाता, माधवस्य विद्याप्राप्त्यै वाराणसीप्रस्थानम्, मार्गे सदाशिवाच्छास्त्रलाभः, गुरुदक्षिणायै गुरुणा व्यासमुखाद् ब्रह्मसूत्रार्थशुश्रूषाकथनम्, माधवकृतोद्योगेन तत्पूर्तिः, व्यासवर्णनम्, व्यासगणेशयोः समयप्रसङ्गे व्यासकूटप्रसङ्गः, व्यासकर्तृका ब्रह्मसूत्रव्याख्या, पृथिव्यां परावर्तनम्, हरिहरभट्ट-रङ्गनाथयोर्माधवभट्टशिष्यत्वप्राप्तिः सर्गसमाप्तिः—

चतुर्थे सर्गे

प्रकारान्तरेण विष्णुस्वामिचरित्रवर्णनम्, विष्णुस्वामिना गृह एव शास्त्राध्ययनम्, उपास्यविवेकः, सर्वेश्वरोपासना, पूजायां सत्यामपि

भगवतोऽदर्शनेन अन्नत्यागः, ततो बह्निप्रवेशप्रतिज्ञा, भगवतो दर्शनम्, ततो भगवतोऽन्तर्धानम्, गोलोकेन्द्ररूपेण पुनर्दर्शनम्, विष्णुस्वामिनः प्रश्नः, भगवत उत्तरम्, तत्कर्तृकभक्तितत्त्वोपदेशः, सर्गसमाप्तिः—

पञ्चमे सर्गे

विष्णुस्वामिना भगवत्प्रार्थना, भगवता पञ्चाक्षरोपदेशः, विष्णुस्वामिकर्तृका भगवत्सेवा, शिष्यसङ्ग्रहः, तेषु आदिमो गोपीनाथः, ततश्च हरिहरः, रङ्गनाथः, गोविन्ददासः, देवजीवः, कृष्णदत्तः, जयदेवः, दयारामः, वोपदेवः, हरिदासः, बिल्वमङ्गलः, वल्लभाचार्यः, वैष्णवसम्प्रदायचतुष्टयी ब्रह्मरुद्रलक्ष्मीसनकप्रवर्तिता, तत्र माध्वानां ब्रह्मा, निम्बार्काणां सनकः, रामानुजानां लक्ष्मी, विष्णुस्वामिनाञ्च रुद्रः, सम्प्रदायप्रवर्तकः, विष्णुस्वामिसम्प्रदायस्य प्राचीनत्वे भागवतस्य सर्वदर्शनसङ्ग्रहस्य च प्रामाण्यम्, विस्तरेण विष्णुस्वामिनो जन्मादिविवरणम्, दक्षिणापन्थे मन्दुरापुर्यां पाण्ड्यविजयस्य मन्त्री देवस्वामी, तत्पत्नी यशोमती, अनयोः पुत्रो विष्णुस्वामी, काञ्च्यामेतस्य प्रथमो मठः, तत्र विष्णुस्वामितः पश्चात् क्रमशः देवदर्शनः, श्रीकण्ठः, शतधृतिः, कुमारपादः सहस्रार्चिः, पराभूतिः, ज्ञानेश्वरः, नामदेवः, वल्लभाचार्यः, हरिदासः, वंशीअली, रुद्रदेवः, त्रिपुरारिः, विष्णुस्वामी, राजविष्णुः, बिल्वमंगलः, देवमङ्गलः, प्रभुविष्णुस्वामी, श्रीकान्तः, तत उत्तरभारते विस्तारः, सर्गसमाप्तिः।

षष्ठे सर्गे

सतुआबाबापरम्परायां श्रीकृष्णः, रुद्रः, त्रिपुरारिः, विष्णुस्वामी, देवदर्शन-देवमुनि-परमानन्द-आनन्दमुनि-प्रकाशमुनि-कृष्णमुनि-नारायण-जयमुनि-श्रीमुनि-महाचार्य-नित्याचार्य-तत्त्वाचार्य-नृसिंहाचार्य-शुद्धाचार्य-सुबुद्धाचार्य-प्रबुद्धाचार्य-असूयाचार्य-रुद्राचार्य-भगवन्तार्य-रामेश्वर-ब्रह्मयति-चर्याचार्य-सुदयाचार्य-लक्ष्मीनारायण-राजविष्णुस्वामि-बिल्वमंगल-वल्लभाचार्यविठ्ठल-नाथ-यदुनाथ-मधुसूदन-मुरलीधर-ब्रह्मराज-पद्मराज-प्रद्युम्नमुनि-हृषीकेश-वासुदेव-परमानन्द-कल्याणदास-प्रेमजी-सौवलदास-रत्नदास-कृष्णदास-एकदास-राघवदास-धनप्रियदास-

दयाराम-रामदास-बलरामदास-परशुरामदास-रणछोड़दास-मोहनदास-भोलादास-दामोदरदास-नरोत्तमदासाः, वर्तमानो महामण्डलेश्वरो यमुनाचार्यः, सर्गसमाप्तिः।

सप्तमे सर्गे

रणछोड़दासस्य चरित्रम्: पूर्ववृत्तम्, जेठापटेलप्रसङ्गः, राज्यत्यागः, प्रयागगमनम् परशुरामदर्शनम्, ततो दीक्षा, रणछोड़दासनामप्राप्तिः, काश्यामागमः, मणिकर्णिकावर्णनम् रणछोड़दासस्य काश्यां प्रतिष्ठा, परशुरामस्य त्रिहुटगमनम्, रणछोड़दासतपोवर्णनम्, मुद्रावितरणम्, चणकवितरणम्, बृद्धस्य भिक्षोः चणकचर्वणासामर्थ्यात् तस्मै सक्तुप्रदानम्, सर्गसमाप्तिः।

अष्टमे सर्गे

सक्तुप्रदानव्रतम्, भगवतो दर्शनम्, तेनैव सतुआबाबानामकरणम्, चन्द्रग्रहणे राजागमनम्, परस्परं परिचयः, राज्ञा क्षमाप्रार्थना, एतत्कर्तृकं क्षमादानम्, आश्रमादिव्यवस्था, पुरुषोत्तमदासस्य मृतस्य पुनरुज्जीवनम्, सर्गसमाप्तिः।

नवमे सर्गे

पुरुषोत्तमाय वरप्रदानम् पालिताणाराज्याद् भक्तानामागमः, महता समारोहेण मठस्थापनम्, तत्सञ्चालनाय निधिव्यवस्था, रघुरायवृत्तम्, गङ्गातः कनकाहरणम्, रघुरायेण पश्चात् तत्परावर्तनम्, धर्मशालादिव्यवस्था, परमगतिप्राप्तिः, वर्तमानमठाधिपतिकर्तृक-व्यवस्थावर्णनम्, विश्वस्मिन् धर्मप्रचारः सर्गसमाप्तिः।

द्वितीयपरिच्छेदस्य क खण्डे विष्णुस्वामिपरिचये सम्प्रदायशब्दस्य व्युत्पत्तिः। सम्प्रदायपरम्परा वैष्णवसम्प्रदायेषु चत्वारः सम्प्रदायाः मुख्याः ते च रूद्रसम्प्रदायः ब्रह्मसम्प्रदायः वैष्णवसम्प्रदायः सनकसम्प्रदायश्च।

एषु मध्ये रूद्रसम्प्रदायस्य परिचयः, तदनुयायी श्री विष्णुस्वामिपरिचयश्च द्वितीय परिच्छेदस्य (ख) खण्डे श्री विष्णुस्वामि

सम्प्रदायस्य पौराणिकस्वरूपम् (ग) भेदे वैष्णव सम्प्रदायानां सिद्धान्तविमर्शः, तथाहि-श्री विष्णुस्वामिसम्प्रदायस्य 'शुद्धाद्वैत विमर्शः श्री निम्बार्काचार्यसम्प्रदायस्य 'द्वैताद्वैतसिद्धान्तविमर्शः श्रीरामानुज-सम्प्रदायस्य श्रीरामानन्दसम्प्रदायस्य च विशिष्टाद्वैत विमर्शः, श्रीमध्वाचार्यसम्प्रदायस्य द्वैतवादविमर्शः। तृतीय परिच्छेदस्य (क) खण्डे शुद्धाद्वैतस्वरूपपुष्टिमार्गयोर्विमर्शः। तृतीय परिच्छेदस्य (ख) भेदे प्रस्थानत्रय विमर्शःतत्र उपनिषद् विमर्शः, ब्रह्मसूत्र विमर्शः, गीताविमर्शश्चास्ति (घ) भेदे शुद्धाद्वैतं विशुद्धाद्वैतं वेति विचारः तत्र अन्यैः सिद्धान्तैः सह अस्मिन् सिद्धान्ते पार्थक्यप्रदर्शनम्। तृतीय परिच्छेदस्य (ङ) भेदे श्रीवल्लभाचार्यसम्प्रदायस्य विमर्शः। चतुर्थपरिच्छेदस्य (क) भेदे श्री विष्णुस्वामि सम्प्रदायपरम्परा।

(ख) भेदे श्रीविष्णुस्वामिसम्प्रदायस्य स्थानादिविमर्शः।

(ग) भेदे श्रीविष्णुस्वामिसम्प्रदायस्य मुख्यस्थानविमर्शः।

(घ) भेदे श्रीविष्णुस्वामी तत्स्थानपरम्परा।

(ङ) भेदे श्री विष्णुस्वामिसम्प्रदायस्य मुख्यपीठाचार्यपरम्परा। पञ्चमपरिच्छेदस्य

(क) भेदे वैष्णववैभवकाव्यकर्तुर्विस्तृतः परिचयः।

(ख) भेदे तु एतेषां वैष्णवाचार्यसिद्धान्तानां कोनिष्कर्ष इति विमर्शः पञ्चम परिच्छेदस्य, (ग) परिशिष्ट रूपभेदे श्रीरामानन्द स्वामिमहाराजानां परिचयः, रामावतसम्प्रदायस्य च परिचयोस्ति। अन्ते ग्रन्थसूच्यपि विद्यते, मध्येऽपि केषाञ्चन ग्रन्थानां निर्देशो विद्यते।

अनन्तश्रीविभूषितानां जगद्गुरुश्रीविष्णुस्वामिसम्प्रदायाचार्याणां-षष्ठपीठाधीश्वराणां श्रीयमुनाचार्यमहाराजनामाशीर्वचसास्य निबन्धस्य पूर्तिर्जाता अतोदयासिन्धूनां श्रीमहाराजानां चरणारविन्दान्मुहुर्मुहुः नमामि। अस्मन्निर्देशकगुरुवराणां डा. छोटेलालत्रिपाठिमहाभागानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यविभागे वरिष्ठोपाचार्याणां चरणान् मुहुर्मुहुः प्रणमामि, यत्कृपयास्य निबन्धस्य पूर्तिर्जाता।

पूज्यपूज्यानामस्मद् गुरुवराणां महामहोपाध्यायानां महावैयाकरणानां महाकवीनां श्री सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणविभागे उपाचार्याणां श्री मनुदेव मट्टाचार्याणां मुहुर्मुहुः प्रणमामि यत्कृपयास्य पूर्तिर्जाता। पूज्यानां विद्यावारिधीनामस्मत्पितृचरणानां श्रीद्वारकाप्रसाद-द्विवेदिमहाभागनामाशीर्वच-सैवास्य निबन्धस्य पूर्तिर्जातातश्चचरणान् प्रणमामि।

ममतामय्याः अस्मन्मातुः श्रीमत्याः श्रीशकुन्तलादेव्याः प्रेरणयैवास्य पूर्तिर्जातात श्चरणयोः प्रणमामि।

अस्मज्ज्येष्ठभ्रात्रोः डा. श्रीरूद्रदत्तद्विवेदिनः आचार्यश्री गणेशदत्त-द्विवेदिनश्च नमामि ययोः स्नेहेनास्य पूर्तिर्जाता। अस्मज्ज्येष्ठ-भ्रातृधर्मपत्न्योः श्रीभत्याः मुक्तिदेव्याः श्रीभत्याः पूजादेव्याश्चचरणानपि नमस्करोमि। अस्मद् धर्मपत्न्याः श्रीमत्याः प्रियदर्शिनीदेव्याः सेवयैवास्य निबन्धस्यपूर्तिर्जातान्यथापूर्तिर्नस्यात्, अतः साधन्यवादार्हा।

येषां ग्रन्थानां सहयोगेनास्य पूर्ति र्जातातेषां मनसा प्रणमामि। प्रकाशकमहोदयानां मुद्रकमहोदयानाञ्च कृते साधुवादः क्रियते। यदनुग्रहेण प्रकाशनं जातम्। अन्ते भगवन्तं श्री विश्वेश्वरं भगवतीं पराम्बां च प्रणम्य विरम्यते।

विदुषाञ्चञ्चरीकः
डॉ. मङ्गलदत्तद्विवेदी
शिक्षकः
श्री नन्दलाल बाजोरिया
संस्कृत महाविद्यालयस्य
अस्सी, वाराणसी

विषय-सूची

प्रथम-परिच्छेदः

(क) काव्यस्वरूप-विमर्शः

काव्यलक्षणविचारे आरोहक्रममाश्रित्य प्रसङ्गतः कविशब्दस्य व्युत्पत्तिः क्रियते। कौतीति विवरणं विधायादादिगणपठिताच्छब्दार्थक 'कु' धातोः अजन्ताद्धातोरिप्रत्यय इत्यर्थकेन 'अ[1]च इः' इति उणादि सूत्रेण 'इ' प्रत्यये आर्धधातुकसंज्ञायां गुणेऽवादेशे विभक्तिकार्ये कविः=काव्यनिर्माणकर्त्ता 'कविः पुंसिकाव्य[2]कृच्छुक्रसूरिषु' कविः काव्यसंसारस्य सृष्टिकर्ता तदुक्तम् अग्नि[3]पुराणे—

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथा वै रोचते विश्वं तथेदं परिवर्तते।।१०।।
शृङ्गारीचेत् कविः काव्ये जातं रसमयं जगत्।
स चेत् कविर्वीतरागो नीरसं व्यक्तमेवतत्।।११।।

धातवोऽनेकार्था इति वैयाकरणनिकाये प्रसिद्धिरस्ति यतोहि महर्षिणा पाणिनिनाधातुपाठे 'कुर्द[4] खुर्द गुर्द गुद' कीडायामेव पठितोऽतोत्र एवकारेणज्ञायते यद्धातूनामनेकार्थाः भवन्ति एवञ्च कुधातोः व्याप्त्यर्थाङ्गीकारे कविः शब्दस्य क्रान्तदर्शी सर्वदृक् इत्यपि अर्थो भवति अत एवात्मानमधिकृत्य श्रुतिः कथयति—

सपर्यगाच्छु[5]क्रमकायमव्रण-
मस्नाविरशुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतो-
ऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

भगवताद्यशङ्कराचार्येणेमं मन्त्रमधिकृत्यैतादृशं भाष्यं कृतम्-स पर्यगात्स यथोक्त आत्मा पर्यगात्परि समन्तादगाद्गतवान् आकाशवद्-

व्यापीत्यर्थः। शुक्रं शुभ्रं ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायमशरीरं लिङ्गशरीरवर्जित इत्यर्थः। अव्रणमक्षतम्। अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्ते इत्यस्नाविरम्। अव्रणमस्नाविरमित्येताभ्यां स्थूल-शरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्। शुक्रमित्यादीनि वचांसि पुंलिङ्गत्वेन विपरिणेयानि, स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुंलिङ्गत्वेनोपसंहारात्। कविः क्रान्तदर्शी सर्वदृक् नान्योऽतोऽस्ति द्रष्टा इत्यादिश्रुतेः। मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां पर्युपरि भवतीति परिभूः। स्वयंभूः स्वयमेव भवतीति येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः। स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञात्वाद्यथातथाभावो याथातथ्यं तस्मात् यथा-भूतकर्मफल साधनतोऽर्थान्कर्तव्यपदार्थान्व्यद्धाद्विहितवान्यथानुरूपं व्यभजदित्यर्थः। शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सरेभ्यः प्रजापतिभ्य इत्यर्थः।

नवनवोन्मेषशालिनी प्रज्ञा सम्पन्नः कविः भूतभविष्यद्वर्तमानकालानां हस्तामलकवत् साक्षात् करोति। अतएव लोकोक्तिरस्ति 'कवयः क्रान्तदर्शिनः' हिन्द्यामप्युक्तिरस्ति 'जहाँ[६] न पहुँचे रवि तहाँ पहुँचे कवि' वेदानां **प्रकाशकस्य ब्रह्मणोऽपि** आदिकविरिति शब्देन व्यवहारो दृश्यते तदुक्तं—तेने[७] ब्रह्म हृदा य आदिकवये ब्रह्मणेऽपि[८] ब्रह्म वेदः यः तेने प्रकाशितवान्'।

कवेरिदं कर्म काव्यम् षष्ठ्यन्तात्कविशब्दाद् "गुण[९]वचन ब्राह्मणादिभ्यः" कर्मणि च (५-१२४) इति सूत्रेण ष्यञ् प्रत्यये अनुबन्धलोपे तद्धितान्तत्वात्प्रातिपदिकसञ्ज्ञायां सुपोलुकि आदिवृद्धौ भसञ्ज्ञायां विभक्तिकार्ये काव्यमिति भवति। प्रतिभा[१०]व्युत्पत्तिमांश्च कविरित्युच्यते। प्रज्ञां नवनवोन्मेष[११] शालिनीं प्रतिभांविदुः। अत्र व्युत्पत्तिपदेन 'उचितानु[१२]चितविवेकोगृह्यते। कविश्च शास्त्रकविकाव्यक-व्युभयकविभेदेन त्रिधा। तेषु[१३] मध्येत्रिधाशास्त्रकविः यः शास्त्रंविधत्ते यश्च शास्त्रे काव्यं विधत्ते योऽपिकाव्ये शास्त्रार्थं विधत्ते। काव्यकविः पुनरष्टधा-तद्यथा-रचनाकविः शब्दकविः, अलङ्कारकविः, उक्तिकविः रसकविः मार्गकविः शास्त्रार्थकविरिति।

त्रिधा च शब्दकविः—नामाख्यातोभयभेदेन। द्विधालङ्कारकविः शब्दार्थभेदेन। एषां द्वित्रै र्गुणैः कनीयान्, पञ्चकैर्मध्यमः सर्वगुणयोगी महाकविः।

काव्यनिर्माणे त्रयो हेतवः सन्ति तदुक्तं काव्यप्रकाशकारेण—

शक्तिनिर्पुणता[१४] लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।

शक्तिःकवित्वबीजरूपः संस्कारविशेषः कवित्वशक्तिं विना काव्यं सारतां न प्राप्नोति, लोककाव्यशास्त्रद्यवेक्षणजन्या निपुणता व्युत्पत्तिविशेषः यः काव्यं करोति, जानाति च तदुपदेशेन काव्यकरण योजनादौ, पौनः पुन्येन प्रवृत्तिरभ्यासः इति त्रयः समुदिता हेतुरिति भावः। न चात्र हेतुरित्यत्रैकत्वस्य त्रयः समुदिताः इत्यत्रान्वयो न भवितुं शक्यते बहुत्वाभावादिति वाच्यम्। त्रयः [१५]समुदिता हेतुरित्यत्र हेतुपदं कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं तादृशसमुदायत्वान्वित-मेकत्वमेकवचनार्थः। इति स्वीकारेणादोषात्। इदमाकूतं त्रयः समुदिता हेतुरित्यत्र हेतुपदं समुदायत्वावच्छिन्नबोधकमर्थात्समुदायं बोधयति।

न चात्र णिचश्चेत्यात्मनेपदं युक्तमितिवाच्यम् 'बुधयुधन[१६]-शजनेङ्प्रुदुस्त्रुभ्योणे'रित्यनेन अपवादत्वेनात्मनेपदं प्रबाध्य परस्मैपदस्य विधानात्।

एवञ्च हेतुत्वविशिष्टा ग्रन्थकर्तृत्वरूपकार्योपत्तिप्रयोजकाः शक्तिनिपुणताभ्यासाः प्रयोजकतात्रितयसमुदाये प्रयोजकतावच्छेदकं समुदायत्वं तथा च 'हेतुपदम्' कार्योत्पत्तिप्रयोजकतावच्छेदकरूप-समुदायत्वाबच्दिन्नबोधकम्। अतो हेतुत्वं=समुदायत्वम्। कार्योत्पत्ति-प्रयोजकतावच्छेदकरूपसमुदायत्वे (हेतुत्वे) एकत्वस्यान्वयो भवति।

एतादृशसमुदायत्वान्वितमेकत्वमेकवचनार्थः। एतादृशसमुदाय-त्वाच्छिन्नबोधकहेतु-पदस्वीकारादेव शक्त्यादीनां त्रयाणां 'तृणारणिमणि' न्यायेन हेतुत्वशङ्का निरासः।

अर्थाद् यथा दाहं प्रति तृणस्यारणेश्च स्वातन्त्र्येण कारणत्वं नैकसहायेनापरस्य तथा काव्योत्पत्तौ शक्त्यादीनां कारणत्ववन्न।

प्रसङ्गात् स्वरूपपदं विमृश्यते-स्वं लक्ष्य[१७]पदार्थो रूप्यतेलक्ष्यते (इतर व्यावृत्ततयाज्ञायते) अनेनेतिव्युत्पत्या स्वरूपंलक्षणम्। प्राचीनतमं काव्यलक्षणमग्निपुराणे वेदव्यासेनोक्तम्—

सङ्क्षेपाद्[१८]वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुटदलङ्कारं गुणवद् दोषवर्जितम्।।

अर्थात् सङ्क्षेपेणेष्टार्थप्रकाशकपदावली युतम् अलङ्कृतं गुणवद्दोषवर्जितं वाक्यं काव्यम्। संक्षिप्तवाक्यं रमणीतायाः द्योतकम् अलङ्कृतवाक्यम् सौन्दर्यपक्षस्य पोषकम् गुणयुक्तकथनेन काव्यगुणानां स्थितेः सङ्केतः दोषवर्जितवाक्यं काव्योत्तमतां द्योतयति। कवीनामत्रारूचिर्यदत्र प्रभावकारित्वरूपं मुख्यस्वरूपं स्पष्टतया नहि प्रतीयते। अतएवेत्तल्लक्षणं कृतं काव्यालङ्कारकारेणाचार्यभामहेन 'शब्दार्थ[१९]सहितौकाव्यम्' अत्रारुचिबीजं यदिदं लक्षणमतिव्याप्तिग्रस्तं विद्यते यतोहि काव्यातिरिक्तेषु शास्त्रेष्वपि काव्यत्वं स्यात्। अति[२०] व्याप्तिर्नाम 'अलक्ष्येलक्षणस्य सत्त्वम्' यथा गोः शृङ्गित्वं लक्षणम्।

तथा चातिव्याप्त्यव्याप्तिरूपदोषान् दूरीकर्तुं काव्यप्रकाशकारैराचार्य-प्रवरैर्मम्मटभट्टैरुक्तम्—

तददोषौ शब[२१]दार्थौ सगुणावनलङ्कृती पुनः क्वापि। खण्डान्वयमधिकृत्य तात्पर्यं प्रस्तौमि शब्दार्थौ काव्यम् अत्र तच्छब्देन प्रकरणप्राप्तत्वात् काव्यस्यैव परामर्शः।

आचार्य भर्तृहरिणोक्तम्[२२]—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।

सामर्थ्यमोचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।

पुनः कथं भूतौ-अदोषौ-अर्थात्-काव्यत्वविनाशका ये च्युत-संस्कारादयः प्रबलदोषास्तद्रहितौ। पुनः कथं भूतौ-सगुणौ-माधुर्यौजः

प्रसादाख्या ये गुणास्तत्सहितौ। पुनः कथं भूतौ-अनलङ्कृती पुनः क्वापि 'अल्पार्थे[२३] नञ्'—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

तदल्पत्वम-अनुदरा कन्याइत्यत्र स्थूलत्वनिषेधेनोदरस्याल्पत्वं गम्यते। न + अलङ्कृतिः इति विग्रहे 'नञ् सुपासह समस्यते इत्यर्थकेन 'नञ्[२४]' २.२.६ इति सूत्रेणं समासे अलङ्कृतिरूपे उत्तरपदे सति 'न[२५]लोपो नञः ६.३.७३ इत्यनेन नकारस्य लोपे अ+अलङ्कृतिरित्यत्र' तस्मान्नुडचि[२६] ६.३.७१ इत्यनेन उत्तरपदस्यादौ नुडागमे विभक्तिकार्ये अनलङ्कृतिरिति भवति द्वित्वविवक्षायाम् 'अनलङ्कृती' इति।

प्रथमायाएकवचनेन सह विग्रहे सति उपर्युक्त रीत्या साधुत्वं भवति। परिनिष्ठितविभक्त्या समासे तु 'न+अलङ्कृती' अनलङ्कृती इति भवति। विग्रहे उभयपक्षदर्शनात्। अतएव प्रौढमनोरमायां महामहोपा-ध्यायैर्भट्टोजिदीक्षितैरूक्तम् 'प्रथमान्तेन परिनिष्ठतविभक्त्या वा विग्रह इति सिद्धान्तात्।

क्वापीत्यनेनैतदाह यत् सर्वत्र सालङ्कारौ क्वचित्तु स्फुटा-लङ्कारविरहेऽपि न काव्यत्वहानिः यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा
स्ते चोन्मीलित मालती सुरभयः प्रौढाः कदम्वानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापार लीला विधौ
रेवारोधसि वेतसी तरुतले चेतः समुत्कण्ठते।

अत्र स्फुटो न कश्चिदलङ्कारः रसस्य प्राधान्यान्नालङ्कारता।

अयं भावः-झटिति प्रतीयमानता च स्फुटता। यद्यपि 'हरो वरः इत्यत्र स्फुटतयानुप्रासता प्रतीयते तथापि नालङ्कारता यतो हि तत्र प्रकरणप्राप्तस्य शृङ्गाररसस्य प्रतिकूलवर्णविशिष्टता विद्यते।

न च विप्रलम्भशृङ्गाररसस्य स्फुटत्वाद् रसवदलङ्कारः स्फुट इति वाच्यम् रसस्यात्र प्राधान्येनालङ्कारत्वाभावात्।

काव्यप्रकाशकाराणां मम्मटाचार्याणाम् 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति लक्षणस्य खण्डनं कर्तुं लक्षणं रसगङ्गाधरकारैः पण्डितराजैर्विचार्यते।

'शब्दार्थयुगलं न काव्यशब्दवाच्यम् मानाभावात्। काव्यमुच्चैः पठ्यते काव्यादर्थोऽवगम्यते काव्यं श्रुतम् अर्थो न ज्ञातः इत्यादि विश्वजनीनव्यवहारतः प्रत्युतशब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेश्च।

न च 'काव्यमुच्चैः पठ्यते' इति शब्दमात्रे व्यवहारो लक्षणया भविष्यतीति वाच्यम् शब्दार्थयुगले काव्यपदनिष्ठायाः शब्दार्थोभय-निरूपिताभिधायाः बोधकस्य कस्याचिदपि प्रमाणस्योपलब्धेरभावात्।

अतः पण्डितराजैर्लक्षणं कृतम् 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्।

अयं भावः-स्वज्ञानद्वारा विलक्षणचमत्कारजनकत्वेन वाच्यलक्ष्य-व्यङ्ग्यान्यतमस्य सुन्दरस्यार्थस्य बोधकः शब्दः काव्यम्।

एवञ्च रमणीयार्थप्रतिपादकत्वे सति शब्दत्वम् लक्षणम्। पदकृत्यम रमणीयस्यानुरागाद्यर्थस्य व्यञ्जके कटाक्षनिक्षेपाद्यर्थे अतिव्याप्तिं वारयितुं शब्दत्वमिति विशेष्यदलम्।

अचमत्कारार्थबोधके 'घटमानय' इत्यादि वाक्येऽतिप्रसङ्ग-वारणायार्थस्य रमणीयत्वं विशेषणम्।

रमणीयार्थनिरूपितस्य वाचकत्वस्य निवेशे तादृशार्थव्यञ्जके, व्यञ्जकत्वस्य निवेशे तादृशार्थव्यञ्जकत्वस्य निवेशे च तथा विधार्थवाचके शब्देऽव्याप्ति निराकर्तुं तदुभयसाधारणस्य प्रतिपाद-कत्वस्य प्रवेशः। रमणीय—शब्दप्रतिपादके व्याकरणेऽतिव्यातिं निराकर्तुञ्चार्थस्य प्रवेशः कृतः।

प्रतिपादकत्वसम्बन्धेन रमणीयार्थवान् शब्दः काव्यम्, अर्थवच्छब्दः काव्यशरीरमिति पण्डितराजानां भावः। एवमपि शब्दार्थशरीरं काव्यमिति मम्मटाचार्यवचसो नासङ्गतिः। शब्दार्थयोः शरीरे प्रवेशेऽपि शब्दस्यप्राधान्ये कस्यचिद्वचसो विरोधाभावात्। व्याकरणशास्त्रेऽपि 'स्वं[२७] रूपमितिं

शास्त्रबलादर्थवत्परिभाषया च शब्दार्थोभयोपस्थितौ न कस्यचित्परित्यागः परं शब्देऽर्थो विशेषणम्, अतएव 'अग्नेर्ढक्' इत्यादावर्थविशिष्ट एव अग्निशब्दो गृह्यते। तथैव अर्थवच्छब्दस्य काव्यशरीरत्वे अर्थस्यापि काव्यशरीरे प्रवेशो जात एव। लोमवल्लाङ्गूलवान् पशुशब्दार्थ इति व्यवहारे लाङ्गूलस्यापि भवत्येव शरीरान्तर्भावः' लाङ्गूले दूषिते दूषितः अलङ्कृते चालङ्कृतः पशुरिति भवत्येव वस्तुतो व्यवहारः। एवमर्थवच्छब्दस्य काव्यत्वेऽर्थस्य दूषितत्वादलङ्कृतकाव्यस्यापि दूषितत्वं तेनार्थगुणदोषालङ्काराणां निरूपणं काव्याङ्गनिरूपणमेव भवति। एवम् ऋगादिपदस्य अर्थविशिष्टः शब्दविशेषः शक्यः। अतएव आद्यन्तवदे[२८]कस्मिन् सूत्रे महाभाष्ये एकवर्णं पदम् एकपदा ऋक् एकर्चं सूक्तम्' इत्यादिर्मुख्यो व्यवहारो न सम्भवति। एकवर्णरूपमेव पदम् एको वर्णो यस्य पदस्येति बहुव्रीहौ अन्यपदार्थो नास्ति, एवम् एकपदाऋगित्यादावपि तथा च स्वस्मिन् स्वघटित्वमारोप्य व्यवहारार्थं तथा च स्वस्मिन् स्वघटितत्वमारोप्य व्यवहारार्थं व्यपदेशिवत्परिभाषा-फलत्वमाशङ्क्य उक्तम् अत्राप्यर्थेन उक्तो व्यपदेशः पदं नामार्थः ऋङ्नामार्थः, सूक्तं नामार्थ इति।

अर्थेन निमित्तसद्भावेन व्यपदेशो मुख्यव्यवहार इत्यर्थः। अत्र प्रदीपः—पदादीनां योऽर्थः सोऽन्यपदार्थ इत्यर्थः अभेदोपचाराच्चार्थ एव पदादिभिरभिधीयते इति व्याख्याति। तत्रत्यार्थशब्देन अर्थविशिष्टः शब्दोऽभिप्रेतः शब्दबोधकानां पदानामर्थविशिष्टे शब्दे शक्तिस्वीकारात् वृत्तिविषयत्वरूपार्थवत्वस्य अर्थवति शब्दे स्वीकारात् पूर्वोक्तरीत्या शब्दानां स्वरूपे शक्तेरङ्गीकारात्। तथा च अर्थविशिष्टः शब्दोऽन्यपदार्थः शब्दमात्रश्चावयव इति भावः। एवञ्च ऋक्सूक्तादिपदवत्काव्यपदस्यापि अर्थवति शब्दे एव शक्तिर्युक्ता।

अतएव वक्रोक्तिजीवितकाराः कथयन्ति—

शब्दार्थौ[२९] सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।

अयं भावः-काव्ये विशिष्टरूपेणावस्थितौ सहभावेन युक्तौ शब्दार्थौ काव्यं भवति। यदि स्वरूपशब्देन आत्मनोग्रहणं क्रियते यथा घटस्वरूपं द्रव्यम् तदुक्तं भीमाचार्येण[३०] न्यायकोशे स्वरूपम् स्वात्मकः पदार्थः यथा घटस्वरूपं द्रव्यम्। तथा चात्रापि काव्यात्मा विचार्यते।

आत्मानन्दस्वरूपः काव्यमानन्दात्मकमतः काव्यशास्त्रप्रवर्तक आचार्यः सूक्ष्मचिन्तनं विधाय एवानुभूत्या काव्यात्मनो विचारं कुर्वन्ति। आचार्यो भरतमुनिः-काव्यस्यात्मा रसः स्वीकरोति 'नहि रसादृते कश्चिदर्थः प्रवर्त्तते'। (१०२.१०६.३) यथा वृक्षस्य कारणं बीजन्तथैव रसः काव्यस्यमूलम्। रससम्प्रदायस्य प्रसिद्धा आचार्याः भरत-रुद्रट-रुद्रभट्ट-राजेश्वर-भट्टलोल्लट-शंकुक-भट्टनायक-भट्टतौत-अभिनवगुप्त-धनञ्जय-महिमभट्ट-भोज-मम्मट-रामचन्द्र-गुणचन्द्र-विश्वनाथ-शारदातनय-शिङ्गभूपाल-भानुदत्त-रूपगोस्वामि-पण्डितराज जगन्नाथप्रभृतयः सन्ति।

'अलङ्कारस्य काव्यात्मा' स्वीकारकर्तृषु प्रमुखा आचार्याः भामह-उद्भट्ट जयदेवा। चन्द्रालोककारेण जयदेवेनोक्तम्—

अङ्गीकरोति[३१] चः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती।।८।।

अयं भावः यः अलङ्कारशून्यौ शब्दार्थौ काव्यं स्वीकरोति असौ कृती = कुशलः पण्डितः तापहीनमग्निं कुतो न स्वीकरोति।

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।

प्रसङ्गतः रसालङ्काररीतिध्वनिवक्रोक्त्यौचित्यानामतिसङ्क्षेपेण विमर्शः प्रस्तूयते।

रसः

रस्यते = आस्वाद्यते इति रसः आस्वादनस्नेहार्थक 'रस' धातोः **कृतोवहुलम्** इति वार्तिकसहकारेण कर्मणि अच् प्रत्यये विभक्ति कार्ये 'रसः' इति भवति। विभावनुभावसञ्चारिभावव्यङ्ग्यो रत्यादिस्थायि-भावको रसो विद्यते। तदुक्तं साहित्य दर्पणे—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।।

मानसिकावस्थायाव्यञ्जकतत्त्वानि भाववाच्यानि भवन्ति, तानि च विभावानुभावसञ्चारिभाव (व्यभिचारिभाव) स्थायिभावभेदेन चतुर्धा।

विभावः

लोके यः यः पदार्थो रत्याद्युद्बोधकः सः सः काव्ये नाट्ये च विभाव पदवाच्यो भवति।

'रत्याद्युद्बोधकालोके विभावाः काव्यनाट्ययोः'।

विभावः—आलम्बनोद्दीपनभेदेन द्विधा।

अयं भावः—वासनारूपतयातिसूक्ष्मरूपेणावस्थितान् रत्यादीन् स्थायिनः विभावयन्ति आस्वादयोग्यतां नयन्तीति विभावाः। अनुभावः रत्यादीन् स्थायिनः अनुभावयन्ति, अनुभवविषयीकुर्वन्तीति अनुभावः। सञ्चारिभावाः - विशेषेणाभितः (सर्वाङ्गव्यापितया) रत्यादीन् स्थायिनः कायेचारयन्ति सञ्चारयन्तीति सञ्चारिभावाः। स्थायिभावाः—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेतिस्थायिभावाः प्रकीर्तिता।।

नवविधो रसः

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
वीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः।।

वत्सलाख्यं दशममपि रसं मुनीन्द्रादयोऽङ्गीचक्रुः। शृङ्गारस्यालम्वनादीनि निदर्शयति।

तत्र शृङ्गारस्य स्त्रीपुंसावालम्वने चन्द्रिका-वसन्त-विविधोपवन-रहःस्थानादय उद्दीपनविभावाः, तन्मुखोवलोकन-तद्गुणश्रवण-कीर्त्तनादयोऽन्ये सात्विकभावाश्चानुभावाः, स्मृतिचिन्तादयो व्यभिचारिणः।

करुणस्यालम्वनादीनि दर्शयति

करुणस्य[३२] बन्धुनाशादय आलम्बनानि, तत्सम्बन्धिगृहतुरगाभरणदर्शनादयस्तत्कथा-श्रवणदयश्चोद्दीपका:, गात्रक्षेपाश्रुपातादयोऽनुभावा:, ग्लानि-क्षयमोह-विषाद चिन्तौत्सुक्यदीनता-जडतादयोव्यभिचारिण:।

शान्तस्य विभावादीन् दर्शयति

शान्तरसस्यानित्यत्वेन ज्ञातं जगदालम्वनम्, वेदान्तश्रवणतपोवनतापसदर्शनाद्युद्दीपनम्, विषयारुचि-शत्रुमित्रौदासीन्यचेष्टा, हानिनासाग्रदृष्ट्यादयोऽनुभावा:, हर्षोन्मादस्मृतिमत्यादयो-व्यभिचारिण:।

रौद्रस्य विभावादीन् दर्शयति

रौद्रस्यागस्कृत्पुरुषादिरालम्वनम् तत्कृतोऽपराधादिरुद्दीपक:, वधवन्धादिफलको नेत्रास्फालनदन्तपीड़न-परुष भाषणशस्त्रग्रहणादिरनुभाव:, अमर्ष-वेगौग्र्य, चापलादय: सञ्चारिण:।

वीराद्भुतहास्यभयानकवीभत्सरससम्बन्धिविभावाद्यनभिधानोत्थन्यूत्तां परिहरति—

एवं यस्याश्चित्तवृत्तेर्यो विषय: स तस्यां आलम्वनम्, निमित्तानि चोर्द्दपकानीति बोध्यम्।

वात्सल्यरसस्यालम्वनादीनिदर्शयति

स्फुटं[३३] चमत्कारितया वत्सलं च रसं विदु:।
स्थायी वत्सलतास्नेह: पुत्राद्यालल्बनं मतम्।।
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादय:।
आलिंगनांगसंस्पर्श शिरश्चुम्बनमीक्षणम्।।
पुलकानन्दवाष्पाद्या अनुभावा: प्रकीर्तिता:।
संचारिणोऽनिष्टशङ्काहर्षगर्वादयो मत:।
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातर:।।

(सा. दर्पण ३.२२.३ पृ.सं.)

अलङ्कारः

अलङ्करणमलङ्कारः, अलमुपपदे 'कृ' धातोः भावे धञ् प्रत्यये' अलङ्कार इति भावेक्तिन् प्रत्यये कृते सति अलङ्कृतिरिति भवति।

भावव्युत्पत्तिमाश्रित्य वामानाचार्येणोक्तम्—'सौन्दर्यमलङ्कारः' अलङ्कारयुक्ते काव्ये ग्राह्यता तद्भिन्नैश्च चाग्राह्यता।

तदुक्तम्—'सदोषगुणालङ्कार हानादानाभ्याम्' (१.१.३) वृत्तिः-स खल्वलङ्कारो दोषहानाद् गुणालङ्कार दानाच्च सम्पाद्यः कवेः।

अयं भावः—गुणाश्च अलङ्काराश्च गुणालङ्काराः। हानञ्चादानञ्च हानादाने 'दोषगुणालङ्काराणां हानादाने 'इति विग्रहः ततश्च दोषाणां हानं, गुणालङ्काराणां चादानमिति यथासंख्यसम्बन्धः सम्पत्स्यते।

अलङ्क्रियतेऽनेनेति करणव्युत्पत्यालङ्कारशब्दः सौन्दर्यसाधकः।

आचार्यदण्डिनोक्तम्–'काव्यशोभा करान् धर्मान् अलङ्कारान् प्रचक्षते। ते चालङ्काराः शब्दालङ्कारार्थालङ्कारोभयालङ्कारभेदेन त्रिधा।

शब्दालङ्काराः षट्-तदुक्तं काव्यप्रकाशसङ्केते सोमेश्वरेण
वक्रोक्तिरप्यनुप्रासो यमकंश्लेषचित्रके।
पुनरूक्तवदाभासः शब्दालङ्कृतयस्तुषट्।।

अर्थालङ्काराः—काव्यप्रदीपादौ परिगणिताः तथाहि—

वक्रोक्तिरप्यनुप्रासे यमकं श्लेष चित्रके।
पुनरुक्तवदाभासः शब्दालङ्कृतयस्तुषट्।।
उपमानन्वयस्तद्वदुपमेयोपमा ततः ।
उत्प्रेक्षा च ससन्देहो रूपकापह्नुती तथा ।।
श्लेषस्तथा समासोक्तिः प्रोक्ता चाथ निदर्शना ।
अप्रस्तुतप्रशंसातिशयोक्ती परिकीर्तिते ।।

प्रतिवस्तूपमा तद्वद् दृष्टान्तो दीपकं तथा
तुल्ययोगितया चैव व्यतिरेकः प्रकीर्तितः।
प्रकीर्तितस्तथाक्षेपस्तथैव च विभावना
विशेषोक्तिर्यथासंख्यं तथैव परिकीर्तितम्।।
अथ चार्थान्तरन्यासविरोधाभाससंज्ञकौ।
स्वभावोक्तिस्तथा व्याजस्तुतिः प्रोक्ता सहोक्तियुक्।।
विनोक्ति परिवृत्ती च भाविकं काव्यलिङ्गयुक्।
पर्यायोक्तमुदात्तं च समुच्चय उदीरितः।।
पर्यायश्चानुमानं च प्रोक्तः परिकरस्तथा।
व्याजोक्तिपरिसंख्ये च माला कारणपूर्विका।।
अन्योन्यमुत्तरं सूक्ष्मसारौ तद्वदसंगतिः।
समाधिश्च समेन स्यात् विषमस्त्वधिकेन च।।
प्रत्यनीकं मीलतञ्चस्यातामेकावलीस्मृती।
भ्रान्तिमांश्च प्रतीपेन सामान्यं च विशेषयुक्।।
तद्गुणातद्गुणौ चैव व्याघातः परिकीर्तितः।
संसृष्टिसंकरौ चैवमेकषष्टिः क्रमोदिताः।।

तेषु उपमेयोपमानन्वयप्रतीपस्मरणरूपक ससन्देहभ्रान्तिमदपह्नुत्युत्प्रेक्षातिशयोक्तितुल्ययोगितादीपकप्रतिवस्तूपमादृंष्टान्तनिदर्शनाव्यतिरेकसहोक्तिसमासोक्त्याद्यनेकालङ्कारमूलभूतत्वात्सौकुमार्याद्यतिशयाच्च प्रधानमुपमां प्रथमं लक्षयति।

साधर्म्यमुपमा भेदेः–

भेदे (उपमानोपमेययोः) भेदे सति साधर्म्यम् उपमेत्यन्वयः। समानः, एकः, तुल्यो वा धर्मो गुणक्रियादिरूपो ययोः (अर्थादुपमानोपमेययोः) तौ सधर्माणौ तयोर्भावः साधर्म्यम् उपमानोपमेययोः समान धर्मेण सह सम्बन्ध इत्यर्थः। समासोत्तरवर्तिभाववाचि तद्धितप्रत्ययस्य

'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भाव प्रत्ययेन' इति भर्तृहरिप्रोक्तन्यायेन सम्बन्धाभिधायकत्वात् स एव सम्बन्धः (उपमानोपमेययोः समानधर्मेण सह सम्बन्धः) उपमा, उपमालङ्कार इत्युच्यते इति सूत्रार्थः।

उभयालङ्काराः—प्रशस्ति-कान्ति-औचित्य-सङ्क्षेपयावदर्थता—अभिव्यक्तिभेदेन षट् तदुक्तम् अग्निपुराणे महर्षिणा व्यासेन-अग्निरुवाच[३४]—

शब्दार्थयोरलङ्कारा द्वावलङ्कुरुते समम्।
एकत्र निहितो हारः स्तनं ग्रीवामिवस्त्रियाः।।
प्रशस्तिः कान्तिरौचित्यं संक्षेपौ यावदर्थता।
अभिव्यक्तिरिति व्यक्तं षट्भेदास्तस्य जाग्रति।।

कस्मिंश्चित् काव्ये शब्दार्थोभयशक्तिमूलकध्वनिरपि भवतीति विषयमुररीकृत्य पण्डितराजेन जगन्नाथेनोक्तम्—

यत्र तु काव्ये परिवृत्तिसहमानानामसहमानानां च शब्दानां नैकजातीयप्राचुर्यम्। साम्यमेव, तत्र शब्दार्थोभयशक्तिमूलकस्य व्यङ्ग्यस्य स्थितिरिति द्व्युत्थोध्वनिः।

न चायं शब्दमूलकतयैवार्थशक्तिमूलकतयैव वा व्यपदेष्टुं शक्यः विनिगमकाभवात्। नापि शब्द शक्तिमूलकार्थशक्तिमूलकयोः सङ्करेणगतार्थयितुं व्यङ्ग्यभेद एव सङ्करस्येष्टेः। इहतु व्यङ्ग्यस्यैक्येन तस्यानुत्थानात्।

रीतिः

रिणन्ति = गच्छन्त्यस्यां गुणा इति विग्रहं विधाय गतिरेषणार्थक क्र्यादिगणस्थाद्री धातोरधिकरणे क्तिन् प्रत्यये विभक्तिकार्ये च कृते रीतिरिति भवति, विशिष्टा पदरचना रीतिः वैशिष्ट्यञ्च गुणत्वेन गृह्यते। सा च वैदर्भी-गौड़ी, पाञ्चाली भेदेनत्रिधा। समग्रगुणावैदर्भी अर्थात् समग्रैरोजः प्रसादप्रमुखैर्गुणैरूपेता वैदर्भी। यथाः—

गाहन्तां[३५] महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धं क्रियतां वराहपतिभिर्मुस्ता क्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धममस्मद्धनुः।

अत्रौजः प्रसादादयो गुणाः प्रतिष्ठिताः सन्ति तथाहि- छायाबद्धकदम्बकम् शिथिलज्याबन्धम् इत्यत्र बन्धस्य गाढत्वादोजः। 'छाया वद्धकदम्बकम् इत्यत्र बन्धस्य गाढत्वशैथिल्ययोः संप्लवात् प्रसादः महिषा निपानसलिलम् इत्यत्र मसृणत्वाच्छलेषः 'गाहन्ताम्' 'इत्यारम्य येनैव मार्गेण प्रक्रमस्तेनैवमार्गेणोपसंहार इति मार्गभेदात् समता गाहन्ताम् इत्यत्रारोहः 'महिषाः' इत्यत्रावरोहः। एवमन्यत्राप्यारोहावरोहक्रमस्फुरणात् समाधिः। 'शृङ्गैर्मुहुस्ताडितम्' इति पृथक् पदत्वान्माधुर्यम्। 'शिथिलज्याबन्धमस्मद्धनुः' इत्यत्र बन्धस्य विकटत्वादुदारता। पदानामुज्ज्वलत्वात् कान्तिः अर्थाभिव्यक्तिहेतुत्वादर्थाभिव्यक्तिरिति।

'ओजः कान्तिमती गौडीया'।

ओजः कान्तिश्च विद्यते यस्यां सा ओजः कान्तिमयी। गौडीया नाम रीतिः। माधुर्य सौकुमार्ययोरभावात् समासबहुला अत्युल्बणपदा च—

उदाहरणम्[३६]—

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।
द्राक्पर्यस्तकपालसम्पुटमितब्रह्माण्डभाण्डोदर -
भ्राम्यत्पिण्डिम चण्डिमा कथमहो नाद्यपि विश्राम्यति।

माधुर्यसौकुमार्योपपन्ना पाञ्चाली।।१३।।

माधुर्येण सौकुमार्येण गुणेनोपपन्ना पाञ्चाली नामरीतिः, ओजः कान्त्यभावादनुल्वणपदाविच्छाया च।

यथा[१]—

ग्रामेऽस्मिन् पथिकाय नैव वसतिः पान्थाधुनादीयते
रात्रावत्र विहारमण्डपतलेपान्थः प्रसुप्तो युवा।
तेनोत्थाय खलेन गर्जति घने स्मृत्वाप्रियां तत्कृतं
येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति।।

ध्वनिः

ध्वनतीति ध्वनिः शब्दार्थकध्वन् धातोः—

'खनि-कषि-अजि-असि-वनि-सनि-ध्वनि ग्रन्थि चलिभ्यश्चेति सूत्रेण-औणादिक इ-प्रत्ययं‌ये। विभक्तिकार्ये ध्वनिः इत्यस्य साधुत्वं भवति ध्वन्यते इति ध्वनिरिति कर्म व्युत्पत्तौ कृतोबहुलमिति' बाहुलकादिप्रत्ययः।

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।

यत्रार्थो वाच्यविशेषः वाचकविशेषः शब्दोवा तमर्थं व्यङ्क्तः सकाव्य विशेषो ध्वनिः। अनेनवाच्यवाचक चारुत्वहेतुभ्य उपमादिभ्योऽनुप्रसादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्।

अर्थो वा शब्दो वा व्यापारो वा अर्थोऽपि वाच्यो वा ध्वनतीति, शब्दोप्येवम् व्यङ्ग्यो वाध्वन्यते इति व्यापारौ वा शब्दार्थयो र्ध्वननमिति कारिकया तु प्राधान्ये समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्।

काव्यस्य हि ललितोचित सन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयः श्लाध्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्च द्वौ भेदौ। तत्र वाच्यः प्रसिद्धोयः प्रकारैरूपमादिभिः बहुधा व्याकृतः सोन्यैः काव्यलक्ष्मविधायिभिः। ततो नेह प्रतन्यते।।३।।

केवलमनूद्यते पुनर्यथोपयोगम्। अयं भावः—अंशद्वय मध्ये वाच्यांशः प्रसिद्धः वनितावदनोद्यानेन्द्वदयादिरूपः सोऽन्यैः उपमादिभिः

प्रकारैः बहुधा व्याकृतः अतो विस्तरो न क्रियते केवलमनूद्यते यथोपयोगम्। व्यङ्ग्यार्थे विषये-आचार्योक्ति र्विद्यते—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।४।।

अयं भावः—वाच्याद् व्यतिरिक्तं सारभूतं तत्वान्तरमन्यदेव। ध्वनिः रसवस्त्वलङ्कारध्वनिभेदेन त्रिधा।

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र सध्वनेर्विषयोमतः।।

अङ्गित्वेन व्यङ्ग्यतायामपि अलङ्काराणां द्वयी गतिः। कदाचिद् वस्तुमात्रेण व्यज्यन्ते कदाचिदलङ्कारेण। एते ध्वनिवादिन आचार्याः वैयाकरणानामधमर्णाः यतोहि व्यङ्ग्यव्यञ्जक-भावकल्पनाया आधारः स्फोटवादः स्फुटति-अर्थोऽस्मादितिस्फोटः।

यः संयोगवियोगाभ्यां करणैरुपजायते।
स स्फोटशब्दजः शब्दोध्वनिरित्यभिधीयते।।

अतएव काव्यप्रकाशकारेणोक्तम्—

बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः।

पातञ्जले महाभाष्ये पस्पशाह्निके महाभाष्यकारेण—

अथ गौरित्यत्र कः शब्दः, इति शङ्कां विधाय। समाधानं कृतम्-येनोच्चारितेन सास्नालाङ्गूलककुद् खुर विषाणिनां संप्रत्ययो भवति सशब्दः।

अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा-शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवकः इति ध्वनिंकुर्वन्नेवमुच्यते तस्माद् ध्वनि शब्दः।

वक्रोक्तिः

वञ्चतीति विग्रहे वञ्चुधातोः 'स्फयि - तञ्चि - वञ्चि - शकि - क्षिपि - क्षुदि - सृपि - तृपि - वदि - उन्दि - श्विति - वृति - अजि - नी - पदि - मदि - खिदि - छिदि - भिदि - मन्दि - चन्दि - दहि - दम्भि - वसि - वाशि - हसि - सिधि - शुभिभ्यो रक्' इत्युणादि सूत्रेण रक् प्रत्ययेऽनुबन्धलोपे ञकारस्य नकारजत्वेन 'अनिदितां हल उपधायाः क्ङिति इति सूत्रेण नकारलोपे 'नेड्वशिकृति' इत्यनेनेडागम निषेधे 'न्यङ्क्वादीनां च' (७.३.५३) इत्यनेन कुत्वेटापि दीर्घे विभक्तिकार्ये 'वक्रा' इति भवति।

वचनमुक्तिः वच् धातोः भावे क्तिन प्रत्ययेऽनुबन्धलोपे सम्प्रसारणे पूर्वरूपे कुत्वे विभक्तिकार्ये उक्तिरिति भवति।

वक्रा चासौ उक्तिः वक्रोक्तिःप्रख्यात कथनभिन्ना। अर्थादन्याभिप्रायेणोक्तस्य वाक्यस्यान्यार्थकतया सङ्गमनम्। सा श्लेषकाकुवक्रोक्तिभेदेन द्विधा। तदुक्तं काव्यप्रकाशकारेण-यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते, श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा।

औचित्यम्—

उचितस्य भावः औचित्यम् प्रकृतिजन्यबोधे प्रकारीभूतोभावः 'उचितशब्दात्' गुणवचनब्राह्मणादिभ्यः कर्मणि च (५.१.१४) चाद्भावे प्रत्ययेऽनुबन्धलोपे आदिवृद्धौ विभक्तिकार्ये औचित्यमिति भवति।

यद्यपि सकलकाव्यात्मभूतस्यौचित्यस्य परिगणनमुचितं नास्ति तथापि सप्तविंशति स्थानेषु प्राधान्येन तदावश्यकम् तद्दर्शयति औचित्यविचारचर्चाकारः महाकविक्षेमेन्द्रः—

पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे रसे।
क्रियायां कारके लिङ्गे वचने च विशेषणे।।

उपसर्गे निपाते च काले देशे कुले व्रते।
तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे।।

प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि।
काव्यस्थाङ्गेषु च प्राहुरौचित्यं व्यापिजीवितम्।।

अयं भावः—

१. पदे सुप्तिङन्तरूपे शब्दे इत्यर्थः।

२. वाक्ये पदसमूहे।

३. प्रबन्धार्थे प्रबन्धस्य कुमारसम्भव-रघुवंशादेरर्थेऽभिधेये।

४. गुणे ओजः प्रसादादौ।

५. अलङ्करणे उपमोत्प्रेक्षाद्यलङ्कारे।

६. रसे शृङ्गारादि रसे।

७. क्रियायां पचति भवतीत्यादि पदबोध्ये।

८. कारके कर्तृ-कर्मरूपे।

९. लिङ्गे स्त्री-पुं-नपुंसकरूपे।

१०. वचने एकवचनद्विवचनादौ।

११. विशेषणे विशेष्यगतगुणाख्यापके।

१२. उपसर्गे क्रियायोगाश्रिते प्र-परादिरूपे।

१३. निपातेऽद्रव्यार्थके च वा हे व्यादिरूपे।

१४. काले समये।

१५. देशे स्थानविशेषे।

१६. कुले वंशपरम्परायाम्।

१७. व्रते नियमविशेषरूपे।

१८. तत्वे तत्वाख्यानि यथावद् वस्तुवर्णनम् इत्यर्थः।

१९. सत्वे सत्वस्यान्तर्बलस्य वर्णनायाम्।

२०. अभिप्राये तात्पर्ये।

२१. स्वभावे प्रकृतौ।

२२. सारसंग्रहे निष्कृष्टार्थकथने।

२३. प्रतिभायां नवनवोन्मेषशालि बुद्धिरूपायाम्।

२४. अवस्थायां वयः क्रमे।

२५. विचारे विवेचनायाम्।

२६. नाम्नि संज्ञाभिधाने।

२७. आशिषि आशीर्वादे।

एतेषु च काव्याङ्गेषु व्यापि व्यापकं, जीवितं = जीवनमौचित्यमेव प्राहुर्मनीषिण इति भावः। एतद् ग्रन्थाशयमेव स्फोरयत्येतेष्विति।

अयं भावः—कारिकोक्तं पदादिकमादायैव काव्यशरीरं सम्पन्नं भवति। एवञ्च पदादिकं काव्यस्य शरीरस्य हस्तादिकमिव लघ्वंशभूतम्, सकलतदंशव्यापिनस्तत्वस्यौ-चित्यस्यात्मात्वमुचितं न तु रसादेस्तस्य सकलतदंशव्यापित्वविरहात्। किञ्च काव्ये कारिकोक्त-पदादिभिन्नोऽप्यंशः सम्भवति चेत्? भवतु नाम किन्तु मर्मभूता जायमानेनाघातेन प्राणोत्क्रमणक्रमेण जीवस्तच्छरीरं जहाति तथैव काव्यशरीरगतमर्मस्थलेषु पदादिषु व्याघाते चमत्काराजनद्वारौचित्यंकाव्यं परिहरति येन तदकाव्यमेव सम्पद्यते।

।। इतिशम् ।।

卐

ख. काव्यभेदाः

भेदनं भेदः अथवा भिद्यतेऽनेनेति विग्रहे भिद्धातोर्भावे करणे वा घञ् प्रत्यये विभक्तिकार्ये च भेद इत्यस्यसाधुत्वं भवति, भावकरणव्युत्पत्या ज्ञायते यद्भेदशब्दः विभागविशेषस्य बोधकः। काव्यस्यभेदः काव्यभेद काव्यञ्च उत्तमोत्तमोत्तममध्यमाधमभेदेन चतुर्धा—

शब्दार्थौ यत्र गुणी भावितात्मानौ।
कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्' ।।१।। (र.ग.प्र.आ.)

अयं भावः—यत्र = काव्ये शब्दः = वाचकः अर्थोवाच्यश्च गुणीभावितात्मानौ = व्यङ्ग्यार्थापेक्षया ऽप्रधानीकृतस्वरूपौ कमपि = चमत्कारातिशयाधानेनानिर्वचनीयं प्रधानमर्थं व्यञ्जनया बोधयतस्तत्काव्यमुत्तमोत्तमम्।

एतदेव ध्वनिकाव्यम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृत स्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।

२. यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद्द्वितीयम्।

यस्मिन् काव्ये वाच्यार्थापेक्षया व्यङ्ग्यार्थान्तरापेक्षया च गुणीभूतो न तु प्रधानं व्यङ्ग्यार्थः स्वज्ञानद्वारा चमत्कारस्य जनको भवति, तद्द्वितीयमुत्तमकाव्यम्।

३. यत्रव्यङ्ग्यचमत्कारासमानाधिकरणोवाच्यचमत्कारस्तत्तृतीयम्।

यस्मिन् काव्ये व्यङ्ग्यप्रतीतिजन्यश्चमत्कारोलेशतः प्रादुर्भवन्नपि वाच्यप्रतीतिजन्यचमत्कारस्य सर्वतो मुखीनस्यान्तर्निगीर्णः स्पष्टतयानुभवेनायाति तत् तृतीयं मध्यमं काव्यम्।

४. यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं काव्यम्।

यत्र हि वाच्यार्थप्रतीतिजन्यचमत्कारपोषितस्य शब्दप्रतीतिजन्यचमत्कारस्य प्राधान्यम् न तु कथञ्चितसतोऽप्ययोग्यतयाऽविवक्षितस्य व्यङ्गस्य तदधमं नाम चतुर्थकाव्यम्।

न चोत्तममध्यमाधमभेदेन त्रिप्रकारकमेवकाव्यमिति वाच्यम् अर्थचित्रशब्द-चित्रयोरविशेषेणाधमत्वकथनस्यायुक्तत्वात्। यद्यपि चतुर्षु काव्यप्रकारेषु मध्ये उत्तमोत्तमध्वनेरसंख्यभेदाः सन्ति तथापि सामान्य भेदान् प्रस्तौमि।

द्विविधो ध्वनिरभिधामूलो लक्षणामूलश्च अभिधामूलत्वेन विवक्षितान्यपरवाच्यम्। लक्षणामूलत्वेनअविवक्षितवाच्यम्, तथाहि— विवक्षितोवाच्यतावच्छेदकरूपेणान्वयबोधविषय-केनापेक्षितोऽन्यपरोव्यङ्ग्योपसर्जनीभूतोवाच्योऽर्थो यत्र सविवक्षितान्यपरवाच्योऽभिधा मूलो ध्वनिः। पदार्थोपस्थित्यवसर एवान्वयबाधे जागरूकेऽविवक्षितो वाच्य जात्यादिरूपेणान्वयबोध विषयतयाऽनपेक्षितो वाच्योऽर्थो यत्र स चाविवक्षितवाच्यो लक्षणामूलो ध्वनिः।

विवक्षितान्यपरवाच्यस्योदाहरणम्—

शिखरिणि क्वनु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
तरुणि येन तवाधारपाटलं दशति बिम्वफलं शुकशावकः।।

अत्र च त्रय एव व्यापाराः अभिधा तात्पर्यं ध्वननञ्चेति। लक्षणा नास्ति यतो हि मुख्यार्थस्य बाधोनास्ति।

अविवक्षितवाच्यस्योदाहरणम्—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।

अत्र सुलभसमृद्धिसम्भारभाजनता लक्षणया प्रतीयते।

अभिधा मूलो विवक्षितान्यपरध्वनिः। रसध्वनि-वस्तुध्वनि-अलङ्कारध्वनिभेदेन त्रिधा।

लक्षणामूलो ध्वनिः

अर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवाच्यभेदेन द्विधा।

रसध्वनिः

असंलक्ष्यक्रमस्योपलक्षणम्-उपलक्षणत्वञ्च-अविद्यमानत्वे सति इतरव्यावर्तकम्।

मुख्यतयाप्रकाशमानो व्यङ्ग्योऽर्थः ध्वनेरात्मा सच वाच्यार्थापेक्षया कश्चिद् अलक्ष्यक्रमतया प्रकाशते कश्चित्क्रमेण। तत्र—

रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः।।

अस्याः कारिकाया विवेचनम् लोचनकारेण अभिनवगुप्तपादेनानयारीत्या कृतम् तद्दर्शयति—

तत्रेति—तयोर्मध्यादित्यर्थः। योरसादिरर्थः स एवाक्रमो ध्वनेरात्मा न त्वक्रम एव सः। क्रमत्वमपि हि तस्य कदाचिद्भवति। तदाचार्यशक्त्युद्भवानुस्वानरूपभेदतेति वक्ष्यते। आत्मशब्दः स्वभाववचनः प्रकारमाह तेन रसादिर्योऽर्थः स ध्वनेरक्रमो नाम भेदः। असंलक्ष्य क्रम इतियावत्। ननु किं सर्वदैव रसादिरर्थो ध्वनेः प्रकारः? नेत्याह, किं तु यदाङ्गित्वेन प्रधानत्वेनावभासमानः। एतच्च सामान्यलक्षणे गुणीकृत्य स्वार्थावित्यत्र यद्यपि निरूपितम् तथापि रसवदाद्यलङ्कारप्रकाशनावकाशदानायानूदितम्। स च रसादिर्ध्वनि र्व्यवस्थित एव न हि तच्छून्यं काव्यं किञ्चिदस्ति। यद्यपि च रसेनैव सर्वं जीवति काव्यम्, तथापि तस्य रसस्यैकघनचमत्कारात्मनोऽपि कुतश्चिदंशात्प्रयोजकीभूतादधिकोऽसौ चमत्कारो भवति। तत्र तदा कश्चिदुद्रिक्तावस्थां प्रतिपन्नो व्यभिचारी चमत्कारातिशयप्रयोजको भवति, तदा भावध्वनिः। यथा—

तिष्ठेत्कोपवशात्प्रभावपिहितादीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।

त्वां हर्तुं विबुधद्विषोऽपि न चमे शक्ताःपुरोवर्तिनी
सा चात्यन्तमगोचरं नयनयोर्यातेतिकोऽयं विधिः।।

अत्र हि विप्रलम्भरससद्भावेऽपीयति वितर्काख्य व्यभिचारि-चमत्क्रिया प्रयुक्त आस्वादाशयः। व्यभिचारिण उदयस्थित्य-पायत्रिधर्मकाः।

यदाहः—विविधमाभिमुख्येन चरन्तीति व्यभिचारिणः इति। त्रयोदयावस्था प्रयुक्तः कदाचित् यथा—

याते गोत्रविपर्यये श्रुतिपथं शय्यामनुप्राप्तया
निर्ध्यातं परिवर्तनं पुनरपि प्रारब्धुमङ्गीकृतम्।
भूयस्तत्प्रकृतं कृतं च शिथिलक्षिप्तैकदोर्लेखया
तन्वङ्ग्या न तु पारितः स्तनभरः कृष्णप्रियस्योरसः।।

अत्र हि प्रणयकोपस्योज्जिगमिषयैव यदवस्था न तु पारित इत्युक्त्यावकाशनिराकरणात्तदेवास्वाद जीवितम्। स्थितिः पुनरूदाहृता-तिष्ठेत्कोपवशात् इत्यादिना। क्वचित्तु व्यभिचारिणः प्रशमावस्थया प्रयुक्तश्चमत्कारः। यथोदाहृतंप्राक् एकस्मिन् शयने पराङ्मुखतया इति। अयं तत्प्रशम इत्युक्तः। अत्र चेर्ष्याविप्रलम्भस्य रसस्यापि प्रशम इति शक्यं योजयितुम्। क्वचितुव्यभिचारिणः सन्धिरेव चर्वणास्पदम् यथा—

ओ सुरू सुष्टि आइं मुहु चुम्विउ जेण।
अमिअरस घोण्टाणं पडिजाणिउतेण।।

इत्यत्र श्रुत्युक्ते तु कोपे कोपकषाय गद्गदमन्दरुदिताया येन मुखं चुम्वितं तेनामृतरसनिगरणविश्रान्ति परम्पराणां तृप्तिर्ज्ञातेति कोपप्रसाद-सन्धिश्चमत्कारस्थानम्। क्वचिद्व्यभिचार्यन्तरशबलतैव विश्रान्तिपदम्। यथा—

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपिदृश्यते सा,
दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम्।

किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति।।

अत्र वितर्कौत्सुक्ये मतिस्मरणे शङ्कादैन्ये। धृतिचिन्तने परस्परं बाध्यबाधकभावेन द्वन्द्वशो भवन्ती पर्यन्ते तु चिन्ताया एव प्रधानतां ददती परमास्वादस्थानम्। एवमन्यप्युत्प्रेक्ष्यम् एतानि चोदयसन्धि-शबलत्वादिकानि कारिकायामादिग्रहणेन गृहीतानि।

नन्वेवं विभावानुभावमुखेनप्यधिकश्चमत्कारो दृश्यत इति विभावध्वनिरनुभावध्वनिश्च वक्तव्यः। मैवम् विभावानुभावौ तावत्स्वशब्दवाच्यावेव। तच्चर्वणापि चित्तवृत्तिष्वेव पर्यवस्यतीति रसभावेभ्यो नाधिकं चर्वणीयम्। यदा तु विभावानुभावावपि व्यङ्ग्यौ भवतस्तदा वस्तुध्वनिरपि किं न सह्यते। यदा तु विभावा भासाद्रत्याभासोदयस्तदा विभावानुभासाच्चर्वणा भास इति रसाभासस्य विषयः। यथा रावणकाव्याकर्णने श्रृङ्गाराभासः। यद्यपि 'श्रृङ्गारानुकृतिर्या तु स हास्यः' इति मुनिना निरूपितं तथाप्यौत्तरकालिकं तत्र हास्यरसत्वम्।

दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिं।
चेतः कालकलामपि प्रकुरूते नावस्थितिं तां विना।

इत्यत्र तु न हास्यचर्वणावसरः। ननु नात्र रतिः स्थायिभावोऽस्ति। परस्परास्थाबन्धाभावात् केनैतदुक्तं रतिरिति। रत्याभासोहि सः। अतश्चाभासता येनास्य सीतामय्युपेक्षिका द्विष्टा वेति प्रतिपत्तिर्हृदयं न स्पृशत्येव। तत्स्पर्शे हि तस्याप्यभिलाषो विलीयेत। न च मयीयमनुरक्तेत्यपि निश्चयेन कृतं, कामकृता-मोहात्। अत एव तदाभासत्वं वस्तुनस्तत्र स्थाप्यते शुक्तौ रजताभासवत्। एतच्च श्रृङ्गारानुकृतिशब्दं प्रयुञ्जानो मुनिरपि सूचितवान्। अनुकृतिरमुख्यतया आभास इति ह्येकोऽर्थः। अतएवाभिलाषे एकतरनिष्ठेऽपि श्रृङ्गारशब्देन तत्र-तत्र व्यवहारस्तदाभासतया मन्तव्य श्रृङ्गारेण वीरादीनामप्या-भासरूपतोपलक्षितैव।

एवं रसध्वनेरेवामी भावध्वनि प्रभृतयो निष्यन्दाः। आस्वादे प्रधानं प्रयोजकमेवमंशं विभज्य पृथक्व्यवस्थाप्यते यथा गन्धयुक्तिज्ञैरेकरससम्मूर्च्छितामोदोपभोगेऽपि शुद्धमास्यादिप्रयुक्तमिदं सौरभमिति। **रसध्वनिस्तु** स एव योऽत्र मुख्यतया विभावानुभाव-व्यभिचारिसंयोजनोदित स्थायिप्रतिपत्तिकस्य प्रतिपत्तुः स्थाय्यंशचर्वणा प्रयुक्त एवास्वाद प्रकर्षः। यथा—

कृच्छ्रेणोरुयुगं व्यतीत्य सुचिरं भ्रान्त्या नितम्वस्थले
मध्येऽस्यास्त्रिबली तरङ्गविषमे निःष्पन्दतामागता।
मद् दृष्टिस्तृषितेव सम्प्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने।।

अत्र हि नायिकाकारानुवर्ण्यमानस्वात्मप्रतिकृतिपवित्रितचित्र-फलकावलोकनाद्वत्सराजस्य परस्परास्थाबन्धरूपो रतिस्थायिभावो विभावानुभावसंयोजनवशेन चर्वणारुढ इति। तदलं बहुना! स्थितमेतत्—रसादिरर्थोऽङ्गित्वेन भासमानोऽसंलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेः प्रकार इति।

शब्दशक्तिमूलवस्तुध्वनिर्यथा—

राज्ञो[३७] मत्प्रतिकूलान्मे महद्भयमुपस्थितम्।
बाले वारय पान्थस्य वासदानविधानतः।।

अर्थात् चिरात् कान्ता विरहकातरतया परमोत्कण्ठितं मामयमुदीयमानश्चन्द्रो नितरामुद्वेजयति अत उपभोगं देहीति व्यङ्ग्योऽर्थः।

अयं भावः—राजपदनिष्ठा या अभिधात्मिकाशक्तिस्तन्मूलिका या व्यञ्जना तज्जन्यबोधविषयः उपभोगं देहीति।

न चात्र नृपचन्द्रयोरूपमानोपमेयभावः अथवा भेदरूपं रूपकमस्तु तथा चालङ्कारध्वनिरिति वाच्यम् इह नृपरूपस्यार्थस्य चन्द्ररूपार्थगोपनमात्रार्थमुपात्तत्वेन युगपदुल्लसितोपमानोपमेयकथ-योरुपमा रूपकयोस्तात्पर्यविषयताया अयोगात्।

शब्दशक्तिमूलालङ्कारस्य ध्वनिर्यथा—

करतल[३८] निर्गलदविरलदानजलोल्लसितावनीवलयः।
धनदाग्रमहितमूर्तिर्जयतितरां सार्वभौमोऽयम्।।

अयं भावः = कश्चित्कविः कमपि राजानं स्तौति करतलात् निर्गलता = स्यन्दमानेन अविरलं = सततम् दानस्य = दीनोद्देश्यकत्यागस्य जलेन उल्लासितः = आनन्दितः अवनीवलयः = भूमण्डलो येनासौ = 'करतलनिर्गलदविरल दानजलोल्लासितावनीवलयः'।

तथा धनदानां = धनदानपराणाम् अग्रे = आदौ महिता = पूजिता भूर्तिः स्वरूपं यस्य सः धनदाग्र महितमूर्तिः। अयं सार्वभौमः जयतितराम् = अतिशयेन सर्वोत्कृष्ट इति वाच्योऽर्थः। ध्वन्यर्थस्तु-करतलात् = शुण्डादण्डात् निर्गलता अविरलं दानजलेन मदवारिणा उल्लासितः अवनीवलयो येन सः तथा धनदस्य कुबेरस्य अग्रे पुरः महिता प्रशंसिता मूर्तिर्यस्य सः अयं सार्वभौमो दिग्गजः जयतितराम्। अस्मिन् पक्षे राजप्रकरणे कर-दान धनद-सार्वभौमशब्दानां शक्तौ सङ्कोचतायामपि तन्मूलकेन ध्वननेन प्रतीयमानस्यार्थान्तरस्याप्रस्तुतस्याभिधानं माभूदितिप्रकृता प्रकृतयो रूपमानोपमेयभावः प्रधानवाक्यार्थत्वेनोपमालङ्कारध्वनिः। अर्थ शक्तिमूलकवस्तुध्वनिर्यथा—

गुञ्जन्ति[३९] मञ्जु परितो गत्वा धावन्ति सम्मुखम्।
आवर्तन्ते विवर्तन्ते सरसीषु मधुव्रताः।।

अस्मिन पद्ये वाच्यवृत्या कथितानि मधुव्रतकर्तृकमञ्जुगुञ्जनादीनि वस्तूनि स्वतः सम्भवीनि न तु कवि कल्पितानि तैश्च प्रथमं सरसि कमलानामुत्पत्तिरासन्नेति व्यज्यते तद् द्वारा च शरद् ऋतोरागमः सन्निकट इति ध्वन्यते तथा भवतीदं पद्यं स्वतः सम्भाविनावस्तुना वस्तुध्वनेरूदाहरणम्।

स्वतः सम्भावितवस्तुनालङ्कारध्वनिर्यथा—

मृद्वीका रसिता सिता समसिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायिकतिधा रम्भाधरः खण्डितः।
तत्त्वं ब्रूहि मदीयजीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः।।

अयं भावः—कश्चन भक्तःस्वात्मानं पृच्छति—आत्मा द्विविधः एकः शरीरादितः पृथग्भूतो निरवच्छिन्नः द्वितीयश्च शरीराद्यवच्छिन्नः अस्मच्छब्दवाच्यः उभयोर्मध्ये निरवच्छिन्नस्य सम्बोध्यत्वेन शरीराद्यवच्छिन्नस्य प्रश्नकर्तृत्वेनात्र वर्णितः।

प्रश्नविषयीभूतञ्च मधुरिमो द्वारादिरूपं स्वतः सम्भावित-वस्तुव्यञ्जकम्। व्यङ्ग्यश्चातिशयोक्त्यलङ्कारः।

भगवन्नामरूपेणोपमानेनानेकजन्मवृतान्तप्रत्यक्षीकरणहेतुयोगसिद्धि-विशेषस्योपमेयस्य निगीर्यकथनम् अत्रातिशयोक्तिस्वरूपम्।

उत्तमकाव्यस्योदाहरणम्:

राघवविरहज्वाला सन्तापितसह्यशैलशिखरेषु।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय।।

अत्र जानकीकुशलावेदनेन रामः शीतलीकृत इति व्यङ्ग्यमाकस्मिककपिकर्तृकहनुमद् विषयककोपोपपादकतया गुणीभूतमपि दुर्दैववशतोदास्यमनुभवद् राजकलत्रमिव सुन्दरतामावहति।

उक्त व्यङ्ग्ये गौणता विद्यते तथापि तत्र चमत्कारः परिलक्षितो भवत्यत उत्तमं काव्यम्।

मध्यमकाव्यस्योदाहरणम्:

यथा यमुना वर्णने—

तनयमैनाकप्रावेषणलम्वीकृतजलधिजठरप्रविष्ट-
हिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी।

अयं भावः हिमालयस्य सुतोमैनाकः तस्य इन्द्रभिया समुद्रमध्ये लीनस्य मैनाकस्यान्वेषणाय लम्वीकृता समुद्रस्योदरे प्रविष्टा हिमालयस्य बाहुरिवाचरतीति तस्याः = हिमगिरिभुजायमानायाः भगवत्याः गङ्गायाः सखी = सहचरी यमुनेति।

अत्र व्यङ्ग्यचमत्कारस्य वाच्यचमत्कारे निलीनताऽस्फुटत्वाद व्यङ्ग्यचमत्कारासामानाधिरण्यं वाच्यचमत्कारस्येति तृतीयमध्यमं काव्यम्।

अधमकाव्यस्योदाहरणम्ः

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजत्राय गोत्रात्रेते नमो नमः।।

मित्रः = सूर्यः अत्रिपुत्रः = चन्द्रः तौ नेत्रेयस्यासौ मित्रात्रिपुत्रनेत्रः तस्मै मित्रात्रिपुत्रनेत्राय त्रय्याः = ऋग्यजुस्सामवेदानां शात्रव = अपहारकत्वेन रिपुर्हयग्रीवदैत्यः त्रयीशात्रवः तस्य = त्रयीशात्रवस्य शत्रुः, तस्मै त्रयीशात्रवशत्रवे = हयग्रीवस्य नाशकाय गोत्राणां = पर्वतानां पक्षच्छेदनादरिः गोत्रारिः इन्द्रः गोत्रारेः गोत्राजाः =देवाज्ञान् त्रायते = रक्षतीति गोत्रारिगोत्रजत्रः तस्मै गोत्रारिगोत्रजत्राय गवां = धेनूनां ज्ञात्रे गोत्रात्रे ते विष्णवे नमः।

शिवपक्षे तु त्रय्या ध्वंसनाच्छात्रवाणाम् = असुराणाम् शत्रवे गोर्वृषस्य त्रात्रे ते शिवाय नमो नमः।

इह वृत्यनुप्रासात्मकशब्दालङ्कारप्रयोज्यश्चमत्कार एव कविसंरम्भ गोचरतयाप्रधानम्, वाच्यार्थप्रतीति जन्याभगवद्विषयकवक्तृनिष्ठ-रतिभावादिव्यङ्ग्यप्रतीतिजन्यावालेशतः सन्नपि चमत्कारोऽस्फुट-त्वाल्लीनोऽङ्गतामेव भजतीति निर्बाधोऽधमकाव्यलक्षणसमन्वयः।

विमर्शः

न च पुराणादिषु प्रसिद्धाः काव्यस्य गद्यपद्यमिश्रत्वेन त्रयाः भेदाः तथाहि = गद्यं पद्यञ्च मिश्रञ्च काव्यादि त्रिविधं स्मृतम्। तथा च एते भेदावक्तव्याः अथवा गद्यस्य चत्वारो भेदाः पद्यस्य चत्वारो भेदाः

मिश्रस्य चत्वारो भेदाः इति वक्तव्यमिति वाच्यम् चमत्कृतेः प्राधान्ये सति उत्तमोतमोत्तममध्यमाधमेषु अन्यतमत्वं काव्यत्वमिति-स्वीकारेणादोषात्।

न च माघादि महाकविभिश्शिशुपालवधादिमहाकाव्येषु सन्निवेशितानांमेकाक्षरादिचित्राणां काव्यत्वन्न स्यात् रमणीयार्थ-प्रतिपादकशब्दत्वाभावात्। यथा—दाददो द्दुद्दा दी दादत दौ दूददी ददोः। दुद्दादं दददे दुद्दे ददा ददद दोऽददः। इत्यादौ काव्यत्वन्न स्यादिति वाच्यम् नह्येकाक्षरादिचित्रेषु सर्वथार्थराहित्यम् चमत्कृतिराहित्यं वा अनुभवविरोधात्। एवं सति, अर्थचमत्काराच्छब्दचमत्कारस्य निकर्षेऽपि प्राचीनकविपरम्परानुमतं निकृष्टकाव्यत्वमेका-क्षरादिचित्रेषु निर्बाधम्। तथा च काव्यस्य चत्वारो भेदाः एव आश्रयणीयाः।

वस्तुतस्तु ध्वनिकाव्यत्वेन च त्रयाः भेदाः तेचोत्तममध्य-माधमरूपाः।

ध्वनिकाव्ये अविवक्षितवाच्यस्य विवक्षितान्यपरवाच्यस्य सर्वे भेदाः आगच्छन्ति।

तदुक्तमानन्दवर्धनाचार्येणोत्तमकाव्यस्वरूपम् ।

यत्रार्थः शब्दोवा तमर्थमुपसर्जनी कृत स्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।

गुणीभूतव्यङ्ग्यकाव्यस्यमध्यमत्वेनाङ्गीकृतमानन्दवर्धनाचार्येण तद्यथा—प्रकारोऽन्योगुणी-भूतव्यङ्ग्यः काव्यस्य दृश्यते। यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत्।

तृतीयभेदस्याधमत्वेनाङ्गीकृतमाचार्यवरेणानन्दवर्धनेन तद्यथा—

चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम्।

तत्र किञ्चिच्छब्द चित्रंवाच्यचित्रमतः परम्।

व्यङ्ग्यस्यार्थस्य प्राधान्ये ध्वनिसंज्ञितकाव्यप्रकारः गुणभावे तु गुणीभूतव्यङ्ग्यता। ततोऽन्यद्रसभावादि तात्पर्यरहितं व्यङ्ग्यार्थ

विशेषप्रकाशनशक्तिशून्यं च काव्यं केवलवाच्यवाचकवैचित्र्य-मात्राश्रयेणोपनिबद्धमालेख्यप्रख्यं यदा भासते तच्चित्रम्। न तन्मुख्यं काव्यम् काव्यानुकारोह्यसौ तत्र किञ्चिच्छब्दचित्रं यथा दुष्करयमादि। वाच्यचित्रं ततः शब्दचित्रादन्यद् व्यङ्ग्यार्थसंस्पर्श रहितं प्राधान्येन वाक्यार्थतया स्थितं रसादि तात्पर्यरहितमुत्प्रेक्षादि।

एतादृशा अपि भेदा आचार्येण स्वीक्रियन्ते। गद्य पद्य भेदेन द्वौ भेदौ संस्कृतप्राकृतापभ्रंशभेदेन त्रयाः भेदाः ख्यातवृत्तकल्पित-वस्तुफलाश्रितशास्त्राश्रितभेदेन चत्वारो भेदाः महाकाव्यरूपकाख्यायि-काकथामुक्तकभेदेन पञ्चभेदाः सन्ति। तदुक्तं **काव्यालङ्कारकाराचार्येण भामहेन–**

शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद् द्विधा।
संस्कृते प्राकृतं चान्यदपभ्रंश इति त्रिधा।।
वृत्तदेवादिचरिताशंसि चोत्पाद्य वस्तु च।
कलाशास्त्राश्रयञ्चैव चतुर्धाभिद्यते पुनः।।
सर्ग बन्धोऽभिनेयार्थस्तथैवाख्यायिका कथे।
अनिबद्धञ्च काव्यादितत्पुनः पञ्चधोच्यते।।

।। इतिशम् ।।

卐

ग. पद्यकाव्यभेदाः

पादाः सन्ति, अस्येति पादशब्दाद् 'रूपादाहतप्रशंसयोर्यप. ५.२.२० इति सूत्रोपरिस्थितात् अन्येभ्योदृश्यते' इति वार्तिकात् यप् प्रत्यये तदुक्तं महाभाष्ये 'यप् प्रकरणेऽन्येभ्योऽपि दृश्यते' यप् प्रकरणेऽन्येम्योऽपि दृश्यते इति हिम्याः पर्वताः गुण्याः ब्राह्मणाः। तथा च तद्धितान्तत्वात्प्रातिपदिकसञ्ज्ञायां सुपि लुकि 'पाद य' इत्यवस्थायां भसञ्ज्ञायाम् 'पद्दन्नोमासहन्निशसन्यूषदोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ६.१.६३ इति सूत्रेण पदादेशे विभक्तिकार्ये पद्यमिति भवति। पदन्नो इति सूत्रे प्रभृतिग्रहणं प्रकारार्थं तच्च प्रत्ययत्वेन शब्दत्वेन वा गृह्यते।

छन्दोबद्धपदं पद्यम्ः

पद्यस्य लक्षणन्तु छन्दः शास्त्रे प्रसिद्धम्, सामान्यतः पद्यं द्विविधम् जातिर्वृतञ्च जातिर्नियतमात्रिका वृत्तं नियतगुरुलघुविन्यासम्। तदुक्तं छन्दोमञ्जर्याम्—

पद्यं चतुष्पदं तच्च वृतं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्रा कृता भवेत्।।

वृत्तानां भेदाः प्रदर्श्यन्ते

युक्समं विषमं चायुक्च स्थानं सद्भिर्निगद्यते।
सममर्द्धसमं वृत्तं विषमं च तथा परम्।।

सद्भिः = छन्दोविद्भिः, समं = द्वितीयचतुर्थादिस्थानं 'युक्' इति, विषमं स्थानम् = एकतृतीयादि 'अयुक्' इति निगद्यते = कथ्यते। 'च' पदेन समस्य युग्मानोजसंज्ञे विषमस्य अयुग्मोजसंज्ञे च दर्शिते। अथ वृत्तभेदानाह 'समम्' इति। स्पष्टम्। इदन्तु बोध्यम्-पादाख्यैः पदैर्धटितं पद्यम्। सामान्यतस्तत् द्विविधम्। जातिर्वृतश्च जातिर्नियतमात्रिका। वृतं नियतगुरुलघुविन्यासम्। तत्र जातिरार्यादि वृत्तम्-उक्ताऽत्युक्तादि। तच्च समादिभेदवत्। तदुक्तम्—

पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृताभवेत्।।

(छन्दो मञ्जरी ३)

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दः शास्त्रतत्वज्ञाः समं वृत्तं प्रचक्षते।।

अथ समवृत्तलक्षणमाह—'अङ्घ्रय' इति। यस्य वृत्तस्य चत्वारः अङ्घ्रयः = पादाः, तुल्यलक्षणलक्षिताः = समानलक्षणोपेताः सन्तीति शेषः, छन्दः शास्त्रतत्वज्ञाः = छन्दोरहस्यविदः तत् = छन्दः समम् = समसंज्ञकम् वृत्तम् प्रचक्षते = कथयन्ति।

प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्यवद् वृत्तं तदर्धसमुच्यते।।

अर्धसमवृत्तलक्षणमाह-प्रथमाङ्घ्रिसम इति।

यस्य = वृत्तस्य तृतीयः चरणः = पादः प्रथमाङ्घ्रिसमः = प्रथमपादतुल्यो भवेत् द्वितीयः = द्वितीयः पादः तुर्यवत् = चतुर्थचरणवत् च भवेत् तत् 'अर्धसमं नामवृत्तम् = छन्दः उच्यते = कथ्यते।

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्।
तदाहुर्विषयं वृत्तं छन्दः शास्त्रविशारदाः।।

विषमवृत्तलक्षणमाह-यस्येति। यस्य = वृत्तस्य पादचतुष्के अपि = चतुर्ष्वपि पादेषु परस्परम् = अन्योन्यम् लक्ष्म = लक्षणम् भिन्नम् = विलक्षणं विलक्षणं स्यादिति शेषः छन्दः शास्त्रविशारदाः = छन्दः शास्त्रविचक्षणाः तत् 'विषमम्' नाम, वृत्तम् = पद्यम् आहुः = कथयन्ति। एतेषामुदाहरणानि अग्रे दर्शयिष्यन्ते।

आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः।
पृथक्छन्दो भवेत्पादैर्यावत् षड्विंशतिं गतम्।।

अथ समवृत्तभेदा उच्यन्ते आरभ्येति। एकाक्षरात् = एकवर्णात् पादात् = पद्यतुरीयचरणात् आरभ्य = आदौ कृत्वा एकैकाक्षरवर्धितैः = एकेन एकेन अक्षरेण वर्धितैः वृद्धिं गमितैः पादैः कृत्वा षड्विंशतिम् = षड्विंशतिवर्णसङ्ख्याकं पादं प्रति यावत् गतम् = गमनं प्राप्तं भवेत् अर्थात् यावत् षड्विंशतिवर्णैरेकः पादः पूर्येत तावत्पर्यन्तं पृथक् = भिन्नं भिन्नं छन्दः = वृत्तम् उक्तादिनामकं भवेत्। षड्विंशत्यक्षरपर्यन्तं वृद्धेरवधिरित्यर्थः। एवं सति उक्ताख्यायां प्रथमायां जातौ चत्वारोऽपि पादा एकैकाक्षराः सन्तीत्यादि ज्ञेयम्।

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः।
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः।।

अधिकाक्षरपादस्य छन्दसः संज्ञोच्यते-तदूर्ध्वम् इति। तदूर्ध्वम् = षड्विंशत्यक्षरादूर्ध्वम् उपरि सप्तविंशत्याद्यक्षरपादं छन्दः। चण्डवृष्ट्यादिदण्डकाः = एतन्नामानः परिकीर्तिताः = कथिताः। शेषम् = चण्डवृष्ट्यादिविशेषात् अन्यत् त्रिभिः षड्भिः वा चरणैः = पादैः उपलक्षिताः गाथाः = गाथासंज्ञकानि छन्दांसि ज्ञेयानीत्यर्थः। चकारान्न्यूनाधिकगुरुलघुचरणसत्वेऽपि गाथाव्यवहारएव सूचितः। 'गाथा ४॰त्रिभि' रिति' 'लक्षिता' इति च पाठान्तरम्[१]।

उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका।
गायत्र्युष्णिगानुष्टुप् च बृहती पङ्क्तिरेव च।।
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता।
शक्वरी साऽतिपूर्वा स्यादष्ट्यऽत्यष्टी ततः स्मृतिः।।
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः सङ्कृतिश्चापि तथातिकृतिरुत्कृतिः।।

जातिः-मात्रा वृत्तेषु आर्या लक्षणम्

लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।
षष्ठोयं नलघूवा प्रथमेऽर्थे नियतमार्यायाः।।

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपद नियमः।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः।।

अयं भावः—सप्त=सप्तसंख्याका गोपेताः = गुरुणा युक्त गणाः = चातुर्मात्रिकाः पूर्वोक्ता भवन्तीत्यर्थः। इह = अस्यामार्यायाम् विषमे = प्रथमतृतीयपञ्चमसप्तरूपे जः = जगणः मध्य गुरुर्गणो न भवति किन्तु अयम् जगणः षष्ठः = षष्ठस्थानको भवति अर्थात् जगणेन षष्ठस्थानकगण पूर्तिः कर्तव्या वा = अथवा षष्ठे स्थाने नलघू = नश्च लघुश्चेति द्वन्द्वः अर्थात् नगणः त्रिलघुरूप एको लघुश्च भवति। षष्ठे = षष्ठस्थानवर्तिनि न्त्वे = नलघुरूपे चतुर्लघुरूपे (।।।।) गणेसति, द्वितीयलात् = द्वितीयलघोः प्रारभ्य अर्थात् तस्यैव षष्ठस्य चतुर्लघो र्गणस्य द्वितीयलघोः पूर्वं = प्रथमलघोरन्ते सयति पदनियमः = यति विशिष्टस्य पदस्य = सुप्तिङन्तात्मकस्य नियमः = अवसानं समाप्तिरिति यावत् कर्त्तव्य इति शेषः। परकेन्ले = षष्ठापेक्षया परस्मिन् सप्तमे नगण लघुरूपे (।।।।) गणे कृते सति मुखलात् = सप्तमस्यैव प्रथमलधोः पूर्वं षष्ठगणान्ते सयतिपदनियम्ः (इति पुनरन्वेतव्यम्) सयति पदं नियम्यत इत्यर्थः। चरमे = द्वितीये पुनरार्याया अर्धे = उत्तरार्धे पञ्चमके = पञ्चमगणे न्ले = नगणलध्वात्मके चतुर्लधौ (।।।।) सति तस्मात् = मुखलधोः पूर्वमेव अर्थात् चतुर्थगणस्यान्ते सयति पदनियमः = चतुर्थान्तमेव पदं समाप्यत इत्यर्थः। इह = आर्याया उत्तरार्धे षष्ठः = गणः लः = लघुरूप (।) एव भवति। एंतत् षष्ठगणस्य लघुरूपत्वकरणमेव पूर्वार्धाद्विशेषः। अन्यस्तु सर्व पूर्वार्ध लक्षणमुत्तरार्धे समानमिति भावः। उदाहरणञ्चेदमेव लक्ष्यलक्षणात्मकत्वादस्य ग्रन्थस्येति सर्वत्र ज्ञातव्यम्। उदाहरणान्तरं यथा—

कृष्णः शिशुः सुतो मे वल्लवकुलटाभिराहतो न गृहे।
क्षणमपि वसत्यसाविति जगाद गोष्ठयां यशोदार्या।।

वृन्दावने सलीलं वल्गुद्रुमकाण्डनिहिततनुयष्टिः।
स्मेरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः।।

षड्विषमेऽष्टौ समे कलास्ताश्च समेस्युर्नोनिरन्तराः।
न समाऽत्र पराश्रिताकला वैतालीयेऽन्ते रलौ गुरुः।।

वैतालीयं लक्षयति-'षड्' इति। विषमे पादे = प्रथमतृतीय चरणे षट् कलाः = मात्राः स्युः। समे = द्वितये चतुर्थे च अष्टौ कलाः स्युः ताश्च = ताः पुनः कला समे पादे निरन्तराः = व्यवधान रहिताः केवलं लघुरूपा नो स्युः = नैव भवेयुः किन्तु गुरुयुता अपि स्युः। विषमे तु नेदं बन्धनम् अर्थात् प्रथम तृतीयचरणे लघुरूपा अलघुरूपा वा यथारूचि मात्रा निवेशनीयाः। किञ्च-अत्र = वैतालीये समा = द्वितीया चतुर्थी षष्ठी च कला पराश्रिता = परायाभग्रेभवायां तृतीयायां पञ्चम्यां सप्तम्यां वा मिलित्ता न भवेत् अर्थात् द्वितीयतृत्तीयादिकलानामेकेन गुरुणोपादनं न कार्यम्। अन्ते = उक्तानां कलानां मात्राणाम् परस्तात् = रलौ रगणलघूगुरुश्च भवतीति वैतालीयलक्षणम्। अत्र विषमपादयोः आद्यासु षण्मात्रासु अष्टौ विकल्पाः।

यथा—ऽऽऽ, ऽ।।ऽ, ।।ऽऽ, ।।।।।।, ऽऽ।।, ।।ऽ।।, ऽ।।।। ।।।ऽ इति।

समपादयोराद्यास्वष्टमात्रासु त्रयोदशविकल्पाः—

ऽऽऽऽ, ऽऽऽ।।, ऽऽ।।ऽ, ऽ।।ऽऽ, ।।ऽऽऽ, ऽऽ।।।।, ऽ।।ऽ।।, ऽ।।।।ऽ, ।।।।ऽऽ, ।।ऽऽ।।, ।।ऽ।।ऽ, ।।ऽ।।।।, ।।।।ऽ।। इति प्रपञ्चस्त्वन्यत्र दर्शितं लक्षणं चात्रैव योजनीयम्।

लक्षणसारस्तु - यत्र प्रथमे पादे तृतीये च चतुर्दशमात्राः द्वितीये चतुर्थे च षोडश, तद् वैतालीयं नाम छन्दः। परन्तु उभयोरपि पादयोरन्ते रगण लकार गकारः कर्तव्याः इदञ्च वैतालीयस्यार्धम्। पराधर्मप्येवम्। उदाहरणं यथा वा—

।।ऽ।।ऽ।।ऽ।ऽ।।ऽऽ।।ऽ।ऽ।ऽ

शवशोणितपञ्चराञ्चितं पुरुषान्त्रग्रथितोर्ध्वमूर्धनम्।

।।ऽ।।ऽ।।ऽ।।ऽ ऽऽऽ।।ऽ ।ऽ।ऽ

वपुरन्तरवह्निदीपितं वैतालीयमिदं विलोक्यताम्।।

एवमत्रदर्शितरेखाभिर्लक्षणयोजनमवसेयम्।।

जतौ तु वंशस्थमुदीरितं जरौ

तु = चेत् जतौ = जगणतगणौ (अथ) जरौ = जगणरगणौ स्याताम् तदा वंशस्थं नाम छन्द उदीरितम् = उक्तम्। पादेयति—

अवश्यभव्येष्वनवग्रह ग्रहा
यया दिशा धावति वेधसः स्पृहा।
तृणेन वात्येव तयाऽनु गम्यते
जनस्य चित्तेन भृशाऽवशात्मना।। (नैषधम्)

अथवा

उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपात शिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः।। (रघुवंशम्)

स्यादिन्द्रवंशा ततजैः रसंयुतैः

ततजैः = तगण जगणैः तादृशैः रसंयुतैः = अन्तेरगणोपेतैः तदा 'इन्द्रवंशा' नाम छन्दः स्यात्। उदाहरणं यथा—

दैत्येन्द्रवंशाग्निरुदीर्ण दीधितिः
पीताम्बरोऽसौ जगतां तमोपहः।
यस्मिन्ममज्जुः शलभा इव स्वयं
ते कंस-चाणूरमुखा मखद्विषः।।

अन्यदुदाहरणं यथा—

कुर्वीत यो देवगुरुद्विजन्मना
मुर्वीपतिः पालनमर्थलिप्सया।
तस्येन्द्रवंशेऽपि गृहीतजन्मनः
सञ्जायते श्रीः प्रतिकूलवर्तिनी।।

द्रुतविलम्बितमाह नभौ भरौ

नभौ = नगण-भगणौ, भरौ = भगण-रगणौ चेद् भवेताम् तदा द्रुतबिलम्बितम्' आह पिङ्गलमुनि' रिति शेषः। पादे यतिः।

अयि! मनो! न मनोरथसन्ततिं
परि विहाय सहायतमं हरिम्।
भजसि तापसतापसमुच्छिदं
पथि मतेः कुमतेः परिसम्भ्रमत्।।

यथा वा—

यदि भजेत गुरोः पदपङ्कजं
क्लमहरं भवरोगमहौषधम्।
अथ नरः परमं पदमर्जयेज्
जठरधाजठरं न विशेत्पुनः।।

तथा च वृत्तरत्नाकरे षट् त्रिंशदधिकशतसंख्याकानां छन्दसां लक्षणानि सन्ति।

एतेषां छन्दसांमध्येऽन्यतमेन लक्षणेन मुक्तमेकं पद्यम् मुक्तकम् अनयारीत्या पञ्चभेदाः पद्यानां तदुक्तं साहित्यदर्पणकारेण—

छन्दोवद्धपदं पद्यं तेनचमुक्तेन मुक्तकम्।
द्वाभ्यान्तु युग्मकं सान्दानितकं त्रिभिरिष्यते।।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्। तत्रमुक्तकं यथा—

सान्द्रानन्दमनन्तमव्ययमजं यद्योगिनोऽपि क्षणं
साक्षात् कर्त्तुमुपासते प्रति मुहुर्ध्यानैकतानाः परम्।

धन्यास्ता मधुरापुरीयुवतयस्तद् ब्रह्म याः कौतुका
दालिङ्गन्ति समालपन्ति शतधा कर्षन्ति चुम्बन्ति च।।
किं करोषि करोपान्ते कान्ते! गण्डस्थलीमिमाम्।
प्रणयप्रवणे कान्तेऽनैकान्ते नोचिता क्रुधः।
इति यावत् कुरङ्गाक्षी वक्तुमीहामहे वयम्।
तावदाविरभूच्चूते मधुरो मधुपध्वनिः।।

एवमन्यानपि—

अनुष्टुबादि तच्च छन्दः शास्त्रप्रसिद्धलक्षणम् तेन पद्येन मुक्तेन पद्यान्तरनिरपेक्षेण एकेन तैनैकेनैवच। मुक्तकमिति क्वचित् पाठः। द्वाभ्यां परस्परापेक्षाभ्यां पद्याभ्यामेवमग्रेऽपि। पञ्चभिरिति तद न्यूनसंख्याव्यच्छ्रेदार्थं। तेन माघादौ दशादिभिः श्लोकैः कुलकं सङ्गच्छते।

अग्निपुराणे पद्यानामनयारीत्या भेदः[४१] कृतः—

'पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा।
वृतमक्षरसंख्येयमुक्थं तत् कृतिशेषजम्।।
मात्राभिर्गणना यत्र साजाति काश्यपः।
सममर्द्ध समं वृत्तं विषमं पैङ्गलं त्रिधा।।

यदितु पद्य भेदा इत्यनेन पद्यकाव्यभेदानां ग्रहणं स्यात्तदा तु ते अनेकास्तान् सङ्क्षेपेण दर्शयति।

मुक्तमन्ये[४२]नानालिङ्गितं तस्य संज्ञायां कन्। तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्धमध्यवर्ति न मुक्तकमित्युच्यते द्वाभ्यां क्रियासमाप्तौ सन्दानितम्। त्रिभिर्विशेषकम् चतुर्भिः कलापकम्। पञ्च प्रभृतिभिः कुलकम्। इति क्रिया समाप्तिकृता भेदा इति अवान्तरक्रियासमाप्तावपि वसन्तवर्णनादिरेकवर्णनीयोद्देश्येन प्रवृत्तः पर्यायबन्धः! एकं धर्मादिपुरुषार्थमुद्दिश्य प्रकारवैचित्र्येणानन्त-वृतान्तवर्णनप्रकाराः परिकथा। एकदेशवर्णना खण्डकथा।

समस्तफलान्तेतिवृत्तवर्णनासकलकथा। द्वयोरपि प्राकृतप्रसिद्धत्वाद् द्वन्द्वेन निर्देशः। पूर्वेषां तु मुक्तकादीनां भाषायामनियमः। महाकाव्यरूपः पुरुषार्थफलः समस्तवस्तुवर्णना प्रबन्धः सर्गबन्धः संस्कृतएव। अभिनेयार्थं दशरूपकं नाटिकात्रोटकरासकप्रकरणिकाद्य-वान्तरप्रपञ्च-सहितमनेकभाषाव्यामिश्ररूपम्।

।। इतिशम् ।।

卐

घ. महाकाव्यस्य स्वरूपम्:

'महच्च तत्काव्यं महाकाव्यम्' अत्र सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः २.१.७१ इत्यनेन समासे सुपो लुकि 'आन्महतः समानाधिकरणजातीययोः। (७.३.४७) इत्यनेन तकारस्याकारे दीर्घे विभक्तिकार्ये महाकाव्यमिति अत्र महत्वञ्च सर्गबन्धादियुक्तमेव तदुक्तं काव्यालङ्कारे आचार्यभामहेन—

सर्गबन्धो महाकाव्यं महताञ्च महच्च यत्।
अग्राम्य शब्दमर्थ्यञ्च सालङ्कारं सदाश्रयम्।।

(सा.द., ९)

अयं भावः—महतां चरितैर्युक्तं महत्ग्राम्यशब्दैर्रहितमर्थसौष्ठवेन युक्तमलङ्कारान्वितं सत्पुरुषाश्रितं सर्गबन्धः महाकाव्यम्।

मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्चयत् ।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्।।२०।।

अयं भावः—मन्त्रणा युक्तं दूतसम्प्रेषणान्वितं अभियानेनान्वितं नायकाभ्युदयेन सहितम् ऋद्धिपूर्णम् अर्थात् ऋतुसन्ध्यारात्रि-चन्द्रोदयविवाहसम्भोगजलक्रीडारतिपुत्रजन्मादिवर्णनेन सहितं क्लिष्टता रहितं पञ्चसन्धिसमन्वितं महाकाव्यम्।

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।।२।।

धर्मार्थकाममोक्षरूपस्य चतुर्वर्गस्य प्रतिपादनेऽपि अर्थस्य अर्थात लौकिकोत्कर्षस्य प्रधानतया वर्णनेन युक्तं लौकिकव्यवहारान्वितं एवं स्पष्टतया पृथक्-२ सर्वैर्रसैर्युक्तं महाकाव्यं भवति।

नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया।।२२।।

अयं भावः वंशबलज्ञानादिभिर्नायकस्योत्कर्षाभिधायान्य-स्योत्कर्षाभिधानार्थं तस्याभिभवो न कार्यः।

यदि काव्यशरीरस्य न सव्यापितयेष्यते
न चाभ्युदेयभाक्तस्य मुधादौ ग्रहणं स्तवे।।२३।।

अयं भावः—यदि काव्यशरीरे तस्य नायकस्य व्यापकता नेष्टा तर्हि आदौ प्रशसनं व्यर्थमेव।

विमर्शः—आचार्यभामहस्यैव प्रथमं महाकाव्यस्य लक्षणं कृतं तदनन्तरन्तु उत्तरवर्तिभिरलङ्कारशास्त्रमर्मज्ञैस्तस्य समुपबृहणं कृतम्। पञ्चसन्धिपदेन—मुखं प्रतिमुखं गर्भो विमर्शः उपसंहृति गृह्यते तदुक्तं साहित्य दर्पणकारेण—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते।

मुखसन्धेर्लक्षणम्

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम्।।

अयं भावः—यत्र = सन्धौ नाना = अनेकैः अर्थैं वृत्तान्तैः रसैःशृङ्गारादिभिश्च सम्भवः व्यजनं यस्याः सा नानार्थरससम्भवा। प्रारम्भेणसमायुक्ता = उत्साहरूपप्रारम्भावस्था युक्ता, तथा धान्यबीजवत् समुत्पत्तिर्भवति अर्थात् आदौ अङ्कुरितत्वमात्रेण प्रदर्शितं सत क्रमिकसहकारयोगेनोपचितं विविधावान्तरकार्याणि जनयति मुखमिव मुखसन्धिः।

प्रतिमुखसन्धे र्लक्षणम्

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्।।

अयं भावः—यत्र सन्धौ मुखसन्धौ निविशते उत्पत्या प्रवर्तते इति तस्य तथोक्तस्य फलस्य प्रधानोपायः मुख्यकारणं तस्य तथोक्तस्य

लक्ष्यालक्ष्य इव किञ्चिल्लक्ष्य इव उद्भेदः उद्देशः अनुरागरूप बीजस्य तत्प्रतिमुखं मुख्यस्याभिमुख्येन वर्तत इति प्रति मुखं तन्नामा सन्धिः।

गर्भसन्धेर्लक्षणम्

फलप्रधानोपायम्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः।।

अयं भावः—प्रागुद्भिन्नस्य पूर्वसन्धिद्वये किञ्चित् प्रकाशं नीतस्य मुखप्रतिमुखसन्धावुद्भिन्नस्येत्यर्थः। फले प्रधानप्रयोजने प्रधानोपायस्य मुख्यसाधनस्य यत्र सन्धौ मुहुर्वारं वारं ह्रासान्वेषणवान् तिरोभावानुसन्धानवान् समुद्भेदः अभिव्यक्तिर्भवति सा गर्भो गर्भनामा सन्धिः।

विमर्शसन्धेर्लक्षणम्ः

यत्र मुख्य फलोपाय उद्भिन्नो गर्भतोऽधिकः। शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः।

अयं भावः—यंत्र सन्धौ मुख्यफलस्यप्रधानफलस्य उपायःकारणम् गर्भतोऽधिकःगर्भसन्ध्यपेक्षयाधिकः उद्भिन्नः = प्रकाशितो भवति। गर्भसन्धौ किञ्चिदुद्भिन्नो ह्रासान्वेषणवांश्च उद्भेदः अत्र ततोऽधिकः ह्रासराहित्यादिति भावः। तथा शापाद्यैः आदिपदेन क्रोधभयदैवतव्यसनानां परिग्रहः, सान्तरायो विघ्नाश्लिष्टः सविमृश्यते पात्रैः कर्त्तव्यं विविच्यते अस्मिन्निति विमर्शस्तन्नामा सन्धिरिति स्मृतः।

उपसंहृतिसन्धेर्लक्षणम्ः

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्।।

अयं भावः—यथायथंयथानियमं विप्रकीर्णाः कविना यथास्थानमुपन्यस्ताः बीजवन्तः पूर्वोक्त लक्षणबीजार्थयुक्ताः मुखादयोऽर्थाः इति वृत्ति भागाः आदिपदेन प्रतिमुखगर्भविमर्शानां ग्रहणम्, यत्र सन्धौ एकार्थं केवलप्रधानप्रयोजननिमित्तम् उपनीयन्ते

केवलप्रधानप्रयोजनसाधनोपकरणभावं कविनैव उपस्थाप्यन्ते तत् हि निर्वहति प्रधानप्रयोजनं जायते अस्मिन्निति निर्वहणम् उपसंहारसन्धि र्निर्वहणम् उपसंहारसन्धिः उपसंहृतिरिति च पर्यायवाचका इति नार्थान्तरम्।

आचार्यस्य आकारविषये सीमा नास्ति केवलं महदित्युक्तं तदनन्तरं सीमाया निर्धारणं जातम् अष्ट सर्गात् न्यूनता न भवेत् अति सङ्क्षिप्तता निवारणार्थमेव महदित्युक्तम्, आचार्यसाहित्यदर्पणकारेण देवस्य क्षत्रियस्य वा नायकत्वेन स्वीकृतिः प्रदत्ता, इति स्वीकारे तु शङ्करदिग्विजयादौ महाकाव्यत्वं न स्यान् हिन्द्यामपि 'एकलव्य' नाम्नः काव्यस्य महाकाव्यत्वं न स्यात्, आचार्य भामहेन तु वर्णनीयं पात्रं महत् स्यात् तेन शंकर दिग्विजये वैष्णववैभवे च महाकाव्यत्वे नास्ति सन्देहः।

यद्यपि शब्दसौष्ठवमर्थरमणीयता अलङ्काराणां योजना अनतिव्याख्येयता रसाङ्गानि तथापि आचार्य स्याभिप्रायो यत्साधने त्रुटौ साध्येऽपि त्रुटिर्भवत्येव लोकस्वभावस्याभिप्रायः औचित्यम् लोकस्वभावौचित्यौ असम्भिन्नौ पृथक् कृत्वा अनयोदर्शनं दुष्करम्। लोक स्वभावोल्लङ्घने हि अनौचित्यम्, अनौचित्यन्तु रसभङ्गस्य कारणम्। अतएवध्वन्यालोककारेणो[४३]क्तम्—

रस अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्योपबन्धस्तु रसस्योपनिषत् परा।।

अभिप्रायोयत् रसनिष्पत्तौ औचित्यस्य निबन्धनं पराविद्या अर्थादौचित्यं रसस्यातिसन्निकटं वर्त्तते।

आचार्यभामहस्य दृष्टौ रसस्यावश्यतादृश्यकाव्यमिव श्रव्य-काव्येऽपि।

साहित्यदर्पणकारेण तु विस्तरेण महाकाव्यस्य लक्षणं कृतं तद्यथा—

सर्गबन्धो[४४] महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।

एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
जातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
सन्ध्यासूर्येन्दु रजनी प्रदोषध्वान्तवासराः।
प्रातर्मध्याह्नमृगया शैलर्तुवनसागराः।।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।
रणप्रयाणोपयम मन्त्रपुत्रोदयादयः।।
वर्णनीया यथायोग्यं साङ्गोपाङ्गा अभी इह।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।।

अयं भावः—सर्गैरवान्तरार्थवर्णनैरूपलक्षितो बन्धःरसवत्पद्यकदम्बविन्यासः विन्यस्तरसवत्पद्यकदम्ब इत्यर्थः, महाकाव्यम्।

तत्र महाकाव्ये-धीरोदात्तगुणान्वितः सुरोदेवता प्रकृतिः, एकमात्रो नायकः।

यथा—शिशुपालवधे-श्रीकृष्णः, कुमारसम्भवेकार्तिकेयो वा। अथवा धीरोदात्तगुणान्वितः सद्वंशः सत्कुलीन एकः क्षत्रियो नायकः यथा—नैषधे नलः। अपिना क्षत्रियेतरजातिरपि तथाविधो नायको भवितुं शक्नोतीति द्योतितम्। वा अथवा एकवंशभवाएक कुलोत्पन्ना

कुलजा कुलीना बहवोऽनेका अपि धीरोदातगुणान्विताभूपाः क्षत्रिया नायका भवितुं शक्नुवन्ति यथा रघुवंशे दिलीपादयः। शृङ्गारवीरशान्तानां मध्ये एकतमः अङ्गीमुख्यः। तत्र-नैषधे शृङ्गारः, शिशुपालवधे वीरः, महाभारते शान्तः। शृङ्गारवीरशन्तानामित्यत्र बहुवचनमुपलक्षणम्, तेन करुणस्यापि सङ्ग्रहः, ततश्च करुणप्रधानस्य रामायणस्य महाकाव्यत्वमक्षतम्। नाट्यसन्धयो मुख प्रतिमुखगर्भ-विमर्शनिर्वहणाख्याः पञ्चापि। इतिहासोद्भवं महाभारतादिप्रसिद्धम्। वृत्तं ज्ञानम् अन्यदितिहासोद्भवातिरिक्तं लोकप्रसिद्धमित्यर्थः। सज्जनाश्रयं-शिष्टपुरुषाचरणविषयं वृत्तम्। तस्य महाकाव्यस्य सम्बन्धिनश्चत्वारो वर्गाःधर्मार्थकाममोक्षा वर्णनीया इति शेषः। तेषु चतुर्वर्गेषु मध्ये एकं यत् किञ्चित् फलं प्रधानप्रयोजनं भवेत्, न पुनः द्वौ वा त्रयो वेति भावः। आदौ आरम्भे नमस्क्रियानमस्कारः यथा—रघुवंशे। आशीर्यथा—मुद्राराक्षसादौ वस्तुनिर्देशः यथा—किरातार्जुनीये शिशुपालवधादौच। क्वचिन्महाकाव्ये। खलानांपिशुनादीनां, यथा—धर्मशर्माभ्युदयादौ। अनेन खलादीनां निन्दायाः सतां गुणकीर्तनस्य चोत्कर्षमात्राधायकत्वं न पुनर्महाकाव्यलक्षणेआवश्यककर्त्तव्यमिति सूचितम्, अतएव क्वचिदनयोरसद्भावेऽपि न महाकाव्यत्वव्याघात इति ध्येयम्। एकवृत्तमयैः एक जातीयपद्यैः एकप्रकारकछन्दोबद्धैरित्यर्थः अवसानेसर्गान्ते अन्यानि वृत्तानिच्छन्दांसि येषां तैस्तथोक्तैः पद्यैर्विशिष्टाः। नाति स्वल्पाः पञ्चविंशतिपद्येनान्यूनाः तथा च भट्टिकाव्ये सप्तविंशतिपद्य घटितेऽपि न क्षतिः। नाति दीर्घाः शतत्रयाधिकपद्यरहिता इत्यर्थः। अष्टाधिका अष्टान्यूनाः। इह महाकाव्ये कविना विधातव्याइत्यर्थः। क्वापि महाकाव्ये कश्चन सर्गो नानावृत्तमयः अनेकविधच्छन्दोनिबद्धपद्यकदम्बसंयुतोदृश्यते। यथा शिशुपालवधे चतुर्थः सर्गः, किरातार्जुनीये पञ्चमः तथा च महाकाव्ये यत्र क्वचन एकमात्र एव स्वेच्छयैतादृशः सर्गः कविना निर्मातव्य इति मूलकर्तुरभिप्रायःसर्गान्तेअवसाने भाविनोऽप्यव्यवहितोत्तरवर्तिनः सर्गस्य कथाया उपाख्यानस्य सूचनं भवेत्। सन्ध्येत्यादिसागरान्तं स्पष्टम्। सम्भोगविप्रलम्भौ शृङ्गारौ वीरादिरसप्रधानेऽपि महाकाव्ये

वर्णनीयावित्यर्थः, एतादृशार्थाकरणे एतदुक्तेः सार्थक्यं न स्यादिति मन्तव्यम्। मुनिर्नारदादिः। अध्वरोयज्ञः रणःसङ्ग्रामः प्रयाणंकेवलं- यात्रा, उपयमो विवाहःमन्त्र उपायचतुष्टयमन्त्रणा पुत्रस्य उदयोजन्म, अपत्यमात्रार्थे उपलक्षणञ्चैतत्। आदिपदात् नृपामात्यसेनापतिप्रभृतयश्च। अमी साङ्गोपाङ्गविवरणोक्ताः यद्वा सन्ध्यासूर्येन्द्वादयः पुत्र जन्मान्ताः। तत्र सन्ध्याङ्गम् चक्रवाकविरहः। वासराङ्गम्-जलकेल्यादिः। राजन्यङ्गम् मधुपानादिः। उपाङ्गं तत्रैव परिहासादयः कामिन्योऽभिसारिकादयश्च यथायोगं यथा सम्भवं वर्णनीयाः। एतेन येन केनाप्यङ्गेन हीनमपि काव्यं न दुष्टमिति भावः। वृत्तस्य वर्णनीयचरित्रस्य। नाम्ना इत्यभेदे तृतीया। तेन कवेर्नाम्ना कवीनामैकानुपूर्वीकमित्यर्थः। अस्य महाकव्यस्य नाम कथनीयम्। अन्यत्राप्येवमेव। तत्र कविनामकं महाकाव्यं माघभारविप्रभृतिः। वृत्तंनामकं कुमारसम्भवकीचकवधादि। नायकनामकं रघुप्रभृतिः। अस्यवंशचरितशब्दपर्यन्तव्यपदेशे तु वृत्तनामत्वं बोध्यम्। इतरनामकं भट्टिप्रभृति। सर्गस्य नाम तु सर्गे उपादेया वर्णनीया या कथा उपाख्यानं तया तथोक्त्या वक्तव्यम्। यथा—'सन्ध्यावर्णनं नाम दशम सर्गः'। इति। यथा च गीतगोविन्दे प्रथमद्वितीयादि सर्गाणां सामोद-दामोदर-अक्लेश-केशवादि नाम्ना व्यवहारः।

विमर्शः–

महाकाव्ये निम्नलिखितां यथोचितं वर्णनमावश्यकं कर्तव्यम् - तथाहि-राज्ञः वर्णने कीर्तिः प्रतापः दुष्टशास्तिः विवेकता, धर्म्मः यात्रा, सङ्ग्रामः शास्त्राभ्यासः नीतिनिपुणता, प्रजानुरागः अरिशैलादिवासः, शत्रुपुरशून्यता, औदार्य्यम्, धैर्यम्, गम्भीर्यम् गुणानां वर्णनम्, रूपस्यवर्णनम् दानादीनाञ्च वर्णनमावश्यकम्।

महाराज्ञी वर्णने

सौभाग्यम्, लावण्यम्, शीलम् शृङ्गारः मन्मथः, लज्जा, चातुर्यम दाक्षिण्यम्, स्नेहः, मानम्, व्रतादिः, वेणी लोके तु 'गुथे हुये बाल', 'इति कथयन्ति जनाः। धम्मिलः = लोके तु 'अलङ्कृत जूडा' इति

कथयन्ति सीमन्तः, लोके तु शिरसः विभाजन रेखायां प्रसिद्धिरस्ति, भालः, श्रवणनासिकादेर्वर्णनमावश्यकम्।

महामात्यवर्णने

नयः, शास्त्रम्, धैर्यम्, बुद्धिः गम्भीरता, शक्तिः, अलोभत्वम् जनरागः विवेकता एतेषां वर्णनमावश्यकम्।

मन्त्रिवर्णने

भक्तः शुचिः, शूरः अनुद्धतः बुद्धिमान् क्षमी, आनवीक्षिक्यादिकुशलः, परिच्छेदः = अर्थात् यथार्थरूपेण निर्णयकर्ता, सुदेशजः, एषां वर्णनमावश्यकम्।

पुरोहितवर्णने

हितः वेदस्मृतिज्ञः सत्यवाक् शुचिः, ब्राह्मण्यः आपत्तीनां प्रतिकर्ता ऋजुः एतेषां वर्णनमावश्यकम्।

कुमारवर्णने

शस्त्रम् शास्त्रम्, श्रीः, कला गुणोन्नतिः धनुर्विद्यादिशिक्षा राजभक्तिः सुभगतोदयः, एतेषां वर्णनमावश्यकम्।

सेनापतिवर्णने

जितायासः स्वामिभक्तः, सुधीरभीः एतेषां वर्णनमावश्यकम्।

देशवर्णने

रत्नखनिः, द्रव्यम्, पण्यम्, धान्याकारोद्भवाः, दुर्गग्रामजनाधिक्यनदीमातृकादयः शस्त्रे शास्त्रे अभ्यासः रणे विजयः एतेषां वर्णनभावश्यकम्।

ग्रामवर्णने

धान्यम् लता सरसी पशुपुष्टिः क्षेत्रारघट्ट केदारग्रामेयी मुग्धविभ्रमाः। एतेषां वर्णनभावश्यकम्।

पुरवर्णने

अट्टालिका[४५], परिखा, वप्रयः, प्रतोली तोरणम्, ध्वजा, प्रासादः अध्वा प्रपा आरामः वापी, वेश्या, सती, औत्सुक्येन कृतत्वरास्तेषां वर्णनमावश्यकम्।

सरस्यम्भो-लहर्यम्भो-वाजाद्यम्बुज-षट्पदाः।
हंसचक्रादयस्तीरोद्यानः स्त्रीपान्थकेलयः।
अब्धौ-द्वीपाद्रि-रत्नोर्मि-पोत-यादोजलप्लवाः।
विष्णुः कुल्यागमश्चन्द्राद् वृद्धिरौर्वोऽब्दपूरणम्।।
सरित्यम्वुधि-यायित्वं वीच्यो जलगजादयः।
पद्मानि षट्पदा हंसचक्राद्याः कूल शाखिनः।

उद्याने-सरणिः सर्वफलपुष्पलताद्रुमाः। पिकालिकेलि हंसाद्याः क्रीडावाप्यध्वगस्थितिः।

शैले-मेघौषधीधातुवंशकिन्नर-निर्झटाः। शृङ्ग-पाद-गुहा-रत्न-वन-जीवाद्युपत्यकाः।

अरण्ये-ऽहिवराहेभयूथा सिंहादयोद्रुमाः। शुककाककपोताद्या झिल्लभल्लदवाद्रयः।।

आश्रमे-ऽतिथिपूजैणविश्वासो हिंस्रशान्तता। यज्ञधूमो मुनिसुताद्रुसेको वल्कलद्रुमाः।

मन्त्रे-पञ्चाङ्गताशक्तिः षाड्गुण्योपायसिद्धयः। उपायाचिन्तनीयाश्च स्थैर्योन्नत्यादिसूक्तयः।

दूते-स्व-स्वामि-तेजः श्रीविक्रमौन्नत्यकृद्वचः। शत्रुक्षोभकरी चेष्टा धार्ष्ट्यं दाक्ष्यमभीरुता।

युद्धे-तु वर्मबलचार-रजोसितूर्य-निस्वाननादशर-मण्डपरक्तनद्यः।
छिन्नातपत्ररथचामरकेतुकुम्भिमुक्ताः सुरावृतभटाः सुर पुष्पवृष्टिः।।

प्रयाणे-भेरिनिस्वानभूकम्पबलधूलयः।
करमोक्षध्वजच्छत्रवणिक्-शकटकेशराः।।
मृगयायां-स्वसञ्चारी वागुरा नीलवेषता।
भटढक्का मृगत्रासः सिंहयुद्धं त्वरा गतिः।।

अश्वे योगित्वमौन्नत्यं तेजः सल्लक्षणस्थितिः। खुरोत्खातरजोरूपं जातिर्गतिविचित्रता।

गजे सहस्रायोधित्वमुच्चत्वं कर्णचापलम्। अरिव्यूहविभेदित्वं कुम्भमुक्तामदालिनः।

सुरभौ दोला-कोकिल-मारुत-सूर्य-गति तरुदलोद्भेदाः। जातीतरपुष्पचयाभ्रमञ्जरी भ्रमरझङ्काराः।

ग्रीष्मे पाटलमल्ली तापः सरः पथिकशोषवातोल्काः। सक्तुप्रपा=प्रपास्त्री मृगतृष्णाम्रादिफलपाकाः।।

वर्षासु मेघहलिकेतक निम्नगानां झञ्झानिलस्य शिखिजातिकदम्बकानाम्।

प्रीतिश्च हंसगमनं नलिनीलतानां पत्रोद्भवोऽर्कलतिकादल-पातनाद्याः।

शरदि सूर्यसुधाकरपाटवं विमलताम्भसि हंसवृषस्मयाः। कमलशारदसैकतविस्तृतिः सुशिखि पक्षमदापगमादयः।

हेमन्ते रजनीदैर्घ्यं नलिनी कुमुदक्षतिः। दिनाल्पत्वं हिमप्रौढिवकानन्दयवोद्भवाः।।

शिशिरे वेणुकुन्दाब्जदाहः शिखिरतोत्सवाः।

सूर्येऽरूणतारविमणिचक्राम्बुजपथिकलोचनप्रीतिः।

तारेन्दुदीपकौषधिधूकतमश्चौर कुमुदकुलटार्तिः।।

चन्द्रे कुलटा-चक्राम्बुजमानविरहितमोहानिरौज्ज्वल्यम्। जलधि-जलनेत्रकैरवचकोर-चन्द्राश्मदम्पति प्रीतिः।

विवाहे मङ्गलस्नानं भूषणं कामिनीरवः। वेदी सङ्गीततादीक्षा लाजा होमद्विजादयः।

विरहे जागरश्वास निशादैर्घ्यकृशाङ्गता:।

सन्तापचिन्ता मालिन्यमौनरक्ताक्षतादयः।।

स्वयंवरे सतीपूजावाद्यघोषनृपागमा:।

राजपुत्र्या नृपाकारान्वयचेष्टा प्रकाशनम्।।

सुरापाने गतिवचः स्खलनं नयनभ्रमः।

लज्जामानच्युतिश्चितभ्रमर रक्ताक्षतादयः।।

पुष्पावचये पुष्पावचयः पुष्पार्पणेऽर्थिता दयिते। मालाद्यं गोत्रस्खलनेर्ष्यावक्रोक्तिसम्भ्रमाश्लेषः।

जलकेलौ जलक्षोभश्चक्रहंसापसर्पणम्।

पद्मग्लानिः पयोबिन्दुर्दृग्रागो भूषणच्युतिः।।

सुरते स्वेदकणिका शीत्कारो भूषणच्युतिः। मञ्जीर-कङ्कणारावनखदन्तक्षतादयः।।

प्रातः कोकाम्बुजोत्कर्षौ मध्याह्ने ताप संप्लवः।

सायं सूर्यादिलौहित्यं चक्रपद्मादि विप्लवः।।

अन्धकारेऽतिसान्द्रत्वं विश्वलोपसमर्थता। आकस्मिकसमारम्भो निःशङ्कमभिसारिका:।।

इत्थमेते वर्णनीयाः प्रबन्धेषु यथोचितम्।।

।। **इतिशम्** ।।

卐

ङ. वैष्णववैभवस्यमहाकाव्यत्वम्:

शान्तभक्तिरसेन परिपूर्णं श्लेषादिनानालङ्कारयुतं वसन्ततिलकादिनानाछन्दोभिर्विशिष्टं नवसर्गात्मकं वैष्णववैभवमहाकाव्यम् महाकाव्यकोटौ विराजते।

इदं महाकाव्यं सहृदयाञ् चमत्करोति। कविकुलशिरोमणिना महाक[४६]विना कालिदासेन न्यायसङ्गतं लिखितम्—

पुराण[४७] मित्येव न साधुसर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेय बुद्धिः।।

विद्वांसः गुणदोषान् विचार्य गुणयुक्तं स्वीकुर्वन्ति।

इदं विचार्यते 'रसः कः' तत्र काव्यप्रकाशकारेण श्री मम्मटाचार्येणोक्तम्—

विभावा[४८] अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः सतैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।

उक्तं हि भरतेन—

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः।

तत्—तदा (क्रमेण) विभावा अनुभावा व्यभिचारिणः कथ्यन्ते इत्यन्वयः, कारणानि विभावाः, कार्याणि अनुभावा इति, सहकारीणि व्यभिचारिण इति। कथ्यन्ते रसज्ञैः।

वासना रूपतयातिसूक्ष्मरूपेणावस्थितान् रत्यादीन् स्थायिनः विभावयन्ति आस्वादयोग्तां नयन्तीति विभावाः।

रत्यादीन् स्थायिन अनुभावयन्ति अनुभव विषयी कुर्वन्तीति अनुभावाः। विशेषेणाभितः (सर्वाङ्गव्यापित्तया) रत्यादीन् स्थायिनः कार्ये चारयन्ति सञ्चारयन्ति मुहुर्मुहुरभिव्यञ्जयन्तीति वा व्यभिचारिणः।

तैर्विभावाद्यैर्व्यक्तः—व्यञ्जनाख्यवृत्याप्रतिपादितः सम्प्रक्रंस्यमानः स्थायी—अविच्छिन्नप्रवाहो भाव—अनुभूतिरूपोरसः स्मृतः। शृङ्गार-हास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्तरसेषु मध्ये केचन कवयः शृङ्गारस्य प्राधान्यं वदन्ति यथा शृङ्गारप्रकाशे भोजराजेनोक्तम्—

शृङ्गार-वीर-करुणाद्भुत-रौद्र हास्य
वीभत्स-वत्सल-भयानक-शान्त-नाम्नः।
आम्नासिषुर्दशरसान् सुधियो वयं तु
शृङ्गारमेव रसनाद् रसमामनामः।।

साहित्यदर्पणकारः—अद्भुतस्य प्राधान्यं कथयति। यथा—

रसे सार श्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वात् सर्वत्राप्यद्भुतो रसः।।

तस्मादद्भुतमेवाह कृती नारायणो रसम्। किन्तु—अभिनव गुप्तेन—अभिनवभारत्यां स्पष्टमुक्तम् स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।

पुनः निमित्तापाये च शान्त एवोपलीयते।।

अतः वैष्णववैभवमहाकाव्यकर्तृणा शान्तरसमाधारीकृत्य काव्यस्य निर्माणं कृतम्।

शान्तरसस्य निर्वेदस्थायिभावोस्ति यथा वैष्णववैभवे कविनोक्तम्—

ततस्तु निर्वेदसमाकुलोऽसौ
ध्रुवं प्रतिज्ञाय चिरं स तस्थौ।
नाङ्गीकरिष्यत्यथ मत्त्सपर्यां
नान्नं ग्रहीष्याम्यमुतः परस्तात्।।

शान्तरसस्य विभवादि विषये रसतरङ्गिण्यामाचार्येण भानुदत्तमिश्रेणोक्तम्—निर्वेदस्य[१] परिपोषः शान्तो रसः दोष-प्रशमोवा

दोषाः काम क्रोधादयः। अस्य विषयदोषविचारविरक्तादयो विभावाः। अनुभावा आनन्दाश्रुपुलक गद्गद् वचनादयः।

वैष्णववैभवे कविनोक्तम्-

प्रारब्ध[४९] - कर्म - परिलब्धशरीर - भाजो
भूयो विधाय मनुनाविहितं स्वकर्म।
पश्चात् सकाममतयोऽपि विहाय रागं
निष्काम कर्मरतयोऽतितरां भवेयुः।।१९।।

निष्कामसौम्यमतयोऽत्यधिकारिणो ये
ते भक्तिमार्गममलं सततं भजन्ते।
तत्रापि नो निजकृते प्रभवेत् कदाचिद्
इच्छाऽपि सर्वमपि तत् भगवत्कृते हि।।२०।।

एषा पुनर्निगदिता मुनिभिस्तु शुद्धा
भक्तिः प्रमथ्य निगमागमसिन्धुमेभिः।
आस्वादनैक निरतैर्भगवत्स्वरूपैः
द्वैतश्रितैर्निजधियाऽद्वयतां निरस्य।।२१।

शान्तरसस्य स्थायिभावादि विषये साहित्यदर्पणकारेण श्री विश्वनाथ कविराजेनोक्तम्।

शान्तः शमस्थायि भाव उत्तमप्रकृतिमतः।।२४५।।
कुन्देन्दु सुन्दरच्छायः श्री नारायणदैवतः।
अनित्यत्वादिना शेष वस्तुनिःसारता तु या।।२४६।।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।
पुण्याश्रमहरिक्षेत्र तीर्थरम्य वनादयः।।२४७।।
महापुरुषसङ्गद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः।।२४८।।

निर्वेदहर्षस्मरणमतिभूतदयादयः ।
शान्तरसस्य दृष्टिगोचरता प्रति सर्गे विद्यते।।

किन्तु द्वितीयसर्गस्योदाहरणत्वेन कानिचित् पद्यानि प्रस्तूयन्ते। तद्यथा—

हंहो कराल-कलिकाल इहास्ति नूनं
द्रंष्टाकुलैः कवलयत्यथ कालकालः।
कालानुसारमुत कीलितकेलि-जन्तून्
उद्धारयेदनुदिनं महतां प्रयासः।।४७।।

कालस्य तस्य च कलेरयमेव नूनं
भूयो विभाति भुवने गुण एव मान्यः।
श्री - विष्णुपाद - कमलद्वयशुद्धभक्तिः
सन्तारयेत्सपदि संसृतितः समन्तात्।।४८।।

कीलत्कश्मलकोटिकोटि - कलनाकालुष्यकीटोत्कटत्
कालोत्कीलनकूटकूटकठिनाकाट्यक्रुधत्किल्विषैः ।
सङ्कीर्णः कलिकाल एष च महाकालाऽऽननैकाऽनलाद्
जिह्वेयं प्रसरीसरीति सततं भक्तिस्ततः श्रीयताम्।।४९।।

वैष्णवा भक्तिरसंस्वीकुर्वन्ति अतएव भक्तिरसामृतसिन्धुकारेण आचार्यप्रवरेण रूपगोस्वामिना उक्तम्—

विभावैरनुभावैश्च[५०] सात्त्विकैर्व्यभिचारिभिः।
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः।
एषा कृष्णरतिः स्थायिभावो भक्ति रसो भवेत्।।

तदनुसारेण इष्टदेवः श्री कृष्णो वा आलम्वनं विभावः, भक्तः आश्रयः, भगवद्गुणश्रवणकीर्तनादि चेष्टा उद्दीपनविभावः सात्विकभावस्तथा निर्वेदादिः सञ्चारी भावः।

इष्टदेवस्य सपर्या तद्यथा—वैष्णववैभवस्य चतुर्थसर्गे—

धूपैश्च दीपैश्च सुगन्धमाल्यैः
दूर्वाङ्कुरप्राञ्जल शोभितैश्च।
पोस्फुटयमानाम्बुजसञ्चयैस्तैः ।
सर्वेश्वरं सर्वहिताय भेजे।।१९।।

इदं काव्यं शान्तरसेन भक्ति रसेन च परिपूर्णमतः शान्तरसप्रधानता युतमिदं काव्यं मनुते।

अलङ्कारादिभिर्युत[५१] मिदं महाकाव्यम्।

यथा—प्रथमसर्गस्य प्रथमपद्ये कविनोक्तम्—

'विष्णोः पदद्वयमहो ननु नन्नमीमि'।
अत्र विष्णु पदेन भगवतो विष्णोर्ग्रहणं।।

तथा विष्णुस्वामिनोपि ग्रहणम्। अत्र श्लेषालङ्कारः

षष्ठ सर्गस्य द्वितीयपद्ये वक्रोत्यलङ्कारः

यथा—ते वैष्णवा निरूपमा नहि कस्य वन्द्याः।

षष्ठ सर्गस्य तृतीयपद्ये यमकालङ्कारः। यथा—

सद्यस्तरां त्रिजगती व्रततीततीषु।।

यथेदम्महाकाव्यमनेकैरलङ्कारैर्युतम् तथेदं महाकाव्यं वसन्त-तिलका, मालिनी, शार्दूल, विक्रीडितेन्द्र वज्रोपेन्द्र वक्रोपजाति मन्दाक्रान्ता शालिनीत्याद्यनेकैर्छन्दोभिर्युतम् अस्मिन् काव्ये भगवदवतारः श्रीविष्णुस्वामी उत्तमनायकः।

विमर्शः

इदं काव्यं नवसर्गात्मकं तथा च सर्गबन्धता विद्यते महतां विष्णुस्वामिनां चरितैर्युतमथसौष्ठवयुक्तमलङ्कारै र्विशिष्टं प्रधानतया शान्तरसेन भक्तिरसेन च परिपूर्णमतो वैष्णववैभवस्य महाकाव्यत्वमस्ति विचारयन्तु कवयः।

वैष्णववैभवमहाकाव्यस्य श्रीमद्विष्णुस्वामि सम्प्रदायदृष्ट्या पर्यालोचने प्रथमपरिच्छेदः परिपूर्णः।।

卐

१. सि.कौं.उ.प्र. ४ पा. १३० सू.।
२. त्रिकाण्डको. ४१४३
३. अग्निपु. ३३९.१०.११।
४. सि.कौ. भ्वा. २१-२४।
५. शु. य. सं. ४०.८।
६. कहावत रत्नाकर पृ. १५।
७. श्रीमदभागवत प्र.स्क.अ. १. श्लो.।
८. श्रीध.भा. प्र. स्क. १२ श्लो.।
९. सिद्धा. कौ. भा.क.प्र.।
१०. काव्यमीमांसा प्र.अ.।
११. काव्यलङ्कारस्यपञ्चम श्लोकस्य देवेन्द्रशर्मण। कृते भा. नृ. ३।
१२. काव्य मीमांसा प्र. अ।
१३. का.मी. ६ अ.।
१४. काव्य प्र. प्र. उ. ३।
१५. व्युत्पत्ति का. प्र. पृ. २९ जयास्य व्याख्या सहितः।
१६. सि.कौ. परस्मैपदप्र.।
१७. का.प्र.व्या.बा.बो., पृ. १३।
१८. अग्निपु. ३३७ अ. ६.२ श्लो.।
१९. काव्यालङ्कारे पृ. ९ प्रकाशकः बिहार राष्ट्र भाषा परि...।
२०. त.सं.म्या.बो. ५० सं. १४ सत्कारिशर्मणा बङ्गीयेन सम्पादितः चौ.सं.सी.वा. १९६९।
२१. काव्यप्रकाशे सू. १।
२२. वा.प.द्वि.का. ३१५-३१७।
२३. परम लघुमञ्जूषा निपातार्थनिर्णयः पृ. ८२।
२४. पाणि अ. जयकृष्णदास हरिदास गुप्तः।
२५. प्रौढमनोरमा संज्ञाप्रकरणम्, पृ.सं. ६५।
२६. काव्यप्रकाशः।
२७. १.१.६८ पा.अ.।
२८. १.१.२१ पा.अ.।
२९. वक्रोक्ति जीवितम् प्रथमोन्मेष श्लो. ६, पृ. १५।
३०. न्या. कोश, पृ. १००६।

३१. चन्द्रलोक प्रथम।
३२. र.ग.प्र.आ.।
३३. सा.द.प. १५३।
३४. अग्नि पु. ३४५ अ. १.२ श्लो.।
३५. का.अ.सू.बृ.।
३६. काव्या सू. गृ. द्वि १२।
३७. र.गा.हि. ३०, पृ. ९४।
३८. र.ग.हि. ३०, पृ. ९४।
३९. र.ग.हि. ३०, पृ. १०१।
४०. वृत्तर. पदि.अ. १८।
४१. अग्निपुराण, अ. ३३७।
४२. ध्वन्यालोक तृतीय उद्योते पृ. ८१।
४३. ध्वन्यालोके तृतीये उद्योते पृ. १००।
४४. साहित्यदर्पणे ३१५.३२४।
४५. साहित्यदर्पणस्यषष्ठपरिच्छेदे टिप्पण्याम् पृ.सं. ४७३।
४६. लक्ष्मीव्याख्या विभूषिते साहित्य दर्पण टिप्पण्याम्।
४७. मालवकाग्निमित्रम् प्रथमोङ्कः प्र. श्लो. २।
४८. च. उल्लासः २८ सूत्रम्।
४९. पृ. ४८, प्रकाशकः श्रीद्वारकादासगुजराती हिन्दी साहित्य कुबेर हाथीगली वाराणसी।
५०. हरिभक्तिरसामृतसिन्धुः विभावलहरी पृ. १२०, प्रकाशनस्थानम्-अच्युतग्रन्थमाला।
५१. रस तरङ्गिणी, पृ. ४८१।

卐

अथ द्वितीयपरिच्छेदः

क. विष्णुस्वामिसम्प्रदायपरिचयः

सम्प्रदानं सम्प्रदायः सम् + प्र + पूर्वकाद् दा धातोः भावे घञ् प्रत्यये युगागमे कृते विभक्ति कार्ये च कृते सम्प्रदाय इत्यस्य साधुत्वं भवति। धातूनामनेकार्थत्वादत्र गुरुपरम्परागतसदुपदेशस्य सम्प्रदाय-शब्देन ग्रहणं भवति।

अतएव आद्यशङ्कराचार्येण वृहदारण्यकोपनिषद् भाष्ये लिखितम्।

'ॐ नमो ब्रह्मा'दिभ्यो ब्रह्मविद्या सम्प्रदायकर्तृभ्योवंश ऋषिभ्यो गुरुभ्य इति। ब्रह्मविद्यासम्प्रदाय यथा—तत्रैवोपनिषदि—अथ वंशः। पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात् कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः।।१।। आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानाभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद् गौतमः सैतवप्राचीनयोग्याभ्याँ सैतवप्राचीनयोग्यौ पराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिः।।२।।

घृतकौशिकाद् घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपन-जन्धनेरौपजन्धनिरासुरेरासुरि भरिद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद् गौतमो गौतमाद् गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यःकाप्यः कुमारहारितात् कुमारहारितोगालवाद् गालवो विदर्भीकौण्डिन्याद्विदर्भी कौण्डिन्यो वत्सनपातो वाभ्रवाद्वत्सनपाद्वाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादङ्गिरसादयास्य आङ्गिरस आभूते स्त्वाष्टादाभूतिस्त्वाष्ट्रो

विश्वरूपत्वाष्टाद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्द-ध्यङ्ङार्थवणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसमान् मृत्युः प्राध्व=सनः=प्रध्व=सनात्प्रध्व=सन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचितिर्व्यष्टेः, यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः।

आचार्य[२]प्रवरेण भावार्थदीपिकायां श्रीधरस्वानिनोक्तम्-द्वेधा हि श्रीमद्भागवतसम्प्रदायप्रवृत्तिः एकतः संक्षेपतः श्रीनारायणब्रह्मनारादादि-द्वारेण अन्यतस्तु विस्तरतः शेषसनत्कुमारसांख्यायनादिद्वारेण। वेदार्थ[३] पारिजाते यतिचक्रचूडामणिभिः परमगुरुचरणैः श्री १००८ करपात्र स्वामिभिरुक्तम् वेदे ब्रह्मादित्यसम्प्रदायभेदेन सम्प्रदायद्वैविध्यम्। विष्णुः शङ्खासुरापरनामानं हयग्रीवं हत्वा तदपहृतान् वेदांस्तत आहृत्य ब्रह्मणे प्रददौ। ब्रह्मा च द्वेधा विभज्य तमेकं भागमादित्ये निहितवान्। अपरं च भागं वशिष्ठाङ्गिरोमरीच्यत्रिप्रभृतिभ्योऽध्ययनविधिना प्रायच्छत्। तेऽपि स्वपुत्रशिष्यादिभ्यः प्रायच्छन्। द्वापरान्ते भगवान् व्यासोऽल्प-शक्तीनल्पमेधसोऽल्पायुषश्च जनाननुजिधृक्षुर्वेदमेकमृग्यजुः सामाथर्व-भेदेन चतुर्धा व्यस्य क्रमात् पैल-वैशम्पायनजैमिनिसुमन्तून-ध्यापयामास पैलादयोऽपि शाखाप्रभेदादिना तेषां शिष्यपरम्परया भेदं कृतवन्तः। योगीश्वरो याज्ञवल्क्योऽस्मिन्नेव सम्प्रदाये विदग्धशाकल्या-दृग्वेदमधीतवान्। केनचित् कारणेन गुरुणा सह विवदमानस्ततोऽधीतं तत्याज। ततः स्वमातामहं महर्षि वैशम्पायनमुपेत्य यजुर्वेदमधीतवान्। तेनापि दुर्दैवात् कलहे तदपि त्यक्तवान्। ततस्तपसा त्रयीमयं भगवन्तमादित्यमाराध्य सन्तोष्य तस्माच्चतुरोवेदानधीतवान्। ताँश्च शाखा प्रशाखादिभेदेन परम्परया विततान।

स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः।
कर्णेऽपठत्ततो वेदाश्चतुरोऽपि च तन्मुखात्।

(स्कान्दे नागरखण्डे २७८)

'इत्युक्तो भगवान् सूर्यो याज्ञवल्क्यं महामुनिम्. वेदान् षडङ्गसहितान् रहस्यादिसमन्वितान्। चतुरोऽध्यापयामास स्थापयित्वा

निजे रथे। (आत्मपुराणे ७.३८.४०) 'अथ याज्ञवल्क्यः स्वयमेव ब्रह्मचारिणमुवाच ता गाः सौम्योदज सामश्रवा इति ता उदाजहार (२१० वृहदारण्यके) एवं वेदचतुष्ट्यानां सम्प्रदायभेदेन द्वैविध्यं वेदे। विष्णुस्वामि सम्प्रदायोऽति प्राचीनः पद्मपुराणे रुद्रसम्प्रदायप्रवर्तको विष्णुस्वामीति भारतीय दर्शनस्य ४१३ पृष्ठे लिखितः पद्मभूषणाचार्य बलदेवोपाध्यायेन तत्रतेन कृता टिप्पणी वर्त्तते—चार वैष्णव सम्प्रदाय।

रामानुजं[४] श्रीः रामानन्दं स्वीचक्रे मध्वाचार्यं चतुर्मुखः।
श्री विष्णुस्वामिनं रूद्रो निम्बादित्यं चतुः सनः।।

(पद्म पुराण)

३५-भक्तमाल में विष्णुस्वामी[५]—

नाम तिलोचन शिष्य सूर शशि सदृश उजागर।
गिरा गंग उन हारि काव्य रचना प्रेमाकर।।
आचारज हरिदास अतुल बल आनन्द दाइन।
तिहि मारग वल्लभ विदित पृथु पथित पराइन
नवधा प्रधान सेवा सुहृद मन वच क्रम हरिचरण इति।
विष्णुस्वामिसम्प्रदाय दृढ़ ज्ञानदेव गम्भीर मति।।

भाव दीपिकायां श्री मद्भागवतस्य प्रथमस्कन्धस्य

सप्तमाध्यायस्य षष्ठश्लोककस्य व्याख्यां कुर्वताआचार्यप्रवरेण श्रीधरस्वामि[६]नोक्तम्—

'विद्याशक्त्या मायानियन्ता नित्याविर्भूतपरमानन्दस्वरूपः सर्वशक्तीश्वरस्तन्मायया सम्मोहितस्तिरो भूतस्वरूपस्तद् विपरीतधर्मा जीवः तस्यचेश्वरभक्त्या लब्धज्ञानेन मोक्षः इति तदुक्तं विष्णुस्वामिना—'ह्लादिन्या संविदाश्लिष्टः' सच्चिदानन्दईश्वरः। स्वाविद्या संवृतो जीवः संक्लेश निकराकरः। तथा स ईशो यद्वशे माया सजीवो यस्तयार्दितः। स्वाविर्भूतपरानन्दः स्वाविर्मूत सुदुःखभूः स्वादृगुत्यविपर्यास भव भेदजभीशुचः यन्मायया जुषन्नास्तेतमिमं नृहरिं

नुमः इत्यादि। सर्व° दर्शन संग्रहे रसेश्वरप्रतिपादयता श्रीमत्सायणमाधवेनोक्तम्—विष्णुस्वामिमतानुसारिभिनृपञ्चास्य शरीरस्य नित्यत्वोपपादनात् तदुक्तं साकारसिद्धौ—सच्चिन्नित्यनिजाचिन्त्य पूर्णानन्दकविग्रहम् **नृपञ्चास्यमहं** वन्दे श्री विष्णुस्वामिसम्मतम्। नन्वेतत्सावयवं रूपवदवभासमानं नृकण्ठीरवाङ्ग-सदिति न संगच्छते इत्यादिनाऽक्षेपपुरः सरं सनकादि प्रत्यक्षं सहस्रशीर्षापुरुषः। (श्वे. ३.३४, इत्यादि श्रुतिः)

तमद्भुतं बालकम्बुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधम् (भा.द.पू. ३.९)

इत्यादि पुराणलक्षणेन प्रमाणत्रयेण सिद्धं नृपञ्चान-नाङ्गकथमसत्स्यादिति सदादीनिबिशेषणानि श्रीकान्त मिश्रैर्विष्णु स्वामिचरणपवित्रान्तःकरणैः प्रतिपादितानि।

इत्यंनेन सिद्धं यद् श्री विष्णुस्वामी अतिप्राचीन उल्लेखनीय आचार्यः।

एभिराचार्यप्रवरैः शुद्धाद्वैतसिद्धान्तस्य गुरुशिष्यपरम्परया प्रचारः कृतः शुद्धञ्च तदद्वैतं शुद्धाद्वैतम् ब्रह्मकार्यकारणोभयरूपेण शुद्धमस्ति तत्तु नास्ति मायोपहितम् माया सम्बन्धरहित्वार्देवास्ति तस्य शुद्धत्वम्। षष्ठी तत्पुरुषे तु शुद्धयोः (जगज्जीवयोः ब्रह्मणः) अद्वैतम् (अभिन्नत्वम्)—

शुद्धाद्वैतपदे ज्ञेयःसमासः कर्मधारयः।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधः
माया सम्बन्धरहितं शुद्धमित्युच्यते बुधैः
कार्यकारणं रूपं हि शुद्धं ब्रह्म न मायिकम्।।

(शुद्धाद्वैत मार्तण्डः २९.२८)

सकलाचार्यमतसंग्रहे श्री निवासेनोक्तं श्री विष्णुस्वामी शुद्धाद्वैतमतस्य प्रतिपादकः।

श्री मन्नारायण एव ज्ञानस्य भक्तेश्च मूलस्त्रोतस्तस्मादेवास्य सम्प्रदायस्याविर्भावः।

गोपीपतिंसमारम्भां श्रीविष्णुस्वामिमध्यमाम्।
श्रीमदाचार्यपर्यन्तां स्तुमः गुरुपरम्पराम्।।

आचार्यपरम्परा

भगवान् श्रीकृष्ण आचार्यस्येष्टदेवः अस्ति।

१. भगवान् श्रीकृष्णः

आनन्दकन्दपरात्परं ब्रह्म पुरुषोत्तमो भगवान् श्रीकृष्णचन्द्रः श्रीधामवृन्दावने गोपरूपेण आविर्भूतः। श्रीकृष्णोपनिषदि उक्तवचनं स्पष्टीकृतम्—गोपरूपो हरिः साक्षान्माया विग्रहधारणः। भगवतः[८]श्रीकृष्णस्य मायया जगन्मोहितम्—दुर्बोधं कुहकं तस्य भायया मोहितं जगत्। श्रीकृष्णोपनिषदि[९] स्पष्टतयोक्तं यद् भगवान् श्रीकृष्णः स्वशाश्वतब्रह्म शेषनागो भवेद्रामः कृष्णो ब्रह्मैव शाश्वतम्।

श्री मद्भागवतेऽपि[१०] उल्लिखितम् श्रीकृष्णः स्वयं वसुदेवगृहे आगतवान्।

वासुदेवगृहे साक्षाद्[११] भगवान् पुरुषः परः।

यदुवंशे भगवान् श्रीकृष्ण अवतीर्णः। श्रीमद्भागवते उक्तमपि—अवतीर्य[१२] यदोर्वंशे भगवान् भूतभावनः। श्रीकृष्णस्य अग्रजभ्राता बलरामः यः खलु रोहिणी नन्दनः[१३]—रोहिण्यास्तनयः प्रोक्तो रामः सङ्कर्षणस्त्वया। वसुदेवनन्दनस्यवासुदेवस्य कथायाः यदि कश्चित् प्रश्नं करोति, यदि वा तत्कथां कश्चिच्छृणोति तथा यदि वा कश्चिद वक्ता वदति तत्कथां तर्हि त्रीन् तत्कथा पुनाति।

सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम।
वासुदेव[१४] कथायां ते यज्जाता नैष्ठिकी रतिः।।
वासुदेवकथा प्रश्नः पुरुषांस्त्रीन् पुनाति हि।
वक्तारं पृच्छकं श्रोतृन्तत्पादसलिलं यथा।।

पर ब्रह्म परमात्मा भगवान् श्रीकृष्णः चतुष्षष्टिकलासु पारदर्शी आसीत्।

यत्र भगवत अच्युतस्य कथा प्रसङ्गश्चलति तत्रैव सर्वाणि तीर्थानि विराजन्ते।

'तत्रैव[१५] गङ्गा यमुना च तत्र
गोदावरी सिन्धु सरस्वती च।
सर्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः' ।।

भगवान् श्री कृष्णस्य कथा न केवलमष्टादशपुराणेषु उप-पराणेषु, विशालकलेवरमहाभारतग्रन्थे तथा गोपालोपनिषदि कृष्णोपनिषदि च लभ्यते। उपर्युल्लिखितशास्त्रंविहायविभिन्नवैष्णवसाम्प्रदायिकाचार्य चरणकृतकृतिषु श्रीकृष्णसाम्वन्धिक-दिव्यातिदिव्यमधुरातिमधुरलीलाकथा सम्प्राप्यते। अतएव सच्चिदानन्दभगवतः श्रीकृष्णस्य परिचयप्रदाने शोधग्रन्थकलेवरवृद्धिभयहेतुः अतः बाध्यतया विरम्यते।

भगवान् श्रीरूद्रदेवः

सृष्टिप्रारम्भे भगवान् ब्रह्मा शुद्धसत्वगुणप्रभावेन सनक-सनन्दन-सनातन-सनत्कुमारान् प्रकट्यामास। पश्चात् मानसपुत्रान् सृष्टिहेतुः आज्ञापयामास। परन्तु चतुर्षु पुत्रेषु रजोगुणाभावत्वात् सृष्टिकर्मणि इच्छा नासीत्।

कथयामासुः यत् सृष्टिविस्तारकर्म अस्माभिर्न सम्भाव्यते। अतः परमपुरुषस्याराधनकर्तुं वाञ्छामः। उक्त[१६] कथनानन्तरं ब्रह्मा कुद्धो जातः तस्य क्रोधः शिशुरूपेण भ्रू—मध्ये प्रकटितः पश्चात् तच्छिशुः रूद्रन्नवदत् हे धातः[१७]! झटिति मे नाम कथयतु तथा कुत्राहं तिष्ठामि, निर्दिशतु ब्रह्मा कथितवान् तदा 'सुरश्रेष्ठः उत्पन्ने सति रोदितवान् अतः रूद्रो नाम भविष्यति। मन्युः, मनुः महिनस् महान् शिवः ऋतुध्वजः उग्ररेता भवः कालः वामदेवः धृतव्रतः इत्येते नामानि भविष्यन्ति। हृदयाकाशेन्द्रिय वाय्वग्निजलपृथ्विसूर्यचक्रेषु निवासस्थानमस्ति।

भगवतः[१८] रूद्रस्यापि सृष्टिकर्मणि इच्छा नासीत्। विभूतिभूषण-चन्द्रशेखरभगवान् शङ्कराराधनप्रियः आसीत्। विधात्रादेशेन रूद्रदेवः भगवदाराधनायां स्वं नियुक्तवान् पश्चात् भगवच्छ्रीकृष्णदर्शनं जातम्।

एकदा[१९] रूद्रदेव गोलोकधामं जगाम। तत्रैव पुरुषोत्तमभगवान् श्रीकृष्णचन्द्रतः अष्टादशाक्षरगोपाल मन्त्रं लेभे।

एकस्मिन् समये श्रीरूद्रदेवः कैलाशपर्वते ध्यानभग्नः आसीत्। प्रसन्नतापूर्वकं श्रीमन्नारायणः सन्निकटं आगत्य कथयामास 'वरं याचयतु' रूद्रदेवः प्रणामपुरस्सरं कथयामास 'भगवन् वेदः भवतः यं रूपं निर्गुणनिष्क्रियशान्तरूपेण गायति, तद्स्वरूपमहं दर्शितुमिच्छामि।

श्री मन्नारायण उक्तवान् 'यमुनायाः पश्चिम तटे श्री वृन्दावनं गच्छतु, तत्रैव में परमस्वरूपस्य दर्शनं भविष्यति। श्रीधामवृन्दावनगमने सति रूद्रदेवः श्रीराधाकृष्णयो र्दर्शनं लब्धवान्। पद्मपुराणापातालखण्डे उक्तकथनस्य पुष्टिर्भवति।

यदद्य मे त्वया दृष्टमिदं रूपमलौकिकम्।
घनीभूतामलप्रेम सच्चिदानन्दविग्रहम्।।
नीरूपं निर्गुणं व्यापि क्रियाहीनं परात्परम्।
वदन्त्युपनिषत्संघा इदमेव ममानघ।।
प्रकृत्युक्तगुणाभावादनन्तत्वान्तथेश्वरम् ।
असिद्धत्वान्मद्गुणानां निर्गुणं मां वदन्ति हि।।
अदृश्य त्वा न्ममैतस्य रूपस्य चर्मचक्षुषा।
अरूपं मां वदन्त्येते वेदाः सर्वे महेश्वर।।
व्यापकत्वाच्चिदंशेन ब्रह्मेति च बिदुर्बुधाः।
अकर्तृत्वात्प्रपञ्चस्य निष्क्रियं मां वदन्ति हि।।
मायागुणैर्यतो मेंऽशाः कुर्वन्ति सर्जनादिकम्।
न करोमि स्वयं किञ्चित्सृष्ट्यादिकमहं शिव।।

श्री रूद्रदेवः भगवतः श्रीकृष्णस्य बालरूपस्योपासकः। आसीत्। भगवान् रूद्रदेवः योगिनां परमाराध्यस्तथा वैष्णवानां परमाचार्यः पुराणेऽमले श्रीमद्भागवतेऽपि उक्तकथनस्य पुष्टिर्भवति।

निम्नगानां यथा गङ्गा देवानामच्युतो यथा।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा।।

आचार्यत्रिपुरारिः

आचार्यत्रिपुरारेः परिचयः विस्तृतरूपेण न प्राप्यते। दिव्यपुरुषाणां परिचयप्राप्त्यर्थं मानवानां पार्श्वे साधनं न लभ्यते। आचार्यश्रीत्रिपुरारिः दिव्यपुरुषोऽस्ति। अतएव तन्निवासभूमिरपि मर्त्यभूमिः नास्ति। श्री त्रिपुरारेर्निवासभूमिः कलापग्रामः धरायां स्थित्वाऽपि। अमर्त्यभूमिः वर्त्तते। स्कन्दपुराणे कलापग्रामस्य परिचयः प्राप्यते। तत्र उल्लिखितमस्ति यदिदं स्थानं हिमालयस्य गहनप्रदेशे वर्तते। तत्र गमने मार्गद्वयं वर्त्तते। आकाशमार्गः भू-गर्भमार्गश्च तेन गच्छति। द्वापरयुगपर्यन्तं मार्गद्वयमासीत्। हिमालयस्य कलापग्रामगमने कस्यचिद् दिव्यपुरुषस्य साहाय्येन सम्भावना वर्तते।

श्री बदरीनाथधामतः स्वर्गारोहणे मानाग्रामो मिलति। तत्स्थानतः एकस्यां दिशायां समतल भूमिः वर्तते। केचिद् पार्वत्याः जनाः तत् समतल भू-भागं कलापग्रामरूपेण जानन्ति सम्भवतः मानाग्रामस्य पार्श्वे एव कश्चित् कलापग्रामः वर्तते। कलापग्राम एव आचार्यत्रिपुरारेः निवासस्थानम् तपःस्थानं भ्रमणस्थानञ्चास्ति। तत्र न केवलं गृहस्थः जनः अपितु विरक्तोऽपि निवसति। आचार्यत्रिपुरारिः भगवतः रूद्रदेवस्य प्रियशिष्योऽस्ति। महामुनिशुकदेवानुकम्पया श्रीविष्णुस्वामी आचार्यश्रीत्रिपुरारेः दर्शनं लब्धवान्। तदनन्तरं श्रीत्रिपुरारिः विष्णुस्वामिनं दीक्षां ददौ।

आचार्यविष्णुस्वामी

श्रीरुद्रसम्प्रदायाचार्यः शुद्धाद्वैतप्रवर्त्तक 'सर्वज्ञ सूक्त'भाष्यकार आदिवैष्णवाचार्य अनन्त श्रीविभूषितः श्रीविष्णुस्वामी बाल्यकालतः

अनासक्तः अन्तः प्रवृत्तः वीतरागप्रकृतिः। कर्मविस्तारे तस्याभिरूचिः नासीत् परन्तु गुरूपदेशात् स भक्तिप्रचारार्थं महत् प्रयत्नं करोति स्म। शिष्याः सदैव वाञ्छन्ति स्म यत् सदैव श्रीगुरुसान्निध्यं स्यात्। गुरुसेवा शिष्यस्य सौभाग्यमस्ति। परन्तु आचार्यचरणस्य सन्यासग्रहणवार्तां श्रुत्वा शिष्याः सर्वे दुःखिताः जाताः 'परन्तु अन्योपायो नासीद् यतोहि गुरोराज्ञा गरीयसी। आचार्यः शुभमुहूर्ते प्रधानपीठोपरि स्वीयशिष्यं श्री देवदर्शनाचार्यं संस्थाप्य विशेषरूपेण उपासनाप्रणाल्याः शिक्षांदत्तवान् आचार्यः सत्सङ्गमहत्त्वं तथा साधनात्मिकाया भक्ते र्निर्देशं चकार। आचार्यः कथितवान् कलौ जीवशक्तिः क्रमशः क्षीणा भविष्यति। मनसः कल्मषयुक्तता चञ्चलता च अधिकं भविष्यति। ध्यान तपोयोग्यानुकूलस्थानं न मिलिष्यति। यज्ञार्चनहेतुः उपर्युक्तपदार्थानां अभावो भविष्यति। अस्मिन् युगे भगन्नामाश्रय एव मानवान् भवाब्धितः तारयिष्यति। भगन्नाममहिमा अमलपुराणे श्रीमद् भागवते स्पष्टतया सम्प्राप्यते—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्तनादेव कृष्णस्य मुक्तसङ्गपरं व्रजेत्।।

कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्।।

भगवन्नामप्रसङ्गेऽन्यत्रापि कथितं यत्
'हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्'।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा।।

संकेते परिहासेऽवहेलनायाञ्च भगवन्नामग्रहणे पापानां नाशः भवति।

साङ्केतं पारिहास्यं[२०] वा स्तोभं हेलनमेववा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः।।

उक्त प्रकारेण श्री विष्णुस्वामी स्वशिष्यान् कल्याणार्थं यथार्थोपिदेशं ददौ। तदनन्तरं श्री विष्णुस्वामी शास्त्रीयमर्यादारक्षणहेतुः

विधिवत् सन्यासं जग्राह। यतिवेषे[२१] आचार्यः शिखा सूत्रेण सह ऊर्ध्वपुण्ड्रं तुलसी मालाञ्च दधार।

आचार्यस्य धाम प्राप्तिः–

आचार्यः बाल्यकालतः श्रीश्यामसुन्दरस्य साक्षात्सन्निधिं लब्ध्वा कृतार्थः जातः। प्राणिनां कल्याणार्थं सद्गुरोरादेशेन आंचार्यत्वं स्वीकृतम्। भक्तिप्राबल्ये सति स्तम्भ-प्रस्वेद-रोमाञ्चादयः अष्टौसात्विकाः क्रियाः परिदृश्यन्ते।

'स्तम्भ[२२] स्वेदोऽथ रोमाञ्च स्वर भेदोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलयः इत्यष्टौ सात्विकाः स्मृताः'।।

आचार्यस्य दिव्यशरीरे उक्ताः क्रियाः बाल्यकालतः आसन्। आचार्यस्य शरीरज्ञानमपि नासीत् उक्तक्रियात्वात्। आचार्यस्य स्मृतौ शरीरस्य सांसारिकसंज्ञा, सांसरिकस्थितिः लौकिकावश्यकता च नासीत्। आचार्यस्य शरीरसुरक्षाहेतुः केवलं शिष्यास्नानाच्छादनादि-क्रियायां ध्यानं ददतिस्म। यतोहि आचार्यस्य ध्यानं नासीत्, यत् सः क्वास्ति किं वा करोति। आचार्यचरणनयनसन्निधौ नित्यमेव भगवल्लीला प्रतिभाति स्म। अतः जागतिकवस्तूनां स्वशारीरिकज्ञानञ्च स्मृतौ कदापि कुत्रापि न सम्भाव्यते। प्रेमसमाधौ दीर्घकालपर्यन्तं स्थायी रूपेण तिष्ठतिस्म। भगवत्प्रेम समाधिकाले आचार्यस्य मुखे केवलंकतिपय भगवच्चरणामृतविन्दून् एव शिष्याः ददतिस्म कर्त्तव्यदृष्ट्या। एवंप्रकारेण उत्तरोत्तरमाचार्येण परिस्थितिर्जिता। आचार्यः पश्चान्नारायणधामं गतवान् आचार्यस्य सम्प्रदायस्तु खल्विदं भारते सर्वत्रैव सघनतरुरिव पुष्पितः पल्लवितः फलितश्च। सन्तश्रीज्ञानेश्वरस्य तथाभक्तप्रवरश्रीनामदेवस्य आचार्यवल्लभस्य श्रीस्वामिहरिदासस्य सम्प्रदायाः जगति प्रख्याताः सन्ति।

श्रीमदाचार्यो नित्यः नित्यस्तु सर्वत्रैव वर्त्तते। त्रिकालाबाधित एव नित्यः। अतः सहस्रवर्षपश्चादाचार्यः स्वप्नदशायां सन्तज्ञानेश्वरमुपदेशं ददौ। अधुनापि भावुकाः प्रेमिकाः एकवाक्यतया स्वीकुर्वन्ति यच्छ्रीमदाचार्यस्य सर्वेषामस्माकमुपरि अनन्यसाधरणानुकम्पा वर्तते।

सम्प्रदायक्रमः

१. पुरुषोत्तमो भगवान् श्रीकृष्णः
२. रुद्रदेवः
३. त्रिपुरारिः
४. श्रीविष्णुस्वामी
५. देवदर्शनाचार्यः (देवमुनिः)
६. श्रीपरमानन्दमुनिः
७. श्रीआनन्दमुनिः
८. श्रीप्रकाशमुनिः
९. श्रीकृष्णमुनिः
१०. श्रीनारायणमुनिः
११. श्रीजयमुनिः
१२. श्रीश्रीमुनिः
१३. श्रीभट्टाचार्यः
१४. श्रीनिताचार्यः (नित्याचार्यः)
१५. श्रीसत्वाचार्यः
१६. श्रीनृसिंहाचार्यः
१७. श्रीशुद्धाचार्यः
१८. श्रीसुबुद्धाचार्यः
१९. श्रीप्रबुद्धाचार्यः
२०. श्रीअसूयाचार्यः
२१. श्रीरुद्राचार्यः
२२. श्रीभगवन्ताचार्यः

२३. श्रीरामेश्वराचार्यः

२४. श्रीब्रह्मपदचर्याचार्यः

२५. श्रीसुदयाचार्यः

२६. श्रीलक्ष्मीनारायणाचार्यः

२७. श्रीरामविष्णुस्वामी

२८. श्रीविल्बमङ्गलाचार्यः

२९. महाप्रभुः श्रीवल्लभाचार्यः

३०. श्रीविट्ठलनाथः

३१. श्रीयदुनाथः

३२. श्रीमधुसूदनः

३३. श्रीमुरलीधरः

३४. श्रीब्रह्मराजः

३५. श्रीपद्मराजः

३६. श्रीप्रद्युम्नमुनिः

३७. श्रीहृषीकेशः

३८. श्रीपरमानन्दः

३९. श्रीकल्याणदासः

४०. श्रीप्रेम जी

४१. श्रीसॉवलदासः

४२. श्रीरतनदासः

४३. श्रीकिशनदासः

४४. श्रीराघौदासः

४५. श्रीधनप्रियदासः

४६. श्रीदयारामदासः

४७. श्रीरामदासः

४८. श्रीबलरामदासः

४९. श्रीपरशुरामदासः

५०. श्रीरणछोड़दासः

५१. श्रीमोहनदासः

५२. श्रीभोलादासः

५३. श्रीदामोदरदासः

५४. श्रीनरोतमदासः

५५. वर्तमानाः विष्णुस्वामि सम्प्रदाय जगद्गुरवः षष्ठ-पीठाधीश्वराः महामण्डलेश्वराः श्रीयमुनाचार्याः महाराजाः सतुआ बाबा।

श्रीमज्जगद्गुरुविष्णुस्वामिसम्प्रदायाचार्याणां सतुआबाबेत्युपाधि-विशिष्टानां यमुनाचार्यमहा-राजानामाध्यात्मिकशिष्यायाः श्री सर्वा-नन्दमय्याः मालक्ष्मीदेव्याः कृते प्रयागराजतीर्थे अर्धकुम्भस्य परमपुण्यकाले २२/१/२००७ ईस्वीयतमेवर्षे अलङ्करणसमारोहं विधाय अखाड़ापरिषदः अध्यक्षेण, अनी अखाड़ापरिषदः अध्यक्षेण डाकोर इन्दौर खालसा च सर्वसम्मत्या—जगद्गुरुभक्तिमयीमीरावाई इत्युपाधिर्दत्तः।

卐

(ख) पौराणिक-स्वरूपम्

परात्परात् नारायणादेव ज्ञानभक्त्योर्द्वैधारे प्रवहन्त्यौ सत्यौ जगन्मङ्गलं कुरुतः।

यथा भगवता नारायणेन ब्रह्मविद्यायाः उपदेशः ब्रह्मणः कृते कृतः ब्रह्मणा ऋषिभ्यः कृतस्तस्यामेव भगवान् शुकदेवः गौणपादाचार्यः गोविन्दभगवत्पादः शङ्कराचार्यः।

तथैव वैष्णवसम्प्रदायेषु चत्वारः सम्प्रदायाः मुख्य तथाहि रूद्रसम्प्रदायः, ब्रह्मसम्प्रदायः श्रीवैष्णवसम्प्रदायः सनकसम्प्रदायः।

पद्मपुराणे महर्षिणाव्यासेन लिखित्वम्—

रामानुजं[२३] श्री डरामानन्दं.स्वीचक्रे मध्वाचार्यं चतुर्मुखः।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुः सनः।।

श्रीब्रह्मरूद्रसनकवैष्णवाः क्षितिपावनाः।
चत्वारस्ते कलौ भाव्याः सम्प्रदायप्रवर्तकाः।।

भगवता रूद्रेण गोलोकवासिनः पुरुषोत्तमाच्छ्रीकृष्णाद अष्टादशाक्षरगोपाल मन्त्रो गृहीतः।

एकस्मिन् समये भगवान् रूद्रदेवः ध्यानमग्नः आसीत् प्रसन्नतापूर्वकं नारायणः निकटमागत्य 'वरं याचयतु' भगवता रूद्रेणोक्तं वेदोक्तं स्वरूपं द्रष्टुमिच्छामि, नारायणेनोक्तं, यमुनायाः पश्चिमतटे श्रीवृन्दावनं गच्छतु तत्रैव परमस्वरूपस्य दर्शनं भविष्यति, श्री वृन्दावनधामगमने श्रीरूद्रदेवः श्रीराधाकृष्णयोः दर्शनं कृतवान् तदुक्तं पद्मपुराणस्य पातालखण्डे[२४]—

यदद्य मे त्वया दृष्टमिदं रूपमलौकिकम्।
घनीभूतामलप्रेम सच्चिदानन्दविग्रहम्।।

नीरूपं निर्गुणं व्यापिक्रियाहीनं परात्परम्।
वदन्त्युपनिषत्सङ्घाः इदमेव ममानघ।।

प्रकृत्युक्तगुणाभावादनन्तत्वात्तथेश्वरम् ।
असिद्धत्वान्मद्गुणानां निर्गुणं मां वदन्ति हि।।
अदृश्यत्वान् ममैतस्य रूपस्य चर्मचक्षुषा।
अरूप मां वदन्त्येते वेदाः सर्वे महेश्वर।।
व्यापकत्वाच्चिदंशेन ब्रह्मेति च विदुर्बुधाः।
अकर्तृत्वात्प्रपञ्चस्य निष्क्रियं मां वदन्ति हि।।
माया गुणैर्यतोमेंऽशाः कुर्वन्ति सर्जनादिकम्[१] ।
न करोमि स्वयं किञ्चित्सृष्टयादिकमहं शिव।।

पद्म पुराणस्य पाताल खण्डे श्री रूद्र देवेन भगवत्याः पार्वत्याः। सन्निधौ श्रीकृष्णस्य यन्महिमवर्णनं कृतम् तदित्थम्।।

'यदङ्घ्रिनख-चन्द्रांशु-महिमान्तो न विद्यते।
तन्माहात्म्यं कियद्देवि प्रोच्यते त्वं मुदा शृणु।।
अनन्तकोटिब्रह्माण्डे अनन्तत्रिगुणोच्छ्रये।
तत्कलाकोटिकोट्यंशाः ब्रह्म विष्णुमहेश्वराः ।
सृष्टि स्थित्यादिना युक्तास्तिष्ठन्ति तस्य वैभवाः।
तद्रूपकोटिकोट्यंशाः कला कन्दर्प विग्रहाः।।
जगन्मोहं प्रकुर्वन्ति तदण्डान्तरसंस्थिताः।
तद्देह विलसत्कान्तिकोटिकोट्यंशको विभुः।।
तत्प्रकाशस्य कोट्यंशो रश्मयो रविविग्रहाः।
तस्य स्वदेहकिरणैः परानन्दरसामृतैः।।
परमामोदचिद्रूपैर्निर्गुणस्यैककारणैः ।
तदंशकोटिकोट्यंशा जीवन्ति किरणात्मकाः।
तदङ्घ्रिपङ्कजद्वन्द्वनखचन्द्रमणिप्रभाः ।
आहुः[२५] पूर्वब्रह्मणोऽपि कारणं वेददुर्गमम्।।

तदंशसौरभानन्त कोट्यंशो विश्वमोहनः।
तत्स्पर्शपुष्पगन्धादिनानासौरभसम्भवः ।।

तत्प्रिया प्रकृतिस्त्वाद्या राधिका कृष्णवल्लभा।
तत्कलाकोटिकोट्यंशो दुर्गाद्यास्त्रिगुणात्मिकाः।।

श्रीरूद्रदेवः भगवतः श्रीकृष्णस्य बालरूस्योपासकः आसीत्। भगवान् रूद्रदेवः योगिनां परमाराध्यस्तथा वैष्णवानां परमाचार्यः। पुराणामले श्रीमद्भागवते उक्तकथनस्य पुष्टिर्भवति—

'निम्नगानां यथा गङ्गा देवानामच्युतो यथा।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा।।

शाण्डिल्यसंहितायां भक्तिखण्डे पञ्चमाध्याये स्पष्टतयोक्तेः—

'अथातः श्रूयतां विप्राः सम्प्रदायः पुरद्विषः।
एकदा शङ्करो देवो गतो गोकुलमण्डलम्।।
तत्र वृन्दावने रम्ये सच्चिदानन्दमन्दिरे।
त्रिभङ्गललितं देवं कोटिमन्मथसुन्दरम्।।
अनौपम्यं वेणुधरं व्रजस्त्री-गणसेवितम्
श्रुतिभिर्मुनिभिश्चैव सेव्यमानं मुदान्वितम्।
प्रणिपत्य मुदा देवं सामगानादतोषयत्
जगतो हि समुद्धर्तुं सम्प्रदायस्य लब्धये।।
तस्मै ददौ प्रसन्नात्मा तत्रत्यानामनुग्रहात्
स लब्ध्वा परमं लाभं स्वधामसन्न्यवर्तत।
परमानन्द सम्ग्नो नृत्यं चक्रे दिगम्बरः
समुपासत तं देवं तत्प्रष्टुं भूतकौतुकः।।
न चाचष्ट तदा देवो हत्वा त्रिपुरमाहवे।
तदा हर्ष समाविष्टो नारदेन प्रसादितः।।

जगौ तमेव सन्मार्गं श्रुतं यच्छ्रीपतेर्मुखात्।
नारदोऽपि महायोगी परमानन्दपूरितः।।
अलं प्रसादतः प्रादाद्व्यासायामिततेजसे।
कौण्डिन्याय मया प्रोक्तो गर्गाचार्य महात्मने।।
व्यासस्तु वक्ति पुत्राय ब्रह्मराताय विष्णवे।
अथो कलौ सम्प्रवृते पूर्वाचार्यैरथागतैः।।
भविष्यति परा भक्तिः किञ्चित्कालं मुनीश्वराः।
वेदवेदान्ततत्वज्ञैर्वैष्णवैर्ब्राह्मणोत्तमैः ।।
निर्वाहिता ततो भक्तिर्लुप्तप्राया भविष्यति।
ततोऽपि श्रीपतेरस्य स्वीयानुग्रहतो हरेः।।
माथुरे मण्डले तत्र गोकुले ऽस्मिन् गिरावपि।
प्रादुर्भविष्यतिमहा पुरुषैरूप भाविता।।
तस्याः सम्प्रीतये तत्र सम्प्रदायं रिरक्षिषुः।
महात्मा सुमहातेजा भगवद्वदनोदितः।।
प्रादुर्भविष्यति ततः सर्वश्रुतिविशारदः।
योगी योगीश्वरस्तं वै सम्प्रदायं वदिष्यति।।
भगवानपि तं साक्षादुपदेष्टा निजागमम्
आसाद्य गोकुलं धाम 'भक्तिं संवर्धयिष्यति।
गिरिराजं ततः प्राप्य महात्मैकान्तसंश्रयैः
निर्गुणं भक्तिमार्गं हि वर्धयन्विचरिष्यति।।
निजात्मप्रेम सम्पूर्णैर्भगवद्ध्यानतत्परैः।
तद्रसाप्लुतचित्तानां स्वाचारपरिवर्तिनाम्।।
सर्वभूतैकसुहृदां वेदप्रामाण्यमीयुषाम्।
विरलेष्वेव भविता सम्प्रदायो ऽत्युत्तमः।।

आश्चर्याणि चरित्राणि कृत्वा नानाविधान्यसौ
स्थापयिष्यति वै तस्याः पारम्पर्याक्रमं कुलम्।
समुदधृत्य ततो जीवान् हरेः प्रीतिं करिष्यति
ततः कतिपये काले कालदोषप्रभावतः।।
विलयं यास्यति पन्थाः कापट्येनाकुलः परः।
परं दोषान्वितैः पुम्भिर्निजाचार्यपराङ्मुखैः।।
इत्येवं हि समाख्यातः सम्प्रदायः पुरद्विषः।
अयमेव परः पुण्यो भक्तिशास्त्रैकसम्मतः।।
एतन्माहात्म्यमतुलं नालं वक्तुं चतुर्मुखः
अयं हरेः श्री व्रजदेवतायाः अनुगृहीतः किल सम्प्रदायः।
आविर्भवो वेणुगृहीतवेदैर्विभावयध्वं त्रिपुरारिसम्मतम्।।
परम्परापराप्रोक्ता परमात्मपुरः सरः।
चिराच्चराचराभीष्टाधरायां भक्तितत्परा ।
श्रीविष्णुस्वामिमध्यमाम् गोपीपति समारम्भां।
श्री मदाचार्यपर्यन्तां स्तुमो गुरुपरम्पराम्।।

।। इतिशम् ।।

卐

ग. वैष्णवसम्प्रदायस्तत्सिद्धान्तविमर्शः

विष्णुर्देवतास्येति विग्रहे 'सास्य देवता' (४.२.२४) इत्यनेनाणि आदिवृद्धौ 'ओ र्गुणः' इत्यनेन गुणेऽवादेशे विभक्तिकार्ये च कृते 'वैष्णवः' इति भवति। अथवा विष्णोरयमिति विग्रहेऽपि तस्येदमिति सूत्रेणाणि कृते गुणेऽवादेशे विभक्तिकार्ये सति वैष्णव इति भवति।

वैष्णवानां सम्प्रदायः, वैष्णवसम्प्रदायः 'सम्प्रदायशब्दस्य व्युत्पत्तिः वैष्णवमार्ग प्रवर्तकाश्चत्वार आचार्याः सन्ति। पूज्यपूज्याः श्री विष्णुस्वामि-निम्बार्क-रामानुज-मध्वाख्याः। सर्वे वैष्णवाः पाञ्चरात्रस्य प्रामाण्यं स्वीकुर्वन्ति। श्रीसम्प्रदाये विरक्तपरम्परायां रामानन्दाचार्यः, गृहस्थ परम्परायां रामानुजाचार्यः इतिं केचन वैष्णवाः मन्वते। पाञ्चरात्रस्य प्रामाण्यविषये आगम प्रामाण्यकारैः श्रीयामुन-मुनिभिरुक्तम्—

साङ्ख्यस्य[२६] कपिलो वक्ता पञ्चरात्रस्य केशवः।
इति स्कन्दपुराणेऽपि पठ्यते भारते तथा।।

पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्।
इदं महोपनिषदं चतुर्वेदसमन्वितम्।।

साङ्ख्ययोग कृतान्तेन पञ्चरात्रानुशब्दितम्।
नारायणमुखोद्गीतं नारदोऽश्रावयन्मुनीन्।।

ब्रह्मणस्सदने तात यथादृष्टं यथाश्रुतम्।
एवमादिपुराणोक्तैः सहस्रैर्न्यायबृंहितैः।।

वासुदेव प्रणीतत्वं पञ्चरात्रस्य निर्व्यथम्।
किन्तु वेदस्य नित्यत्वे विवदन्ते विपश्चितः।।

तेन निर्दोषविज्ञानकारणत्वाद् द्वयोरपि।
निर्विशङ्कं प्रमाणत्वं भगवच्छास्त्रवेदयोः।।

श्रीविष्णुस्वामिसम्प्रदायः—

विष्णुस्वाममि[२७] वोहित्थसिन्धु संसार पार करु।
विष्णु स्वामि सम्प्रदाय दृढ ज्ञानदेव गम्भीरमति।।
'नाम' तिलोचनं शिष्य सूर शशि सदृश उजागर।
गिरा गंग उनहारि काव्य रचना प्रेमाकर।।
आचारज हरिदास अतुलबल आनन्ददायन।
तेहि मारग 'वल्लभ' विदित पृथु पधितिपरायन।।
नवधा[२८] प्रधान सेवा सुहृद मन वच क्रम हरिचरण रति।
विष्णुस्वामि सम्प्रदाय दृढ ज्ञानदेव गम्भीरमति।।

युधिष्ठरराज्यानन्तरं श्रीवल्लभाचार्यात् पूर्वं विष्णुस्वामिनामकाः त्रयः आचार्याः बभूवुस्तेषु मध्ये द्रविड देशीयस्य क्षत्रियजातेर्राज्ञः राज्यस्य ब्राह्मणमन्त्रिणः पुत्रः महातेजस्वी भगवद्भक्ति परायणो वेदोपनिषद् वेदाङ्गपूर्वमीमांसोत्तरमीमांसायोगधर्मशास्त्रागमशास्त्राद्यध्ययनानन्तरमाचार्यपदवीं प्राप्य भगवत्साक्षात्कारं कृत्वा भक्तिमार्गस्य प्रवर्तकोऽभूत्।

सम्प्रदायप्रदीपे तात्त्विकसिद्धान्तः वल्लभाचार्यस्य शुद्धाद्वैतसदृशा एव विराजन्ते श्री विष्णुस्वामिना बहुकालं यावत् भक्तिमार्गस्य प्रचारः कृतः भक्तेर्महत्ता विषये मुक्तेरपिगरीयसीत्युक्तम्। वर्णाश्रमादिमूलकानि वेदोक्तसमस्तानि कर्तव्यानि भक्तेः साधनानि।

किञ्चित्कालानन्तरं बिल्वमङ्गलाचार्यः भक्तिमार्गस्य प्रचारकोऽभवत्। गौडीयदशमखण्डे श्रीभक्ति सिद्धान्तसरस्वतीमहाराजेनोक्तम् देवतनुर्विष्णुस्वामी ईस्वीय वर्षतः त्रिशतवर्षपूर्वमासीत् अस्य पिता देवेश्वर भट्टः अस्य सिद्धान्तस्य प्रचारकाः त्रिदण्डिनः सप्तशतसन्यासिनआसन् अन्तिमस्त्रिदण्डी व्यासेश्वराख्य आसीत्।

अन्यो विष्णु स्वामी राजगोपालविष्णु स्वामीति नाम्नः प्रसिद्ध आसीत्।

अस्य जन्म ८३० ईस्वीयतमेऽभवत् भारतेन्दु समग्रे श्री भारतेन्दुना लिखितं यद् आचार्यबिल्वमङ्गल पर्यन्तं सप्तशतकाः शिष्याः भवेयुस्तेषु प्रधान शिष्याः श्री हरिहर, रङ्गनाथ, जयगोविन्द, गोविन्ददास, देवजीव, यज्ञ नारायण, नरसिंह, लक्ष्मण गिरि, हरिदास, गोविन्ददास, दयाराम, जीवनराम, मनसाराम कृष्णदत्त, बिल्वमङ्गलाः परम्पराप्राप्तशिष्या आसन्। श्रीविष्णु स्वामिनः परम्परया प्राप्तस्य शुद्धाद्वैतसिद्धान्तस्य बल्लभाचार्येण परिष्कारपूर्वकं प्रचारः कृतः। शुद्धयोः जीवप्रपञ्चयोः ब्रह्मणश्चाद्वैतम्। अत्रेदं ब्रह्मकार्यकारणोभयरूपेण शुद्धं विद्यते। तत्तुनास्ति मायोपहितम्। मायासम्बन्ध रहितत्वादेव अस्ति तस्य शुद्धत्वम्।

माया सम्बन्ध रहितं शुद्धमित्युच्यते बुधैः।
कार्यकारणरूपं हि शुद्धें ब्रह्म न मायिकम्।।

श्रीविष्णुस्वामिशुद्धाद्वैतसिद्धान्तमतम् तथाहि—

विशेषैः प्राकृतैः शून्यमप्राकृत विशेषवत्।
अशेषोपनिषद्वेद्यं परं ब्रह्मास्तु ते मुदे।।

ननु कथमयमपूर्वस्य प्रस्तावः? ननु कथमस्यापूर्वत्वम्? निखिल-प्रमाण-सिद्धत्वाद् इति चेत्? न सर्वागमविरुद्धत्वात्। तथा हि सर्वं[२९] खल्विदं ब्रह्म तज्जलानिति। अहं कृत्स्नस्य[३०] जगतः प्रभवः प्रलयस्तथा जन्माद्यस्य[३१] यतः, शास्त्रयोनित्वाद् इत्यादि-श्रुति-स्मृति सूत्रैः सर्वस्यापि जगतो ब्रह्मात्मकत्वे अवधारिते तदन्तः पातिनामपि तेषां ब्रह्मत्वम् एवेति कथं च तन्निषेध इति चेत्? सत्यम्। एकाकी न रमते[३२] स द्वितीयमैच्छत् एकोऽहं बहुस्याम् इतिश्रुत्येकवाक्यतायां रमणार्थमेव नाम-रूप-वैचित्र्येण स्वाविर्भावेच्छां कृतवान् इति अर्थो लभ्यते। वैचित्र्यं च उच्चावचत्वकृतम्। तच्च न्यूनाधिकांशम् अन्तरा न सम्भवति इति अचिन्त्य-शक्तित्वात् सच्चिदानन्दांशान् एव यथानुरूपेण अतिरोभाव्य जड़ जीवान्तर्यामि-रूपेण स्वयं प्रादुर्भूतः।

यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते तथाऽक्षराद्विविधाः सौम्यभावाः इत्यादिश्रुतेः।

आविर्भावस्तु विद्यमानस्य वस्तुनः अनुभवविषयता-योग्यत्वम् तदयोग्यत्वं च तिरोभावः। अत्र अनुभवः तु जैवो ग्राह्यो जीवन्तर्यामि-साधारणे वा।

तत्र तिरोहित-चिदानन्दांशत्वेन जड़त्वं तिरोहितानन्दत्वेन जीवत्वम्, आविर्भूतानन्दत्वेन ब्रह्मत्वम्।

अतिरोहित-सच्चिदानन्दांशत्रयत्वम् अन्तर्यामित्वम् इति। एवमेव भग-शब्द वाच्यानाम् ऐश्वर्यादि षण्णाम् अपि धर्माणां तिरोभावम् अविद्या सम्बन्धेन जीवे कृतवान्। तथैव बन्धो जन्म-मरण-देहादि रागरूपो विपरीत-ज्ञानं च अविद्यया एव 'बन्धोअस्याविद्यया' इति वाक्यात् जीवस्य अन्यप्रयोजनाभावात्। जड़े तु चितश्च। जड़-जीव-रूप ब्रह्मणि अब्रह्मत्वेन ज्ञानं भवति तिरोभावाद् एव ऐश्वर्यादीनाम्। तथा तत्तिरोभावः चेतनधर्मत्वात् तेषाम्।

तथा च एतादृशस्य जीवस्य आविद्यकं ब्रह्म-स्वरूपे तद्धर्मेषु च विपरीत-ज्ञानं-भवति। सत्यत्वाद्यनेकालौकिक-धर्मेषु च असत्यत्व विकारित्वाद्यनेक-लौकिकत्वेन ज्ञानं च भवति।

एवं च सति अविद्या सम्बन्धेन विषयीकृता लौकिका ये जड़-जीव धर्माः त एव प्राकृतविशेषाः। तेषाम् अनाश्रयत्वात् तैः शून्यम् इत्यर्थः। प्रकृति-सम्बन्ध-सहकृतेन्द्रियजन्य-ज्ञानविषयत्वं प्राकृतत्वम् इति। प्रमाणं च अत्र निषेधिकाः श्रुतयः। एतेन निषेध-श्रुतयोऽपि विषयप्रदर्शन-मुखेन व्याख्याता ज्ञेयाः।

यद्यपि एतादृश-निषेधेन एव वक्ष्यमाणार्थसिद्धिः तथापि विशेषत्वावच्छिन्नस्य प्राकृतत्वात् तदितर-धर्माणां-च अप्रसिद्धेः विधायकं श्रुतेश्च अन्यपरत्वात् निर्विशेषम् एव ब्रह्म सिद्ध्यति इति मतानन्तरं-व्युदस्तये-विशेषणान्तरम् आहुः अप्राकृत इति। न प्राकृता अप्राकृताः प्रकृति-सम्बन्ध सहकृतेन्द्रियाविषयाः। ईदृश-विशेषवद् इत्यर्थः। प्रमाणं च अत्र पूर्वोदाहृत-श्रुत्यादि आकलनीयम्।

ननु पूर्वोदाहृत-श्रुत्याद्युदाहृत कर्तृत्वाऽदि धर्माणां मायिकत्वात्, कथं तथात्वम् इति चेत् मा एवम् तेषां मायिकत्वे प्रमाणाभवात्।

ननु निषेध-श्रुत्यनुरोधात् तथा कल्प्यते। नैतद् युक्तम् निषेध-श्रुतेः प्राकृततद्विषयत्वात्। अन्यथा पाणि-पादादिमत्वम् निषिद्धय 'जवन[३३]' इत्यादिना पराऽस्य शक्तिः इत्यादिना च क्रिया-ज्ञान-विधान वैयर्थ्यापत्तिः।

ननु अन्तः करण-शुद्धि हेतूपासनार्थत्वात् तेषां न वैयर्थ्यम्। निर्विशेषस्य ध्यातुम् अशक्यत्वादुपासनार्थम् अलौकिकानाम् एव तेषां विधानम् चेत्? न लोक-प्रसिद्धत्वेन तेषां लौकिकत्वाद् इति चेत्? मा एवम्। पादादि-साधन-रहित जवनादि क्रियाया अलौकिकत्वादेव स्वरूपज्ञानार्थं निर्धर्मकत्व-विधानम्। उपास्त्यर्थे तु धर्मविधानम् इति वाक्य भेदापत्तेः भ्रान्ति-प्रतिपन्न-विषय-वैशिष्ट्येन उपासनाया अन्तः शुद्धेः अजननात् च।

अन्यथा सन्तम् इत्यादि-निद्रा-श्रुतेः च। न च असतः अपि वैशिष्ट्यज्ञानम् शाखाचन्द्र न्यायेन स्वरूपावगति साधनम् इति न एतद्दोषावसर इति वाच्यम्। दृष्टान्त वैषम्यात्। न हि शाब्दं ब्रह्म प्रत्यक्षः यस्मिन् चन्द्र इव धर्म आरोप्यते। नापि पाणि-पदादि-राहित्ये अपि जवनग्रहीतृत्वादयो धर्माः क्वचित् प्रत्यक्षाः। तथा च अधिष्ठानाधिष्ठेययोः अपि अप्रत्यक्षत्वात् न दृष्टान्त बलेन तत्सिद्धिः।

किञ्च आरोपो हि अन्य धर्मस्य अन्यत्र स्थापनम्। इत्थं च सति स्वनिरूप्यधर्माणां लोकाप्रसिद्धतया अन्यदीयत्वाभावाद् आरोपलक्षणा-सङ्गतेः न आरोपोऽपि वक्तुं शक्यः। अतएव निषेधविषयत्वम् अपि तेषाम्। प्रतीतस्य एव निषेधात्। न च लोके अस्मद्दृष्ट्यविषयत्वे अपि श्रुति-दृष्टिगोचरत्वेन आरोपनिषेधौ न अनुपपन्नौ इति वाच्यम् लोके मूर्तामूर्त-विलक्षणरूपसत्वे 'द्वावेव[३४]' इति श्रुतिविरोधात्। न चेदम अस्मदज्ञानानुवाद इति वाच्यम्। तथापि तयोः अनुपपत्तेः। ननु कथम इति चेद् इत्थम्। श्रुतिर्हि दोषदृष्ट्या किं तान् विषयीकरोति शुक्तिरजतवत् किं वा गुणदृष्ट्या रजतत्ववति रजते रजतत्ववत्। नाद्यः। रजतवद् अन्यत्र अदर्शनेन तद् भ्रमानुपपत्तेः न च अस्मदादिवत् तासाम् अविद्यावशाद् विपरीतज्ञानम्। जीववत् तासाम्

अविद्यासम्बन्धानुक्तेः। द्वितीये तन्निषेधानुपपत्तेः। ब्रह्मणः सदा एकरसत्वात् न अवस्थाभेदः। किञ्च उपासनार्थम् असदुपदेशे प्रतारकत्वापत्तेः च। तृतीये तु मननरूपं तत्तद् वक्तव्यम्। तथा सति निर्गुणस्य अपिमननात् तद्वैशिष्ट्यज्ञानम् अकिञ्चित्करम् एव नियमेन तत्कारणत्वाभावात्।

ननु न अकिञ्चित्करत्वम्। बुद्धि-स्थैर्य-द्वारा निर्गुण-मननार्थम एव तन्मननाङ्गीकाराद इति चेत्? न सविशेष मनने वा निर्विशेष-मननेऽपि तत्प्रतिपादकवाक्यार्थ-बोधातिरिक्त-साधनान्तरानपेक्षणात्। दृश्यतेऽपि च इदानीन्तन-परिव्राजकेषु बिना एव उपासनां तत एव मननम्।

अथ मायाजन्यत्वम् एव मायिकत्वम् इति चेद्? तत्र ब्रूमः। मायायाः समवायित्वम् असमवायित्वं वा? नाद्यः मायाधर्मत्वापत्तेः। समवेत्तानां समवायि कारणे ब्रह्मणि कार्यैकार्थकारणैकार्थ प्रत्यासत्योरभावात्। तृतीये तु दण्ड-चक्रादिवत् तत्वे ब्रह्मणि वस्तुतः तादृशधर्मसिद्धया निर्विशेषत्वाऽसिद्धेः।

किञ्च दण्डादिवन्मायाया अपि कर्तृ प्रयोजकत्वनियमेन कर्तुः। प्रयोजकत्वस्य अवश्यं वाच्यत्वेन तस्य च मायायाः सम्बन्धात् पूर्वमपि सत्वावश्यकत्वाद् धर्माणां मायिकत्वासिद्धेश्च।

अथ उपरागस्नानवत् जन्यता उच्यते करणस्य कर्तृप्रयोजकत्व-नियमाभाव-पक्षेऽपिः तदा नित्या कादाचित्की वा? नित्यत्वे द्वैतहानिः। धर्माणां च तन्नित्यत्वेन नित्यत्वापत्तेः। निषेधानुपपत्तिश्च कादाचित्कत्वे तु तस्य सनिमितत्वात् तदभावे न तत्र तद् वक्तुं शक्यम्।

ननु अस्तु प्रागभाववद् अनादि सान्तत्व-पक्षः तृतीयः इति चेत्? न। अनादित्वे प्रमाणाभावात् ननु सादित्वस्य अदृष्टत्वाद् एव अनादित्वम् अनुक्तसिद्धम् एव। बन्धोऽस्याविद्यया इति वाक्याच्च। तथा इति चेत? सत्यम्। यद्यपि अस्मदादि-दृष्टं न सादित्वं तथापि न अनादित्वम् तत्वे ब्रह्म-तुल्यतापत्तेः। तथापि च 'न तत्समः' इतिं श्रुति विरोधः। सदेव[३५] इत्यादि-श्रुति विरोधश्च। ननु सान्तत्वात् न तौल्यम् न सर्वथाऽनादिसिद्धस्य सान्तात्वाभावात् ब्रह्मवत् जन्यस्य एव

भावस्य सान्तत्व नियमात्। ननु उक्त प्रागभाव-दृष्टान्तः बलेन आत्मनोऽपि सान्तत्वापतेः दृष्टान्तस्यापि असिद्धेः। ननु इह कपाले घटो भविष्यति इति प्रतीत्यन्यथाऽनुपपत्ति-सिद्धः स इति चेत्? न एवम्, भविष्यत्कालावच्छिन्न-घट सत्ता-विषयत्वात् तत्प्रतीतेः। स्याद् एतत्। इह 'कपाले नेदानीं घटः' इति प्रत्ययबलात् तत्सिद्धिः इति। न हि अयम् अत्यन्ताभावं ध्वसं वा अवगाहते पूर्वस्य नित्यत्वात् ततः परिशेषात् तत्सिद्धेः इति चेत्? न तिरोभावावगाहित्वात् तत्प्रत्ययस्य। न हि तिरोभावः ननु कस्य ह्ययं (कोऽयं) तिरोभावः?

अत्र ब्रूमः। विद्यमानस्य वस्तुनो दर्शनाऽयोग्यत्वं तत्। तच्च भगवदैच्छिकम्।

ननु ईश्वरीयेच्छाया नित्यत्वात् तन्नित्यताऽपतिः। सिसृक्षा-सजिहीर्षयोः नित्यत्वात् तयोः अपि नित्यत्वापत्तेः।

ननु इष्टापत्तिः तयोः उभयोः नित्यानुवृतेः इति चेत्? मैवम्। तयोः एक-वस्तु विषयत्वेन तत्सर्ग-प्रलययोः नित्यत्वाऽपत्या तयोः अन्यतरस्य अपि अशक्य-निरूपणापत्तेः।

अथवा 'न इदानीं घटः' इति प्रत्ययः अत्यन्ताभावविषयोऽस्तु। न च 'इदानीम्' इत्यस्य अनुपपत्तिः। तस्य नित्यत्वाद् इति वाच्यम्। त्वन्मतीय-प्रागभावस्य अपि तदानीम् उत्पत्यभावेन तदनुपत्तेः तथा च धर्माणां मायिकत्वाभावात् सिद्धम् अप्राकृतधर्मवत्वं 'ब्रह्मणः'। अत्रैव हेतुगर्भविशेषणम् आहुः अशेषोपनिषद्वेद्यम् इति। सर्वोपनिषत्प्रतिपाद्यम् इत्यर्थः। अस्य तत्वं तु इत्थं वोध्यम्। तथा हि। यदि धर्माः प्राकृताः स्युः तर्हि तद्विशिष्टं ब्रह्म न भवेत्। तथां सति 'तत्प्रतिपादकवेदान्तानाम् अब्रह्मपरत्वे 'सर्वे वेदा[३६] यत्पदम्' इत्यादि वाक्यानि कुप्येरन्। औपनिषदत्वम अपि साधारणं स्यात्। अत ईदृशवाक्याऽन्यथाऽनुपपत्तिः एव विशेषाणाम् अप्राकृतत्वं साधयति इति सुधीभिः अवसेयम् इति। किञ्च ब्रह्ममाययोः कः सम्बन्ध? न तावत् संयोगः अत्र संयोग निषेधात्। संयोग लक्षणाभावाच्च उभयोः अन्यत्रास्थिते। अनाश्रितत्वाद् उभयोः न समवायः न अपि

स्वरूपलक्षणः। विशेषण-विशेष्यादि-भावाभावेन तस्य वक्तुम् अशक्यत्वात्। ननु अस्त्येव विशेषण-विशेष्य भावो दोषाभावात्। नैवं वक्तुं शक्यम् तथा भावे ब्रह्मणः सधर्मकत्वापत्तेः एव दोषत्वात्।

अथ कर्तृत्वादिधर्मवद् विशेष्यत्वम् अपि मायिकम् इति न तदापत्तिः वास्तवत्वाभावात्। तन्न विकल्पासहत्वात्। तथा हि तत्र मायिकत्वं मायाजन्यत्वम् माया सम्बन्धेन प्रतीयमानत्वं वा? आद्ये ब्रह्मणः सधर्मकत्वापत्तिः। द्वितीये असङ्गश्रुतिविरोधः। ननु न ब्रह्मणि माया-सम्बन्धं ब्रूमः अपितु जीव इति। तथा च जीवनिष्ठया दोषरूपया विचित्रा धर्माः प्रत्याय्यन्ते आसक्ताद्युपनेत्रवत् इति चेत्? न जीवस्य ब्रह्माभिन्नत्वेन तथा वक्तुम् अशक्यत्वात्। तादृशोपनेत्रवत् मायायाः तद्धर्मत्वापत्तेः च। तथा च सम्बन्धस्य वक्तुम् अशक्यत्वेन औपाधिकभेदासम्भावाद् अप्राकृतानेकधर्मवत्तया सर्वोपनिषद्वेद्यत्वं सिद्धं ब्रह्मण इति दिक्।

उक्त विशेषण-विशिष्ट वस्तु विशेष्यत्वेन निर्दिशति। परम इति। सामान्येन परत्वस्य इन्द्रियादिषु अपि, इन्द्रियाणि पराण्याहुः इति वाक्येन उक्तत्वाद्। ब्रह्म इति। सर्वेभ्यो यत् परं ब्रह्म तदित्यर्थः।

न च ब्रह्मत्वेन एव परत्वे प्राप्ते पर-पदानर्थक्यम् इति वाच्यम्। इन्द्रियादिपरत्वस्य ज्ञेये ब्रह्मणि अपि सत्वात्, ततोऽपि परत्वबोधनेन सार्थक्यात्।

ननु महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परागति इतिश्रुत्या इन्द्रियाणि पराण्याहुः इति स्मृत्या च ब्रह्मणा अन्यस्य परत्वाभावात् कथं तत्परत्वं इति चेद्?

अत्र उच्यते। उक्त श्रुति-वाक्ये पुरुष-पदं न परब्रह्मवाचकं किन्तु अक्षरब्रह्मपरम्।

स्मृतेः च तदनुयायित्वात् तत्रापि बुद्ध्यपेक्षत्वेन अक्षरं ब्रह्म एव ज्ञेयम्। न च अत्र प्रमाणाभावः। द्वाविमौ पुरुषो लोके क्षरश्चाक्षर एव च इति सद्भावात्। तथा च द्वाविमौ इति वाक्यानुरोधात् क्षरस्य

परत्वासम्भवात् च अक्षरवादकमेव तत्र पुरुष पदम्। उत्तमः पुरुषस्त्वन्यः इति परमात्मपदेन तत्पृथक् पर ब्रह्मनिर्देशात् च तथा च एतादृशं ब्रह्म-वाञ्छित-प्रदानेन ते मुदे प्रीतये अस्तु इति आर्शीवचनम्। शुद्धाद्वैतवादिनः श्री वल्लभसम्प्रदायः 'राधावल्लभीयसम्प्रदायः' श्री हरिदासी सम्प्रदायः।

निम्बार्क[३७]सम्प्रदायः

तैलङ्गब्राह्मणकुले सुदर्शनचक्रावतारभूतस्य निम्बार्काचार्यस्य जन्म अभवत्। पूर्वंनियमानन्दः इति नाम आसीत् किन्तु भक्तानां कृते रात्रौनिम्ववृक्षोपरि भगवतः सूर्यनारायणस्यदर्शनं कारितवान्।

एतां शक्तिं दृष्ट्वा आश्चर्यान्विताः सन्तः जनाः तदनन्तरमिमं निम्वाचार्यः इति अथवा निम्बादित्यः इति सञ्ज्ञया व्यवहरन्तिस्म।

देवर्षिणा नारदेन स्वयमुपदेशः कृतः आसीत्।

आचार्यप्रवरेण निर्मिताः ग्रन्थाः वेदान्तपारिजातः दशश्लोकी श्रीकृष्णस्तवराजः एते प्रकाशिताः ग्रन्थाः सन्ति, अप्रकाशितः ग्रन्थाअपि वेदान्ततत्वबोधादयः एतेषामाचार्याणां साक्षाच्छिष्यः श्रीनिवासाचार्यः।

निम्बार्काचार्यवैष्णवपरम्पराद्यापि अक्षुण्णरूपेण विराजते। निम्बार्कनामकरणे निम्बार्कवैष्णव सम्प्रदायपरम्परायां दीक्षितस्य श्रीधनञ्जयदास काठिया बाबा विरचितस्य निम्बार्कवेदान्त-संक्षिप्तसाराख्य ग्रन्थानुसारेण विवेचनम्।

तथाहि—

विरञ्चिरेकदा तस्मिन्निम्बार्कस्याश्रमे शुभे।
समागत्याह भो ब्रह्मन् प्राप्तोऽहं क्षुधयान्वितः।।
यावत् सूर्यः स्थितो व्योम्नि तावन्मां भोजय द्विज।
इति श्रुत्वा तथेत्युक्त्वा ददौ तस्मै च भोजनम्।।

तदा तु भगवान् सूर्यो ह्यस्ताचलमुपागतः
मुनिना ऋषिणा तेन निम्बवृक्षे तदा शुभे।
स्थापितं तेजसा स्वेन तेजस्तत्वं सुदर्शनम्
तत्तेजः सूर्यसंकाशं दृष्ट्वा वेधाः स्मयान्वितः।।
भिक्षुवेषधरं बालं मुनिसूर्यमिवापरम्।
ननाम दण्डवद् भूमौ तपसा तस्य शोषितः।।
उवाच वचनं रम्यं साधु साध्विति पूजयन्।
निम्बादित्य इति ख्यातो वसुधायां भविष्यति।।

एतद् घटनातो नियमानन्दः निम्बार्केति नाम्ना जगति प्रसिद्धोऽभूत। निम्बार्क[३८]सम्प्रदायस्य द्वैताद्वैत सिद्धान्तः।

चिदचिदीश्वरभेदेन भोक्तृभोग्यनियमाकभेदेन च व्यवस्थितास्त्रयः पदार्था इति। तदुक्तम्—

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चिदिति प्रोक्तो जीवो दृश्यमचित्पुनः।।

द्वैताद्वैतस्याभिप्रायो भेदाभेदः अणुरूपोजीवः ब्रह्मणः अग्निस्फुलिंगवदंशः अर्थात्भिन्नाभिन्न स्वरूपः अभिन्न रूपं स्वाभाविकमौपाधिकन्तु भिन्नं रूपम्।

अस्मिन् सम्प्रदाये राधामाधवयोः युगलोपासना क्रियते। कृष्णं विना राधाया उपासना न क्रियते तथा राधां विना कृष्णस्योपासना न क्रियते।

औदुम्बरं संहितायां लिखितमस्ति यत्
निर्माय सह कृष्णेन श्रीराधां च हरिप्रियाम्।।
साहित्येनैव सम्पूज्य नित्यमेति पराङ्गतिम्।
शरणागतिरेव भगवत्प्राप्तिरूपायः।

विदेह मुक्तिरेव न तु जीवनमुक्तिः।

श्रीरामानुजसम्प्रदायः (रामानन्द सम्प्रदायः)

श्रियासहित:रामानुजः श्रीरामानुजः तस्य सम्=सम्यक्रूपेण प्र=प्रकृष्टतयादीयते गुरुद्वारा सविधिशिष्याय उपदिश्यते स रहस्यं विद्या समर्प्यते स—सम्प्रदायः अस्य परम्परापि सम्प्रदायः।

श्री रामानुजाचार्यस्य जन्म द्रविडदेशे भूतपुरीत्यपरनाम्न्यां प्रेमधुख्यायां (पेरम्बुदूर) पुरि एकोनपञ्चशदधिकसहस्रतम-शाकाब्देसमजनि।

तस्य पिता केशवभट्टः। माता कन्तिमती। मातुलो यादवप्रकाशः। स एव विद्यागुरुश्च।

विशिष्टाद्वैतसिद्धान्तः

श्रीरामानुजाचार्यमते मुख्यतस्तत्वत्रयम्। चिदचिदीश्वरभेदात्। तत्र चिज्जीवो भोक्ता। अचिज्जडवर्गो भोग्यम् चिज्जडयोरन्तर्यामीसंस्तन्नियामकश्चेश्वरः स हि सविशेषः सगुणश्च। अयं हीश्वरश्चिज्जडौ व्याप्नोतीत्यात्मशब्देनोच्यते। या यद् व्याप्नोति स तस्यात्मा। तच्चास्य शरीरमिति चिज्जडौ परमात्मनः शरीरम्। तत्रापि जीवः परमात्मनः शरीरं भूत्वा जडस्यात्मा भवति। एतत्पदार्थत्रितयं परमार्थतः परस्परस्माद्भिन्नं सत्संबद्धं च भवति। अतोऽयं परमात्मा सजातीय विजातीयस्वगत्तैतद्भेत्रयसहित एवेति रामानुजाचार्या मन्यन्ते। भेदेऽपि शरीरविशिष्टस्यैकत्वाद्विशिष्टाद्वैतवादमाश्रयन्ते। मायवादम-सहमानाश्च विवर्तवादं प्रतिक्षिपन्ति। परिणामवादं स्वीकुर्वन्तश्च सत्ख्यातिं समर्थयन्ते। एतेषां मते जीवन्मुक्तिर्नास्ति। मोक्षेऽपि जीवब्रह्मणोर्भेद एव। याथातथ्येन परमात्मस्वरूपावबोधपूर्वकं तथैक्यमेवमोक्ष इति।

आचार्यपरम्पराः

श्रीशठकोपाचार्यः
रङ्गमुनिः
नाथमुनिः

यामुनाचार्यः

रामानुजाचार्यः

सुदर्शनाचार्यः

वेंकटनाथः

लोकाचार्यः

बरवरमुनिः

श्रीनिवासः

रङ्गरामानुजः

अद्यपि श्री रामानुजाचार्यस्य परम्परा अक्षुण्णा विराजते। श्रीरामानन्दस्य विशिष्टाद्वैतवादी श्रीरामानन्दी सम्प्रदायः।।

मध्वाचार्यसम्प्रदायः

अस्य मतं द्वैतवादः। द्विधा इतं द्वीतम्। तस्य भावो द्वैतम्। भेद इति यावत् स च भेदः पञ्चविधः जीवेश्वर भेदो जडेश्वर भेदो जीवजडभेदो जीवानां मिथो भेदो जडानां मिथो भेदश्चेति।

तदिदं भेद पञ्चकमसत्यं स्यातर्हि तस्य भ्रान्तिकल्पितत्वं स्वीकार्यं स्यात्। न चेदं भ्रान्तिकल्पितमिति मन्तव्यम्। कल्पितस्य निवृत्यवश्यं भावात्। नैव चेदं निवर्तते! तस्मात्सत्योनादिश्चायं प्रपञ्चः। एवं च द्वैतं न विद्यते इति यन्मतं तदज्ञानिनं। मतमितिवोद्धयम्। श्रुतिरप्ययत्रार्थे प्रमाणम्। तथा हि—'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारूवण्यो मैवारूवण्यः इति। अस्यार्थः। आत्मा परमात्मा सत्यः। त्रिकालाबाधित इत्यर्थः तथा जीवः सत्यः। तयोर्जीवेश्वरभेंदश्चापि सत्यः। मैवारूवण्य इत्यत्र मा एव आरुवण्य इति पदत्रयम्। तत्र माइति निषेधार्थकमव्ययम्। एवेति निश्चयद्योतको निपातः। आरुभिर्दुष्टैर्वन्यो भजनीय आरुवण्यः। एवं च परमात्मा दुष्टजनसेव्यो नैव भवतीत्यर्थ। सत्यं भिदेति मैवारुवण्य इति च त्रिर्वचनं भेद सत्यत्वदार्ढ्यं प्रदर्शयितुम्। अस्यां श्रुतौ स्पष्टमेव

भेदोऽभिहितः। नह्यभेदे सति भेददार्ढ्यं सेव्यसेवकभावो वाऽञ्जसा संगच्छते। अनुमानेनापि भेदोऽवसीयते। परमेश्वरं पक्षीकृत्य तत्र जीवाद् भेदः साध्यते। जीवं प्रतीश्वरस्य सेव्यत्त्वात्। यो यं प्रतिसेव्यो भवति स तस्माद्भिन्नः। यथा भृत्याद्राजेति। अत्र भृत्यः सेवको राजा च सेव्यः। तस्मात्सेवकात्सेव्यो राजा भिन्नदृष्ट इति। अयमाशयः। प्रभूतं धनं मे स्याद्दारिद्रयं लेशतोऽपि मा भूदिति प्रार्थयमानाः पुरुषा राज्ञो गुणोत्कर्षंकीर्तयेयुश्चेत्प्रीतो राजा तेषामभिलषितं पूरयेत्। परन्तु यदि ते सर्वाङ्गीणं त्वद्राज्यपदमेव देहीत्यभिकाङ्क्षेयुस्तर्हि नेषदपीष्टलाभो भवेत्प्रत्युत क्रोधोत्पादनेनानर्थावाप्तिः स्यात्। तदुक्तम्—

घातयन्ति हि राजानो राजाऽहमिति वादिनः।
ददत्याखिलमिष्टं च स्वगुणोत्कर्षवादिनाम्।।

तथा च महद्भिः सह स्वसाम्योद्भावनमपि महतामप्रीतिकरं भवति किमुत तेन साकं स्वाभेद सम्पादनमित्यर्थः। एवं च जीवेश्वरयोस्भेदः सर्वथा दुर्घटः। न च ब्रह्म विद् ब्रह्मैव भवतीतिश्रुति बलाज्जीवेश्वरयोरभेदः। शक्यशङ्क इति वाच्यम्। सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेत्। इतिवत्प्रशंसा परत्वादभेदश्रुतेः नहि ब्राह्मणपूजया शूद्रो ब्राह्मणजातितां लभते, किन्तु ब्राह्मणवत्प्रशंसनीयो भवतीत्यर्थः। तत्वमसीति महावाक्यमपि भेदप्रतिपादकमेव। तस्य त्वं तत्त्वमिति षष्ठीसमासमङ्गीकृत्य तस्येश्वरस्य दासोऽसीत्यर्थात्। अथवा "स आत्मा तत्वमसिश्वेतकेतो इत्युद्दालकस्य स्वपुत्रं श्वेतकेतुं प्रत्युपदेशपरे वाक्ये आत्मा अतत् त्वम् इति पदच्छेदः। अतदित्यत्र च नञर्थो भेदः। तथा च यः स्वातन्त्र्यादिगुणोपेतः स एव परमात्मा। त्वं तु अतत् अस्मादात्मनो भिन्नः परतन्त्रो जीवोऽसीत्यर्थात् एवं च जीवेश्वरयोः सेव्यसेवकभावात्तयोर्भेदः सिद्धः। सेवा च अङ्कननामकरणभजनभेदात्त्रिविधा। तत्राङ्कनं नाम शङ्खचक्रादि-नारायणायुधलाञ्छितमुद्रा धारणम्। तदपि 'अतप्ततनुर्न तदामो अश्नुते' इति तैत्तिरीयकोपनिषच्छ्रुतेस्तप्तमुद्राधारणं मुख्यम्। योऽतप्ततनूरतएवाऽमः स तद्विष्णुपदं नाश्नुत इति तदर्थं मन्यन्ते मध्वानुयायिनः। तथा चोक्तं ब्रह्माण्डपुराणे—

कृत्वा धातुमयीं मुद्रां तापयित्वास्वकां तनुम्।
चक्रादि चिन्हतां भूप धारयेद्वैष्णवो नरः।।

पुत्रादीनां केशवादिनाम्ना व्यवहारो नामकरणमुच्यते। तेन च निरन्तरं नारायणस्मरणं भवति। भजनं तु कायिक वाचिकमानासिक भेदेन दशविधम्। तत्र च सत्यं हितं प्रियं स्वाध्यायश्चेति चतुर्विधं वाचिकम्। दानं परित्राणं परिरक्षणं चेति त्रिविधं कायिकम्। दया स्पृहा श्रद्धा चेति त्रिविधं मानसिकम्। सर्वस्य भजनस्य विष्णुप्रसादसम्पादनं प्रयोजनम्। जीवोऽणुपरिमाणः। न मध्यम परिमाणो नापि विभुः। स च मोक्षावस्थायामपि परमेश्वरस्य दास एव। अपौरुषेयो वेदो नित्यश्च। तस्य च स्वतः प्रामाण्यमित्यादि मध्वाचार्या मन्यन्ते। प्रत्यक्षमनुमानं शब्दश्चेति प्रमाणत्रयवादिनश्चैते। एतेषां मते जगत्कर्तृत्वादि रहितं दुःखामिश्रितं परिपूर्णं सुखमेव मोक्षः। स च विष्णुप्रसादादेव लभ्यः। विष्णु प्रसादश्च तद्गुणोत्कर्षज्ञानादेव भवति। नाभेदज्ञानात् तदुक्तम्—

तस्मिन्न प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते।
समाश्रितादब्रह्म तरोरनन्तान्निःसंशयं मुक्तिफलं प्रयान्ति।।

आचार्यपरम्परा

श्रीमध्वाचार्यः
जया तीर्थः
व्यासतीर्थः
रघूत्तमतीर्थः
वनमाली मिश्रः

अयं सम्प्रदायः साम्प्रतमपि सम्यक् रूपेण विराजते।

श्रीचैतन्यमहाप्रभोः चैतन्यसम्प्रदायः (गौडीयसम्प्रदायः) अचिन्त्यभेदाभेदवादी।

।। इति द्वितीयपरिच्छेदः ।।

卐

१. बृहदा. षष्ठ ब्राह्मण ६१५।
२. श्रीमद्भागवतस्य तृतीय स्कन्धस्य भूमिका, गणपति कृष्णाजी मुद्रालयाधिकारिणा आत्माकान्होवाभिख्येन स्वीय मुद्रालयमुद्रितम् ११२।
३. वेदार्यपारिजात खण्ड प्रथम प्रकाशक राधाकृष्णभावुका, १४ नेता जी सुभाष रोड कलकत्ता।
४. टिप्पणी पृ. ६५८ भारतीय दर्शन।
५. हि.मा.द. शारदा मन्दिर वा.।
६. काशीपुरी में मुहल्ला घुघुराना श्यामा की गली बाबू साहेब बाबू हरख चन्द्र जी के बाड़े में दुर्गा कटारे के गणेश गन्था, श्रीमद्भागवतश्रीधरी टीका, सीताराम मिश्र, गोपाल मिश्र, का. ८०७, श्री संवत्....।
७. सर्व दर्शन संग्रहः पृ. ९६ पुण्याख्यपन्तने आनन्दाश्रम मुद्रणालये ९६६ खिस्ताब्दस्य द्वितीय मासस्याष्टमे दिने प्रकाशितः।
८. श्री कृष्णोपनिषद् = श्लो.सं. १० पूर्वार्द्ध।
९. श्री कृष्णोपनिषद् = श्लो. सं. १० उत्तरार्द्ध।
१०. श्री कृष्णोपनिवद् श्लो.सं. १० पूर्वार्द्ध।
११. श्रीमद् भागवतम् स्क. १० अ. १ श्लो. सं.।
१२. श्रीमद् भागवतम् स्क. १०, अ. १२, श्लो. २३।
१३. श्रीमद् भागवतम् स्क. १०, अ. १, श्लो. सं. ३।
१४. श्रीमद् भागवतम् स्क. १०, अ. १, श्लो. ८।
१५. वाक्यपदीयं ब्रह्मकाण्डं तथा ब्रह्मसूत्रशाङ्करभाष्य प्रथमाध्याय।
१६. श्री विष्णुस्वामी और उनका सम्प्रदाय, पृ.।
१७. श्री विष्णुस्वामी और उनका सम्प्रदाय, पृ.सं. ९।
१८. श्री विष्णुस्वामी और उनका सम्प्रदाय, पृ.सं. ९।
१९. श्री विष्णुस्वामी और उनका सम्प्रदाय, पृ.सं. १६।
२०. उपनिषद्।
२१. भागवत।
२२. विष्णु स्वामी उनका सम्प्रदाय १३४।
२३. पद्मपुराण आचार्य बलदेव कृत भारतीय दर्शन सं-६५८।
२४. पद्मपुराण पाताल खण्ड। १/६६/६७ पृ.सं. ११।
२५. विष्णुस्वामी सम्प्रदाय। पृ.सं. १२ (पद्म पुराण—३०-३८-११८-१२०)
२६. आगमप्रामाण्यम्।

२७. भक्तमाल २८।
२८. भक्तमाल।
२९. छा. ३.१४.१।
३०. गीता ७.६।
३१. ब्र. १.१.२।
३२. भा. ११.११.४।
३३. श्वे. १.१९।
३४. बृ. २.३११।
३५. छान्दोग्योपनिषद ६.२.१।
३६. कठो १.२.१५।
३७. वृहदारण्यक ३०, पृ. ४०८।
३८. सर्वदर्शन संग्रह निम्वार्काचार्यस्य शिष्येण औदुम्वाचार्येण विरचितः।

卐

अथ तृतीयपरिच्छेदः

(क) शुद्धाद्वैतमतस्वरूपम्

पुष्टिमार्गश्च:—

शुद्धाद्वैत[१] विचारेण मायावादनिवर्तकान्।
श्रीमदाचार्यचरणान्प्रणमामि पुनः पुनः।।

अथ शुद्धाद्वैतस्य किं लक्षणमिति चेत्—'इतरसम्बन्धाऽनवच्छिन्न-कार्यकारणादिरूपद्वित्वप्रकारकज्ञान प्रतियोगिताकाभाववत्वम्' इत्यर्थ गृहाण।

अयं भावः अथादौ श्रीमद्रामकृष्णभट्टाः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्ति सिद्ध्यर्थ मङ्गलमाचार्यवर्यचरणवन्दनरूपं निबन्धन्ति शुद्धाद्वैतेति। शुद्धं च तदद्वैतं चेति कर्मधारयाच्छुद्धत्वा-वच्छिन्नाद्वैतत्वावच्छिन्नयोरभेद उक्तः। एतादृश शुद्धाद्वैतस्य यो विचारस्तेन मायावादनिवर्तकानाचार्यचरणान्प्रणमामीति मुख्योन्वयः। तत्र परमतनिराकरणपूर्वकस्य मतव्यवस्थापनरूप परीक्षायाः परपक्षनिराकरण प्रधानतया मायावाद निवर्तकानित्याचार्य विशेषणम्। एवं च परेषां शङ्कराचार्यादीनां ये मायावादास्तेषां निराकरणपूर्वक-स्वाभिमतशुद्धाद्वैतविचारप्रस्थापनादाचार्यचरणानामतीवश्रैष्ठ्यं व्यज्यते। मायावादनिवर्तकत्वं च मायावादविशेष्यकसत्यत्वप्रकारकज्ञाननिष्ठ-विशेष्यताका प्रामाण्यप्रकारकज्ञान जनकत्वम्। जनकत्वं चात्र परम्परया प्रयोजकत्वरूपम् तेन साक्षाद् जनकत्वेऽपि न दोषः। प्रणमामीति। अत्र नम धातोः स्ववधिकोत्कर्षवत्तया ज्ञापनमर्थः तदेकदेशे उत्कर्षे प्रोपसर्गार्थप्रकर्षस्यान्वयः एवं चाचार्यचरण विशेष्यकस्वावधिकोत्कर्ष-प्रकारकज्ञानजननानुकूलव्यापारवान्ग्रन्थकार इत्यर्थ। पुनः पुनरिति भक्ति दार्ढ्याव बोधनाय। अथ शुद्धाद्वैतस्य किं लक्षणमिति। षष्ठ्यर्थो निष्ठत्वम् तथा च शुद्धाद्वैतनिष्ठेतर व्यावृतोधर्मो जिज्ञासाविषय इत्यर्थः

सर्वत्र किं समभिव्यवहारे जिज्ञासाविषयत्वबोधनस्यानुभविकत्वात् जिज्ञासाविषयीभूतं लक्षणं निर्दिशति-इतरेत्यादिना। इतरसबन्धा-वच्छित्वाभाववद्यत्कार्यकारणादिरूपद्वित्वप्रकारज्ञानं तत्प्रतियोगिताका-भाववत्त्वमित्यर्थः।

एतेन भेदाभेदवादिनौ निम्बार्कभास्कराचार्यौ प्रत्युक्तौ। तत्राद्यस्यवास्तविकभेदाभेदत्वेन मध्वाचार्यस्यैव भेदस्य वास्तविकतया द्विप्रकारकेत्यादिना निरस्तत्वात्। द्वितीयस्य तु औपाधिकभेदाभेदेन भेदस्यौपाधिकत्वेनेतरसम्बन्धेनेत्यादिना व्यावर्तितत्वात्। तर्हि अवच्छिन्नान्तमेव तदिति चेत् शङ्करमतापत्तिः अतः कार्यादिति।

अत्रेदं तात्पर्यम्मध्वमते भेद एव वास्तविकः, निम्बार्कमते भेदाभेदावुभयावपि वास्तवाविति तन्मते द्वित्वप्रकारकज्ञानस्यैव सत्वेनद्वित्वप्रकारकज्ञानप्रतियोगिताकाभावाभावान्न तन्मतप्रवेशापत्तिरिति। भास्कराचार्यमतनिराकरणं दर्शयतिद्वितीयेति। व्यावर्तितत्वादित्यग्रि-मेणान्वितम्। तन्मते भेदाभेदस्यौपाधिकत्वेनेतरसम्बन्धानवच्छिन्नत्वा-भावान्नातिव्यावर्तितत्वादित्यग्रिमेणान्वितम्। तन्मते भेदाभेदस्यौपाधिक-त्वेनेतरसम्बन्धानवच्छिन्नत्वाभावान्नातिव्याप्तिरिति भावः। पदव्यावृति-परिशोधनार्थं पुनः शङ्कते-तर्हि अवच्छिन्नान्तमेवेति। एवं च कार्यकारणरूपेत्यादिपदवैयर्थ्यमित्यर्थः। अत्रोत्तरमाह शङ्करेति। शङ्करमतप्रवेशापत्तिरित्यर्थः। एतादृशापत्तिवारणार्थमेवोक्तपदसार्थक्यान्न-वैयर्थ्यमित्याह अतः कार्यादितीति।

तर्हि रामानुजाचार्यमतेऽपि मायासम्बन्धाभाववत्कार्यकारणयोर-द्वैततया तन्मतप्रवेश इति चेत्, शृणु तन्मते हि चिदचिद्विशिष्टस्य सूक्ष्मस्य स्थूलस्य कारणस्य कार्यस्य च सत्वेन स्वमते 'आत्मैवेदमग्र आसीदि त्यादिश्रुत्याऽचित्तः कारणावस्थायां निषेधात् केवलात्मनः कारणतया, ततो वैलक्षण्यम् कार्यावस्थायामपि तेषां मते परस्परभेदस्य वास्तविककत्वे, स्वमते अभेदस्य वास्तविकत्वेनापि वैलक्षण्यम् न च घटपटादीनामभेद नसम्भवतीतिवाच्यम् सर्वेषां ब्रह्मोपादानस्यैकत्वेन तस्यैवावस्थान्तरत्वेन चाभेदात्। यथा सुप्त उत्थित उपविष्टे च

पुरुषेऽवस्था भेदेपि न पुरुषभेदः। किञ्च इतरसम्बन्धानवच्छिन्नत्वेनाचितो वास्तविकभिन्नचितश्च निरासेन न तत्रातिव्याप्तिः। किञ्च विशिष्टाद्वैतमित्यस्य विशेषणं विशिष्टत्वेन विशेषणस्य चेतख्यावर्तकत्वेन सम्भवोऽपेक्षितोऽत्र व्यावर्त्याभावतया वैशिष्ट्यकथनं उपद्यत इति। एतेन शैवोऽपि दत्तोत्तरः।

रामानुजमतस्यातीवविलक्षणत्वेन तन्मतप्रवेशापत्तिर्न शङ्कास्पदमपीति सूचयितुं स्वमताद्रामानुजमतभेदं स्थापयतितन्मतेहीति। आत्मैवेदमग्र आसीदितिश्रुतिप्रतिपादितं चिद्भिन्नस्याकारणत्वं परेषामसम्मतम् तथैव कार्यावस्थायां तै भेंदः स्वीक्रियते। अस्माभिश्च भेदः 'नेहनानास्ति किञ्चने'तिश्रुतिप्रमाणको निर्धार्यत इत्याह-चिदचिदित्यादि वैलक्षण्यमित्यन्तेन। युक्तञ्चैतत्कथमन्यथा 'यदेवेह तदमुत्रयदमुत्र तदन्विह मृत्योः स मृत्युं गच्छति च इह नानेव पश्यतीत्यादि श्रुतिवाक्यसङ्गतिः स्वमतेऽभेदं स्पष्टयितुमाशङ्कते न चेति। वाच्यंमित्यन्वयः। अयमभिप्रायः—घटो न पटः, पटो न घटः द्रव्यं न गुणः, गुणोन द्रव्यमित्यादि प्रतीतिसिद्धः परस्परं घटादीनां भेदो नञस्तदर्थकत्वात्। न च भूतले न घट इत्यादि प्रत्यये भूतलनिष्ठाभावप्रतियोगित्वादि बोधानुरोधादत्यन्ताभाव एव नञोऽर्थ इति वाच्यम्, सप्तमीसमव्यहाराद्धितत्रात्यन्ताभाव बोधकत्वम्, यत्र तु प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वम्, तत्र भेदबोधकत्वमेव। समान विभक्तिकप्रतियोग्यनुयोगिकवाचकपदसमभिव्याहृतनञो भेद बोधकत्वनियमात्। तथा च घटो न पट इत्यत्राप्यव्यवहितपूर्वत्वसम्बन्धेन प्रथमाविशिष्टघटपटपदसमभिव्यहृतनञो भेदवोधकस्याऽनुभविकत्वेन कथमभेदः शक्यते वक्तुमित्याशङ्कातात्पर्यम्।

अत्रोत्तरमाह-सर्वेषामिति। तथा च प्रतीतितो भेदसिद्धावपि कारणैक्यादस्त्येवैक्यमित्यर्थः। ब्रह्मोपादानस्येति। ब्रह्माभिन्नोपादानकारणस्येत्यर्थः। एकत्वेन अभिन्नत्वेन। अभेदात् कार्यस्याप्यभेद एवेति न कुत्रापिभेद सिद्धिरित्यभिप्रायः। ननु तथापि कपालं न घटः घटो

न कपालमित्यादि प्रतीत्या कार्यकारणयोर्भेद स्वीकारात्कथं ब्रह्मकारणकस्यापि जगतो ब्रह्माभिन्नत्वम्, कथं च तदनुरोधेनैवायमिति चेत् न कार्यस्य कारणभिन्नत्वात्। तथा च यथा कटककुण्डलाद्यनेकमपि कार्यजातं कारणीभूतसुवर्णादभिन्नन्तथैव जगतोऽपि ब्रह्माभिन्नत्वं तदनुरोधेन चैक्यं सिद्ध्यत्येवेत्यलंपल्लवितेन।

विशिष्टाद्वैतमते दोषान्तरमुद्भावयति किञ्चेति। इतरव्यावर्तकत्वेन सम्भव इति। इतरव्यावर्तकत्वमित्यर्थः। तथा चेतरनिष्ठभावप्रतियोगित्वसम्पादकानामेव विशेषणानां सार्थक्यमिति पूर्वोक्तोर्थः पर्यवसितः। एतेनैति उक्तदोषादेवेत्यर्थः। शैवोऽपीति। रामानुजमततस्करत्वादित्यर्थः। तदुक्तं गिरिधरचरणैः[२]—'शैवोप्येतेन विध्वस्तोयतस्तस्कर एवं ही'ति शुद्धाद्वैतमार्तण्डे अपिना कापालिकादिपरिग्रहः। दत्तोतरःखण्डितमत इत्यर्थः। भिक्षुस्त्वविभागाद्वैतवादमवलम्ब्यौपाधिककर्तृत्वादिकभङ्गीचकार तदपीतरसम्बन्धानवच्छिन्नाभावत्वेन निरस्तम्। द्वित्वप्रकारकाद्यभावत्वान्तेन मध्वाचार्यमतस्य निरासः। लीलास्थभावस्य बाधाभावाय कार्यकारणादिरूपमिति ज्ञानस्य विशेषणम्। द्वित्वप्रकारकप्रतियोगिताकाभावस्य मायावादमतेऽपीष्टत्वात्, तन्निवारणाय ज्ञानस्येति प्रतियोगिनि विशेषणमिति सुष्ठु।

अत्र शुद्धाद्वैतपदे कोऽसौसमास इति चेत्, शुद्धञ्च तदद्वैतञ्चेति कर्मधारयः। अत्रेतरसम्बधानवच्छिन्नत्वे सतीत्येव योज्यम्। उक्तलक्षणं तु शुद्धयोः कार्यकारणयोरिति षष्ठीतत्पुरुषपक्षे बोध्यम्।

अत्र नरसिंहतापिन्यां योनित्वं ब्रह्मणः समर्थयित्वा 'सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाप्यल्पा' इत्याद्युक्त्वा 'सन्मात्रो नित्यः शुद्धो वद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगम्यते' इति वाक्यं पठितम् अग्रे च 'सर्वमत एव शुद्धोऽबाध्य स्वरूपः सुखरूप आत्मे'ति निरुपितम्। 'सर्वं खल्विदं ब्रह्मे'त्यादि श्रुतिषु शुद्धाद्वैतं स्पष्टमेव प्रतीयत इति बोध्यम्। विस्तरस्तु शुद्धाद्वैतमार्तण्डप्रकाशे बोध्यः।

पुष्टि मार्गः

पोषणं पुष्टि पुष्ट्यर्थक दैवादिक पुष् धातोर्भावे क्तिन् प्रत्यये कृते इडागमाभावेष्टुत्वे विभक्ति कार्ये च कृते पुष्टेरित्यस्य[३] साधुत्वं भवति तस्याः मार्गः पुष्टिमार्गः कृष्णानुग्रह[४]रूपाहिपुष्टिः—

सर्वसाधनराहित्यं फलाप्तौ यत्र साधनम्।
फलं वा साधनं यत्र पुष्टिमार्गः स कथ्यते।।१।।
अनुग्रहेणैव सिद्धिर्लौकिकी यत्र वैदिकी।
न यत्नादन्यथा विघ्नः पुष्टिमार्गः स कथ्यते।।२।।
सम्बन्धः साधनं यत्र फलं सम्बन्धत्व हि।
सोऽपि कृष्णेच्छया जातः पुष्टिमार्गः स कथ्यते।।१०।।
यत्र वा सुख सम्बन्धो वियोगे सङ्गमादपि।
सर्वलीलानुभवतः पुष्टिमार्गः स कथ्यते।।१५।।
समस्तविषयत्यागः सर्वभावेन यत्र वै।
समर्पणं च देहादेः पुष्टिमार्गः स कथ्यते।।१९।।

नन्वेवं शुद्धब्रह्मवादे जीवनामपि तद्रूपत्वेन भजनानुपपत्तिरिति चेन्न। अंशेत्वेनैव तद्रूपता तेषां नांशिनः ब्रह्मवादे सर्वस्यैव ब्रह्मणः सर्वात्मत्वात्। परं तद्रूपेण। 'इन्द्रोमायाभिः पुरुरूप ईयत' इति श्रुतेः। तथा च सहजांशानां पुनः पूर्वभावसम्पत्त्यर्थमविद्यादोष निवृत्यर्थं च भजनोपपत्तिरिति-भावः।

ननु तथापि भजनमात्रपर्यवसायिनि पुष्टिमार्गे निवर्त्यदोषाभावात तदनुपपत्तिरिति चेन्न। तत्रापि पुरुषोत्तमांशानां तेषां लीलार्थंतो वियुक्तानां पुनः सम्बन्धेन फलानुभवार्थं भजनस्यावश्यकत्वात्। नन्वेवं भजनस्य साधनत्वे पुष्टिमार्गत्वानुपपत्तिरिति चेन्न। भजनस्य भावरूपत्वेन फलरूपत्वात् तस्य साधनत्वेऽपि न क्षतिः। पुष्टिमार्गः स एव यत्र फलं स्वयमेव साधनमित्यसकृदुक्तमाचार्यैः। अतएव पूर्वं प्रादुर्भूय संयोगानुभवं कारयित्वा विरहेणाऽन्तरङ्गतां जने सम्पादयितुं भगवत

एव मथुरागमनरूपत्याग उच्यते। नन्वंशत्वेऽपि जीवानां तदात्मकत्वेनान्यूनत्वाद् भजनानुपपत्तिस्तदवस्थैवेति चेन्न। बहुस्यामिमितिश्रुतेः। क्रीडार्थं तथाऽऽविर्भावान्नानुपपत्तिः काचित्। नन्वेव तथाप्यनुपपत्तिरितिचेन्न। न्यूनत्वविशिष्टस्यैव तस्याविर्भावात्।

ननु तदेच्छायाः करणत्वानुपपत्तिरिति चेन्न। इच्छाया ह्याविर्भावे कारणत्वं न स्वरूपान्यथाकृतौ तस्मान्मुक्तावपि कौस्तुभरूपेण स्थितिरिति भूषणरूपत्वेन न्यूनतायामन्यस्य तथात्वे किं वाच्यम्? इति कैमुतिकन्यायेन सदात्मकत्वेऽपि तदंशत्वेन न्यूनत्वं वास्तवमेवेति भावः। अतएवांशानामपरिमितानां सृष्टौ वह्नि विस्फुलिङ्गवन्निर्गमेऽपि न न्यूनता। हस्ताद्धस्तान्तरस्थिताविव सद्रूपे प्रपञ्चे स्थितत्वान्न न्यूनताशङ्कापीत्यर्थः। नन्वेवं जीवानां सहजहर्यंशत्वे दैवासुरविभागस्तेषु कथमितिचेत्, क्रीडार्थं तदिच्छयेति गृहाण। अत एव फलदशायामपि न्यूनत्वसत्वेन भजनस्य फलता। अन्यथा स्वतन्त्रभक्तिमार्गोच्छेद एव स्यात्। अलं जीवेषु सहजन्यूनत्ववद् ब्रह्मणि सर्वाधिकत्वम्।

ननु तथापि न्यूनाधिकभावः कथम्? अंशत्वेन सत्वादिति चेत्। अत्र वदामि भगवान् भेदेन क्रीडार्थं प्रपञ्चरूपमात्मानमाविर्भावयति। अत्रायं प्रकारः सच्चिदानन्दं ब्रह्म। तस्य च धर्मरूपं ततित्यात्मकभक्षरम्। तस्य च चिदंशा जीवाः क्रीडार्थमिच्छया कृताः। अन्यथा क्रीडावैचित्र्याभावेन न स्यात्। अत एव जडजीवान्तर्यामिष्वेकैकांशतिरोभावस्तथेच्छा च। अतः समुदितपृथक्कारणं क्रीडार्थम्। तत्र मूलरूपेण क्रीडा बन्धमोक्षाभ्यामेव। ततो लीलानित्यत्वसिद्ध्ये बन्धमोक्षावपि नित्यौ वाच्याविति दैवासुर विभागः।

इदंतात्पर्यम्

एवं जडात्मकस्य प्रपञ्चस्य ब्रह्मणः सद्रूपतया अभेदो निरूपितः। जीवाभेदस्तु तत्वमस्या दिवाक्यैश्चित्सजातीयतया निर्विवाद एवेत्यतो नोक्तः। तथापि जीवब्रह्मणोरैक्ये भजनाऽनुपपत्तिरित्याशङ्कां निरसितुं तामेवाहुः—

नन्वेवमिति। भजनानुपत्तिरिति। तरतमभावाभावात् तदनुपपत्तिरित्यर्थः। 'स एकाकी न रमते' इति श्रुतेः। यद्वा भगवद्रूपत्वे सिद्धे भजनस्याऽप्रयोजकत्वादनुपपत्तिरिति समादधते। अंशत्वेनैवेति सहजांशानामिति। 'अंशो नानाव्यपदेशात् 'ममैवांशो जीवलोके जीवभूतः सनातनः' यथाग्नेः क्षुद्रा विस्फुलिङ्ग व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा' इत्याद्युक्तेः। अंशत्वं च राश्येकदेशत्वम्। पूर्वं भावसम्पत्त्यर्थमिति। साम्प्रतं तु 'पराभिध्यानात् तु तिरोहितं ततोह्यस्य बन्धविपर्यया'विति सूत्रादस्य जीवस्यैश्वर्यादि तिरोहितम्। तेन भजनादिकं न भवति। 'नायमात्मा बलहीनेन लभ्य' इति श्रुतेः। अतः पुनरैश्वर्यादिभावसम्पत्यर्थमित्यर्थः। अविद्यादोष निवृत्यर्थञ्चेति। राश्यैकदेशस्यांशस्य विभाजिकाऽविद्या तस्याश्च भगवद्विच्छेदापादकत्वेन दोषरूपत्वम्। तन्निवृत्यर्थमित्यर्थः। नचैश्वर्यादिसम्पत्तावविद्यादोषनिवृत्तौ स भगवद्रूपत्वे एव सिद्धे भजनानुपपत्तिस्तदवस्थैवेति वाच्यम्। तत्र भगवत्कृतस्यैव तरतमभावस्य स्थितत्वात्। 'स्वरूपेणावतारेण लिङ्गेन च गुणेन च। तारतम्यं न स्वरूपे देहे वा तत्क्रियासु वेति' श्रीमदाचार्योक्त मुख्यभक्तानां भगवद्देहेन गुणेन च साम्यमस्ति। भगवदवतारवदेव तेषां प्रादुर्भावात्। भगवता सह नृत्यादिसामर्थ्यस्य विद्यमानत्वाच्चिह्नसाम्यम्। गुणाः सौन्दर्यादयः। तत्साम्यं तु स्पष्टमेव। 'ब्रह्मैव सन् ब्रह्माप्येतीति' श्रुतेः। एवं भगवत्साम्येऽपि भगवत्कृतं तत्र तारतम्यमस्तीतिमन्तव्यम्। उत्कर्षापकर्षवैचित्र्येण विना सम्यग्रमणासिद्धेः। अत एवाग्रे आहुः श्रीमदाचार्यचरणाः—

'तथापि यावता कार्यं तावत्तस्य करोतिही'ति।
अतएव बाललीलादयो युक्तरूपा भवन्तीति।।

एवं सति सुखेन भजनोपपत्तिः। तेन, पुष्टि-पुष्टपुष्टिमर्यादा चेत्याधिकारत्रये यथा योग्याधिकारे सिद्धे अलौकिक सामर्थ्यं पुरुषोत्तमसायुज्यं सेवोपयोगी देहो वैकुण्ठादिष्वति सेवाफलोक्तं यथायोग्यं फलं भविष्यतीति भावः। भाव इति। श्रुतेर्भाव इत्यर्थः पुनराशङ्कते। नन्विति। भजनपर्यवसायिनीति। 'तस्मान्मद्भक्तियुक्तस्य

योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेत्यादिवाक्यैः कर्मज्ञानोपासनादीनामप्रयोजकत्वाद् भजनमात्र-पर्यवसायीत्यर्थः। तस्मिन् पुष्टिमार्गे इति। पुष्टिः पोषणम्। अनुग्रह इति यावत्। पोषणं तदनुग्रह इत्युक्तेः। मार्गपद निरूक्तिस्तु पूर्ववज्ज्ञेया। निवर्त्यदोषाभावादिति। निवर्त्यानामविद्यागुणानां कामादीनां दोषरूपाणां निवर्त्यत्वेनाभावादित्यर्थः। 'अपि चेत् सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितोहि स' इति श्रीमत्प्रभुचरणोक्तेः अजामिलादौ दर्शनाच्च। तदनुपपत्तिरिति। तथाचाकस्मिके श्रेयसि सिद्धे भजनप्रयोजनाभावाद्भजनाऽनुपपत्तिरित्यर्थः। नेति निषेधे समादधते। तत्रापीति। निवर्त्य दोषाभावेऽपि तेषां जीवानां ततः पुरुषोत्तमाद्वियुक्तानां पुनर्भगवत्सम्बन्धेन तदनुभावार्थकत्वेन फलानुभवः प्रयोजनम्। यतो, लीलार्थमेव भगवता वियुक्ताः कृताः। तदर्थं भजनस्याऽवश्यकत्वेन सप्रयोजनकत्वानुपपत्तिरित्यर्थः। नच तर्ह्यविद्यानिवृत्यर्थं चेत्यनुपपन्नमिति वाच्यम्। तन्निवृत्तावेव फलानुभवात्। नच रासलीलायां कामादीनामपेक्षितत्वान्न तन्निवृत्तिरिति वाच्यम्। तस्यास्तद्‌गुणानां च तत्रालौकिकत्वेन लौकिकायास्तस्या निवृत्तेः। 'श्रिया पुष्ट्यागिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया। विद्ययाऽविद्यया शक्त्यामायया च निषेवितमि' त्युक्तेः। नच तस्या बन्धनैकस्वभावत्वेन तत्र स्थिताया बन्धः सम्भवतीति वाच्यम्। लौकिकस्वभावं त्यक्त्वा अलौकिकतया तत्र तस्याः स्थितेः। 'विलज्जमानया यस्य स्थातुमीक्षापयेऽमुयेत्यु' क्तेस्तदधिष्ठात्र्या-मायायास्तत्र विलज्जमानत्वं तदा किं वाच्यमविद्यायाः। तथाच सभयतया सलज्जतया च स्व स्वभावं त्यक्त्वा यावद्रासलीलाकार्यं तदनुकूलमेव करोति। 'भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रित' इति न कोऽपि शङ्कालेशः। तया च लौकिकस्वभावायास्तस्यास्तु निवृत्तिरेवोचिता। तन्निवृत्तिभावे फलानुभवासिद्धेः। अतस्तन्निवृत्तेरावश्यकत्वेन तदर्थं भजनस्या-वश्यकत्वात् तदुपपत्तिर्युक्तेति तदनवद्यम्।

एवं सति भजनस्याविद्यानिवृत्यर्थत्वेन फलानुभवार्थत्वेन च साधनत्वापत्तावाशङ्कते—

नन्वेवमिति। तथा च तस्य साधनत्वेन फलस्य तत्साध्यत्वेन साध्यत्वाभावात् पुष्टेर्मार्गः 'तस्यानुपपत्तिः। तेन मार्गेण भगवति गमनाभावादित्यर्थः। न हि पुष्टिः स्वकृतिसाध्यां भवति किन्तु भगवदिच्छैकसाध्या। राजसेवकयोरिव। अतो या निःसाधनफला सैव पुष्टि। अतः कर्मज्ञानोपासनादिभजनस्यापि साधनत्वेन पुष्टिमार्गस्य तदसाध्यत्वात्तदनुपपत्तिरिति भावः। नेति, निषिद्ध्य समादधते। भजनस्य तत्र भावरूपत्वेनेति। भजनं च भक्तिशब्दवाच्या क्रिया। 'प्रकृतिप्रत्ययौसहार्थंब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने'ति नियमादत्र धातुसामान्यार्थे शक्तोऽपि क्तिन् प्रत्ययो भजिसमभिव्याहारात् प्राधान्येन भजनक्रियां वक्ति। सा च सर्वात्मिका। सेवापदं च सातत्याभीक्ष्ण्यान्यतरपूर्वककायिकव्यापारविशेषपरिचर्यारूपे रूढम्। स्त्रीसेवा औषधसेवेत्यादि प्रयोगदर्शनात्। मत्सेवया प्रतीतञ्चेत्यादि स्वतन्त्रसेवा बोधकैर्वाक्यैस्तदवगमात्। केवलक्रियाया जलताडनादिवन्निष्फलत्वेन तत्र प्रेमपूर्वकत्वमभिव्यनक्ति भक्तिशब्दः। मत्सेवया प्रतीतञ्चेत्यादिवाक्येषु सर्वदा पूर्णत्वादिकथनात् प्रेमपूर्वककत्वस्यापि लाभात्। 'वशीकुर्वन्ति मां भक्ताः सत्स्त्रियः सत्पतिं यथे' त्यादावपि दम्पतिदृष्टान्तेन तल्लाभाच्च। अन्यथा तस्याः कायक्लेशजनकत्वेन स्वतः पुरुषार्थत्वोक्तिभङ्गप्रसङ्गात्। एवं सति प्रेम्ण एव प्रयोजकत्वेन प्रत्ययार्थत्वेन च प्राधान्याद् भजनस्य तद्रूपत्वेन भावरूपत्वम् तस्य मनोधर्मत्वादिति व्याकरणशास्त्रसरणिः। 'सापराऽनुरक्तिरीश्वरे' इति शाण्डिल्यसूत्रादनुरक्ति रूपायास्तस्या भावरूपत्वेन तद्वाच्यार्थे अभिव्यक्ततयाभजनस्यापि तथा, यतो भावरूपत्वमत एव साधनरूपत्वं फलरूपत्वमुभयमपि सम्भवति। भावे सिद्धे अग्रे फलस्य तदतिरिक्तस्याभावात्। 'अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसीती'ति तत्त्वरूपलक्षणात्। तच्च प्रेमभक्तिरसस्य शृङ्गाररसस्य स्थायिभावरूपम् भावलक्षणं च रसानुकूलो विकारो भावः। स्थायित्वञ्च तस्य चरमसमयपर्यन्तस्थायित्वात्। अतएवापुष्टपुष्टस्य तस्यैव साधनफल-

रूपत्वं युक्तम्। अपुष्टो भावरूपः पुष्टो रस रूप इति रसशास्त्रमर्यादा। स्थायी भावो रसः स्मृतइत्युक्ते तथा च पुष्टापुष्टोभयदशायामपि न रसत्वक्षतिः। यथा पूर्वंमङ्कुरितस्य वृक्षस्य प्रौढदशावृत्तावपि वृक्षस्थितिरिति तदाहुः तस्य साधनत्वेऽपि न क्षतिरिति। तस्य फलरूपस्य साधनत्वेऽपि न फलरूपत्वक्षतिरित्यर्थः। तथा च रसरूपं फलम्। तच्च तदेवपूर्वभावरूपं भूत्वा स्वकार्यं साधयतीत्य-तस्तस्यैवावस्थाद्वयमिति बोध्यम्। वस्तुतस्तु प्रेम्णोऽवस्थात्रयं भवति, प्रेमासक्तिर्व्यसनं चेति। अतएव श्रीमदाचार्यचरणाः 'ततः प्रेम तथाऽसक्तिर्व्यसनञ्च यदा भवेदित्याहुः। पुष्टिमार्गः स एवेतियत्र फलं स्वयमेव साधनमिति। अयमर्थः यदा हि भगवाननुगृह्णाति नहि तत्र साधनापेक्षा। किन्तु महता साधनेनाप्यऽलभ्यमपि निःसाधनतयैव केवलं भगवत्प्रसादेनैव लभ्यं भवति। 'किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन' इत्युक्तेः। तथाचानुगृह्य भगवान् फलमेव ददाति। तच्च दोषबाहुल्यात् पूर्वमपरिपूर्णोभूत्वातन्निवृत्तिरूपं साधनकार्यं कृत्वा पुनः पूर्णतया रसरूपो भवतीति भावः। तच्च भावरूपं रसरूपञ्च फलं भगवानेवेति राद्धान्तः। 'रसोवैस' इति श्रुतेः। 'स्थायी भावो रसः स्मृतः इत्युक्तेश्च भावरूपत्वेन फलरूपत्वेन च साधनफलोभयरूपत्वमपि भगवति सिद्धम्। अत एव हि भगवानेव हि फलमिति श्रीमदाचार्यचरणाः। अतः सुष्ठूक्तं श्रीमद्धरिरायचरणैरपि फलं स्वयमेवेति। स्वयं भगवानेवेत्यर्थः। स्वस्वरूपबलेन स्वप्रमाणं पुष्टिरित्युच्यते इति, 'गतेरर्थत्व'मिति सूत्रभाष्येऽपि। तथा च साधनानपेक्षत्वे सति साधनानन्यफला पुष्टिरिति लक्षणं बोध्यम्। शमदमादिसाधनव्यावृत्यर्थं सत्यन्तं पदम्। न चात्र श्रवणादीनां साधनत्वमिति वाच्यम्। तेषामप्यत्र प्रेम्णाऽ विनाभावितेन फलरूपत्वात पौर्वापर्येणापि सम्भवाच्च। तत्र प्रमाणमाचार्योक्तिरित्याहुः असकृदुक्तमाचार्यैरितिसुबोधिन्यादावुक्तमित्यर्थः। एतदेव लीला निदर्शनेनोपष्टम्भयन्त आहुः। अतएवेति उच्यतेश्री भागवतादावुच्यते इत्यर्थः।

पुनराशङ्कामाहुः

नन्वंशत्वेऽपीति। साम्यात् सेव्यसेवकभावाभावेन तदनुपपत्तिरित्यर्थः। नेति निषिद्धय समादधते बहुस्यामिति। न्यूनत्वसत्वे सेव्यसेवकभावसिद्धौः नानुपपत्तिस्तदवस्थेत्यर्थः। ननु सृष्टौ उच्चनीचभावेन प्रादुर्भावेच्छा, न तु मुक्तिदशायामतो न्यूनत्वस्याऽवास्तवत्वान्मुक्तिदशायां जीवन्मुक्तौ साम्यमन्यथा लय इति सेव्यसेवकभावानवसरेण भजनानुपत्तिस्तदवस्थैवेत्याशङ्कते। नन्वेवमिति—नेति निषिद्धय समादधते। न्यूनत्वविशिष्टस्यैवेति। तस्येतिजीवस्येत्यर्थः। प्रथमतोऽवधिपर्यन्तं पुष्टिसृष्टित्वेनैव भगवता विचारितत्वादितिभावः। 'एष उं एव साधु कर्म कारयति तं यमेभ्योलोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषती 'त्यादि श्रुतेः' अन्यथा भक्तिमार्गोच्छेदप्रसङ्गेन 'मत्सेवया प्रतीतञ्चे' त्यादि वचनव्याकोपापातात् नन्वेवं सति न्यूनत्वस्य वास्तवत्वे तत्र वस्तुस्वभाव एव कारणं न त्विच्छेत्याशयेन आशङ्काभाहुः—

नन्विति—नेति निषिद्धय समाधानभाहुः। इच्छाया इतिवस्तुस्वभावोऽपीच्छाकृत एव वस्तुनोऽपि कर्तृपरतन्त्रत्वाद् यादृशं वस्तुस्वरूपं यादृशश्च स्वभावस्तादृशाविर्भावे स्वेच्छायाः कारणत्वं न तु तत्स्वरूपान्यथा कृतौ। प्रयोजनाभावेन तादृशेच्छाया एवासत्वादित्यर्थः। तस्मादितिस्वरूपान्यथाकृत्तौ इच्छायाः कारणत्वाभावाद्धेतोः। कौस्तुभरूपेणेति'चैत्यस्य तत्त्वममलं मणिमस्य कण्ठ' इत्याद्युक्तेः। कैमुतिकन्यायस्तु स्पष्ट एव। भाव इति'बहुस्यां प्रजायेये'ति श्रुतेर्भाव इत्यर्थः। अथ वास्तवत्वं युक्त्यैवोपष्टम्भयन्ति। अत एवेति। वास्तवत्वादेवेत्यर्थः। अपरिमितानाम् असंख्यातानाम्। वह्निविस्फुलङ्गवन्निर्गमेऽपीति असकृन्निर्गमेऽपीत्यर्थः। न न्यूनतेति।

न्यूनाधिकभावः। स च समत्वात् कथं सम्भवतीत्यर्थः। तथा चात्र समाधानं वक्तुमाहः—अत्र वदामीतिसमाधानं कथयामीत्यर्थः। अभेदेनेतिकारणरूपः कार्यस्वरूपश्च स्वयमेवेत्यभेदेनेत्यर्थः।

अन्यथेतिपृथक्करणे वैचित्र्याभावेनेति। पृथक्करणं वैचित्र्यार्थम्। वैचित्र्यं चात्र न्यूनाधिकभावरूपम्। तथा च न्यूनाधिकभावरूपेण वैचित्र्याभावेनेत्यर्थः। अत एवेति वैचित्र्यादेवेत्यर्थः। एकैकांशतिरोभाव इतिएकैकांशाधिक्येन तिरोभावः इत्यर्थः। सच्चिदानन्दरूपोऽन्तर्यामी। तदपेक्षया जीवे एकस्यानन्दांशस्येति भावः। जड़े चिदानन्द-योस्तिरोभावः इत्येकाधिक्यमिति भावः। तथेच्छाचेतिएकाधिक्यां-शतिरोभावेच्छेत्यर्थः। तादृशतिरोभावस्य स्वतन्त्रता निराकरणार्थ श्चकारः। अत इति। इच्छात इत्यर्थः। समुदित रूपस्येति। स्वस्थ समुदिरूपस्येत्यर्थः। ननु स्वरूपस्य पृथक्कृतिः कथं भवेदित्याशङ्कायामाह तच्चेत्यादि। तत्रेतिस्वरूपस्य पार्थक्ये सति। ननु तथा सतिस्वस्य भोक्तृत्वानुपपत्तिरितिचेत्तत्राहुः मूलरूपेणेति। क्रीडाबन्धमोक्षाभ्यामिति। क्रीडा रमणम् अविद्यया विद्यया चेत्यर्थः। न च तर्हि मूलरूपास्यापि बद्धमुक्तत्वाभ्यां जीवतुल्यतापत्तिरिति वाच्यम्। वद्धमुक्तव्यतिरिक्त स्वरूपेणैव तस्य स्थिततत्वात्। अंशित्वेन तद्भेदाश्च। 'बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य माया मूलत्वान्न मे मोक्षो न बन्धनमि'ति प्रभुचरणोक्तेः। तत इतियतो बन्धमोक्षाभ्यां क्रीडा तस्मादित्यर्थः लीलानित्यवत्वसिद्धय इति। लीलोपकरणस्य प्रपञ्चस्य लीलायाश्च नित्यत्वात् तत्सिद्धयः इत्यर्थः। प्रपञ्चस्य प्रपञ्चरूपस्य भगवद्रूपत्व 'तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम्। आविर्भावतिरोभाव जन्मनाश विकल्पवदि'त्यादि वाक्यानि बहूनि सन्तीति दिक्। भाष्यनिबन्धविद्वन्मण्डनादिषु विस्तरेण निरूपितं श्रीमदाचार्यचरणैः। अत इतोऽधिक प्रेप्सावद्भिस्तत्र द्रष्टव्यम्। उपकरणस्य नित्यत्वाल्लीलाया नित्यत्वं कैमुतिकन्याय सिद्धम्। अन्यथा उपकरण नित्यत्ववैयर्थ्यापातात्। भगवद्भोक्तृत्व-स्यानित्यतापत्तेश्च लीलाया नित्यत्वं तु—

'जयति जन निवासो देवकीजन्मवादो।
यदु वरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम्।।
स्थिरचरवृजिघ्नः सुस्मितः श्रीमुखेन व्रजपुखनितानां वर्द्धयन्कामदेवमि'ति ।

वाक्ये जयतीति वर्त्तमान प्रयोगेण अस्यन्निति वर्धयन्निति च ।।

शत्रन्तपदाभ्यां वर्तमानत्वं श्री शुकैरुक्तमित्यादि विवृतं विद्वन्मण्डने श्रीमद्विट्ठलाचार्य चरणैर्विस्तरभियाऽत्र न प्रपञ्च्यत इति।

ख. प्रस्थानत्रयविमर्शः

प्रस्थीयते = अभिव्यज्यते ब्रह्मविद्यायेन तत्प्रस्थानम्, त्रयोऽवयवा यस्य तत् त्रयम् प्रस्थानानां त्रयं प्रस्थान त्रयं तेषां विमर्शः सङ्क्षेपेणं तत्रस्थ पदार्थ विचारः।

तथाहि—उपनिषद् ब्रह्मसूत्र गीतानां प्रस्थानत्वेन ग्रहणं भवति।

उपनिषत् = उपनिपूर्वस्य 'षद्लृ' विशरण गत्यवसादनेष्विति धातोः क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति। सामीप्यवाचि उपोसर्गेण प्रत्यगात्मनो ब्रह्मसामीप्यमुच्यते। सामीप्यञ्च तयोरभेद रूपं विवक्षितम्। निशब्दो निश्चयार्थकः। तथा चोपसर्गद्वयेन प्रत्यगात्मब्रह्मणोरभेद निश्चयरूपा विद्योक्ता। विशरणावसादनगतयोधात्वर्याः। क्विप् प्रत्ययश्चात्र कर्तरि विवक्षितः। तथा च प्रत्यगात्म ब्रह्मगोचरा विद्या विदुषामनर्थं शातयति शिथिली करोति अवसादयति नाशयति वा ब्रह्म गमयति वा इत्युपनिषच्छब्द व्युत्पत्या सफला ब्रह्म विद्योच्यते।

अथवा उप = सामीप्येन विषयतया नि = नितरां ब्रह्मस्वरूपं परमश्रेयोऽस्यां विद्यायां स्थितमित्युपनिषद् ब्रह्म विद्या। ग्रन्थेषु ब्रह्म विद्या प्रयोजकत्वाल्लक्षणयोपनिषच्छब्दप्रयोगः।

ईशावास्यैतरेयकठकेन छान्दोग्यतैत्तिरीय प्रश्न माण्डूक्य मुण्डक वृहदारण्यकोपनिषद्इति मुक्तिकोपनिषदि अष्टोत्तरशतोपनिषदां परिगणना विद्यते।

'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः'।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा।।
ब्रह्म कैवल्य-जाबाल-श्वेताश्व हंस-आरूणिः।
गर्भो नारायणो हंसो, विन्दु नादशिरः शिखा।।

मैत्रायणीकौषीतकी वृहज्जाबाल तापनी।
कालाग्निरूद्र मैत्रेयी सुबालक्षुरि-मन्त्रिका।।
सर्वसारं निरालम्बं रहस्यं वज्रसूचकम्।
तेजोनाद-ध्यान-विद्या-योग्यतत्वात्मबोधकम् ।।
परिव्राड्-त्रिशिखि-सीता चूडा निर्व्वाणमण्डलम्।
दक्षिणाशरभंस्कन्द महानारायणाऽद्वयम्।।
रहस्यं राम तपनं वासुदेवञ्च मुद्गलम्।
शाण्डिल्यं पैङ्गलं भिक्षु महत् शारीरकं शिखा।।
तुरीयातीत सन्यासपरिव्राजाक्षमालिका।
अव्यक्तैकाक्षरं पूर्णा सूर्य्याक्ष्यध्यात्म-कुण्डिका।।
सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम्।
त्रिपुरातापनं देवी त्रिपुराकठ भावना।।
हृदयं कुण्डली भस्म रूद्राक्षगणदर्शनम्।
तारसार महावाक्य-पञ्चब्रह्माग्निहोत्रकम्।।
गोपालतापनं कृष्ण याज्ञवल्क्य वराहकम्।
शाट्यायनी हृयग्रीवं दत्तात्रेयं च गारुडम्।।
कलि जाबाली सौभाग्यरहस्यऋचमुक्तिका।।

शुक्लयजुर्वेदान्तगतोपनिषदः-

१. अतीताध्यातम्, २. ईशावास्यम्, ३. जावालम्, ४. तारसारः, ५. तुरीयम्, ६. त्रिशिखी, ७. निरालम्बम्, ८. परमहंसः, ९. पैङ्गलम्, १०. ब्राह्मणमण्डलम्, ११. ब्राह्मणद्वयतारकम्, १२. भिक्षुः १३. मन्त्रिका, १४. मुक्तिका, १५. याज्ञवल्क्यम्, १६. वृहदारण्यकम्,. १७. शाट्यायनी, १८. सुबालः १९. हंसः।

सामवेदान्तर्गतोपनिषदः–

१. अव्यक्तम्, २. आरुणिः, ३. कुण्डिका, ४. केन, ५. छान्दोग्यम्, ६. जाबालदर्शनम्, ७. जावाली, ८. महत्, ९. मैत्रायणी, १०. मैत्रेयी, ११. योग चूडामणिः, १२. रूद्राक्षम्, १३. वज्र सूचिकम्, १४. वासुदेवम्, १५. सन्यासः, १६. सावित्री।

ऋग्वेदान्तर्गतोपनिषदः–

१. अक्षमलिका, २. आत्मप्रबोधः, ३. ऐतरेयः, ४. कौषितकी, ५. त्रिपुरा, ६. नादविन्दुः, ७. निर्वाणम्, ८. मुद्गला, ९. वह्वचा, १०. सौभाग्यम्।

अथर्ववेदान्तर्गतोपनिषदः–

१. अथर्वशिखा, २. अथर्वशिरः, ३. कृष्णः, ४. गणपतिः, ५. गरुडः, ६. गोपालतापनम्, ७. जाबालम्, ८. त्रिपुरातापनम्, ९. दत्तात्रेयः, १०. देवी, ११. नारदपरिव्राजकः, १२. नृसिंहतापनी, १३. परिव्राजकान्नपूर्णा, १४. परमहंसः, १५. पाशुपतम्, १६. भस्म, १७. भावना, १८. महानारायणम्, १९. महावाक्यम्, २०. माण्डूक्यम्, २१. मुण्डकम्, २२. रामतापनी, २३. रामरहस्यम्, २४. वृहज्जावालम्, २५. शरभम्, २६. शाण्डिल्यम्, २७. सीता, २८. सूर्यात्म, २९. हयग्रीवः, ३०. परब्रह्म।

ईशावस्योपनिषदि—अष्टादश मन्त्राः सन्ति तत्र प्रत्येकं मन्त्रः अज्ञानबन्धोच्छेदने समर्थः ईश्वरेण व्याप्तोऽयं संसारः तस्याः प्रथमो मन्त्रः—

ईशा ँ वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधाः कस्य स्विद्धनम्।।

अयं भाव—ईशावास्यमिति। ईशा ईष्टेऽतीट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। सहि सर्वभीष्टे सर्वजन्तूनामात्मा स-प्रत्यगात्मतया। तेन स्वेन रूपेणात्मनेशा वास्यम्च्छादनीयम्। किम् इदं

सर्वं यत्किञ्च यत्किचिज्जगत्यां पृथिव्यां जगत्तत् सर्वम् स्वेनात्मना। ईशेन् प्रत्यगात्मतया अहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं परमात्मना। यथा चन्दनागर्वादेरूदकादि-सम्बन्धजक्लेदादिजमौपाधिकं दौर्गध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादि लक्षणं जगत् द्वैतरूपं जगत्यां पृथिव्यां, जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रय संन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसम्बन्धिताया अभावादात्मानं पालयन्ति अतः त्यागेनेत्ययमेवार्थः। भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः, गृधिमाकांक्षां मा कार्षीर्धनविषयाम्। कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा, मा गृधः। कस्मात्? कस्यस्विद्धनं इत्याक्षेपार्थो न कस्यचिद्धनमस्ति यत् गृध्येत्। आत्मेवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वम्। अतो मिथ्या विषयां गृधिं मा कार्षीरित्यर्थः।

'षष्ठसप्तमौ मन्त्रौ'–

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।६।।

अयं भावः—यः परिव्राट् मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तान्यात्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः सर्वभूतेषु च तेष्वेव चात्मानं तेषामपि भूतानां स्वमात्मानात्मत्वे न यथास्य देहस्य कार्यकारणसंघातस्यात्माहं सर्व प्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्ता नामधेयात्मेति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणात्मनोऽन्यद् दुष्टं पश्यतो भवति। आत्मानमेवात्यन्तं विशुद्धं

निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव। ततो न विजुगुप्सते इति।

यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।

अयं भावः यस्मिन्सर्वाणि भूतानि। यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृतः परमार्थवस्तु विजानतः तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः। शोकश्च मोहश्चंकामकर्मवीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः। को मोहः कः शोक इति शोकमोहयोरविद्या कार्ययोराक्षेपेणासम्भवप्रदर्शनात्सकारणस्य संसारस्य अत्यन्तमेवोच्छेदः प्रदर्शितो भवति।

कठोपनिषदि द्वावध्यायौस्तस्तत्रप्रथमाध्यायस्य द्वितीयाध्यायस्य द्वितीयायाः वल्ल्याः द्वितीयोमन्त्रः।

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमात् वृणीते।।

यद्युभे अपि कर्तुं स्वायत्ते पुरुषेण, किमर्थं प्रेय एवादत्ते वाहुल्येन लोक इत्युच्यते सत्यं स्वायत्ते तथापि साधनतः फलतश्च मन्दबुद्धीनां दुर्विवेक रूपे सती व्यामिश्रीभूते इव मनुष्यं पुरुषं एतः प्राप्नुतः श्रेयश्च प्रेयश्च। अतो हंस इवांभसः पयः तौ श्रेयः प्रेयः पदार्थौ सम्परीत्य सम्यक् परिगम्य मनसालोच्य गुरूलाघवं विविनक्ति पृथक्करोति धीरो धीमान्। विविच्य च श्रेयो हि श्रेय एवाभिवृणीते प्रेयसोऽभ्यर्हितत्वात् श्रेयसः। कोऽसौ धीरः। यस्तु मन्दो ऽल्पबुद्धिः स सदसद्विवेकासाथ्यात् योगक्षेमाद्योगक्षेमनिमित्तं शरीराद्युपचयरक्षणनिमित्तमित्येतत् प्रेयः पशुपुत्रादिलक्षणं वृणीते।

ऐतरेयोपनिषदितद्ध्रृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति। एष ब्रह्मैष इन्द्र

एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्रणीव। बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किं चेदं प्राणि जंगमं च पतत्रिच यच्च स्थावरं सर्वं तत्प्रज्ञाननेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म।

केनोपनिषदि—

ब्रह्म यस्य ज्ञातं नहि तंस्यैव ज्ञातमिति यः कथयति मया ज्ञातं स न जानाति।

यस्यामतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम्।।

छान्दोग्योपनिषदि नारदं प्रति सनत्कुमारस्योपदेशः—'यो वै भूमा तदमृतम् अथ यदल्पन्तन्मर्त्यम् (७.२४) तैत्तिरीयोपनिषदि—

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन्प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महत्कीर्त्या इति षष्ठोऽनुवाकः माण्डूक्योपनिषदि नान्तः प्रज्ञं न वहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृश्यमव्यवहार्यं मग्राह्यमलक्षणमचित्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।

मुण्डकोपनिषदि—

अविद्यायां बहुधा वर्तमाना
वयं कृतार्था इत्यभिमन्यन्ति बालाः।
यत्कर्मिणो न प्रवेदयन्ति रागा
तेनातुराः क्षीणलोकाश्च्यवन्ते।।

किञ्च अविद्यायां बहुधाबहुप्रकारं वर्तमानां वयमेव कृतार्थाः कृत प्रयोजना इत्येवमभिमन्यन्त्यभिमन्यन्ते अभिमानं कुर्वन्ति बाला अज्ञानिनः। यत् यस्मादेवं कर्मिणो न प्रवेदयन्ति तत्वं न जानन्ति रागात्कर्म फलरागामिभव निमित्तं तेन कारणेनातुरा दुःखार्ताः सन्तः क्षीणलोकाः क्षीणकर्मफलाः स्वर्गलोकाच्च्यवन्ते। वृहदारण्य-कोपनिषदि—

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवाव शिष्यते।।

इदमाकूतम् अदः निरूपाधिकं परोक्षं तत्पदार्थरूपं ब्रह्म पूर्णमाकाशवद् व्यापिनिरन्तरं यदिदं नामरूपोपाधि विशिष्टं व्यवहारापन्नं त्वं शब्दार्थरूपं तदपि निरूपोध्यात्मकरूपेणैव पूर्णम् नतु विशिष्टरूपेण पूर्णम्।

तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात् कारणात्मन उदच्यते = उदित्यते = उद् गच्छतीत्येतत्।

यद्यपि कार्यात्मनोदच्यते तथापि यत्स्वरूपं पूर्णत्वं परमात्मभावं तन्न जहाति पूर्णमेवोदच्यते।

पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णत्वमादाय = गृहीत्वा आत्मस्वरूपैकरसत्वमादाय, विद्यया अविद्याकृतं भूतमात्रोपाधिसंसर्ग-जमन्यत्वाभासंतिरस्कृत्य पूर्णमेवानन्तरमवाह्यं प्रज्ञानधनैकर-सस्वभावं केवलं ब्रह्मावशिष्यते।

द्वितीयप्रस्थानं बह्मसूत्रम्

चतुरध्यायी शारीरक मीमांसा 'अथातो ब्रह्म जिज्ञासा' इत्यादिरनावृत्ति; शब्दादित्यन्ता, जीव ब्रह्मैकत्वसाक्षात्कारहेतुः श्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता। तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात्परम्परया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणितात्पर्यमिति समन्वयः प्रथमाध्याये। प्रदर्शितः। तत्र च प्रथम पादे स्पष्ट ब्रह्मलिङ्गयुक्तानि वाक्यानि

विचारितानि। द्वितीये त्वस्पष्टालिङ्गान्युपास्य ब्रह्म विषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः। चतुर्थपादे तु प्रधानविषयत्वेन संदिह्यमानान्यव्यक्ताजादि पदानि चिन्तितानि। एवं वेदान्तानामद्वये ब्रह्मणि समन्वये सिद्धे तत्र सम्भावित स्मृतितर्कादि विरोधमाशङ्क्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राद्य पादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादि प्रयुक्तैस्तर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः। द्वितीये पादे सांख्यादि मतानां दुष्टत्वं प्रतिपादितम्। स्वपक्षस्थापनपरपक्षनिवारणरूपपर्वद्वयात्मकत्वाद्वि-चारस्य। तृतीये पादे महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्वभागेण परिहृतः। उत्तरभागेन तु जीवविषयाणाम्। चतुर्थपादे त्विन्द्रियविषयश्रुतीनां विरोधः परिहृतः। तृतीयेऽध्याये साधन-निरूपणम्। तत्र प्रथमपादे जीवस्य परलोकगमनागमननिरूपणेन वैराग्यं निरूपितम्। द्वितीये पादे पूर्वभागेण त्वं पदार्थशोधितः। उत्तर भागेण तत्पदार्थः। तृतीये पादे निर्गुणे ब्रह्मणि नानाशाखापठितः पुनरूक्तपदोपसंहारः कृतः। प्रसङ्गाच्च सगुणनिर्गुण विद्यासु शाखान्तरीय गुणोपसंहारानुपसंहारौ निरूपितौ। चतुर्थे पादे निर्गुणब्रह्मविद्याया बहिरङ्गसाधनान्याश्रमयज्ञदानादीन्यन्तरङ्गसाधनानि शमदमनिदिध्या-सादीनि च निरूपितानि। चतुर्थेऽध्याये सगुणनिर्गुणविद्ययोः फलविशेष निर्णयः कृतः। तत्र प्रथमपादे श्रवणाद्यावृत्या निर्गुणं ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यालेपलक्षणा जीवन्मुक्तिरभिहिता। द्वितीये पादे म्रियमाणस्योक्रन्तिप्रकारश्चिन्तितः। तृतीये पादे सगुणब्रह्मविदो मृतस्योत्तरभार्गोऽभिहितः। चतुर्थे पादे पूर्वभागेण निर्गुण ब्रह्मविदो विदेहकैवल्यप्राप्तिरूक्ता। उत्तरभागेण सगुणब्रह्मविदो ब्रह्मलोक-स्थितिरुक्तेति। इदमेव सर्वशास्त्राणां मूर्धन्यम् शास्त्रान्तरं सर्वस्यैव शेषभूतमितीदमेव भुभुक्षुभिरादरणीयं श्रीशङ्करभगवत्पादोदितप्रकारणेति रहस्यम्।

तृतीयप्रस्थानम्ः

'श्रीमद्भगवद्गीता' तथाहि—श्रीकृष्णद्वैपायनः भगवदुपदिष्टमर्थं सप्तशततमैः श्लोकैरूपनिबन्धस् तत्र च प्रायशः श्रीकृष्णमुखान्नि-

सृतानेव श्लोकान् लिखत काँश्चित् तत्सङ्गतये स्वयं व्यरचयत् तदुक्तं गीतामाहात्म्ये—

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विस्नसृता।।
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं हत्।।

उपनिषदां सारत्वादेव श्रीमद्भगवद्गीतायाः कृते गीतोपनिषदिति व्यवहारो भवति।

तत्र गीतायामुक्तं तत्वमिति सङ्क्षेपेणविमृशत्ययञ्जनः।

यथा वेदे कर्मकाण्डोपासनाकाण्डज्ञानकाण्डभेदेन त्रयः काण्डाः वरीवृत्यन्ते तथैव गीतायामपि कर्मोपासनाज्ञानकाण्डाः सन्ति। गीतायां 'तत्वमसि' वाक्यार्थोवर्णितः। तथाहि—भगवता कृष्णेन प्रथम षट्के कर्म तत्त्यागपथा त्वं पदार्थो निरूपितः। द्वितीयषट्के भगवद्भक्तिनिष्ठावर्णनवर्त्मना तत्पदार्थो निरूपितः, तृतीयषट्के तत्पदार्थत्वंपदार्थयोरैक्यवर्णनमुखेन ज्ञाननिष्ठा प्रतिपादिता।

प्रथमं तावदात्मतत्वोपदेशकारणीभूतशोकमोहप्रदर्शनीयो-पोद्घातत्वेन प्रथमाध्यायीनिरूपितः द्वितीयाध्यायेतु सूत्ररूपेण समस्तगीतशास्त्रस्यार्थः प्रतिपादितः तथाहि—पाठक्रमादर्थक्रमो बलीयानिति न्यायेनादौनिष्काम कर्मनिष्ठा ततोऽन्तः करणशुद्धिस्ततः शमदमादिसाधनपुरस्सरः सर्वकर्मसन्यासस्ततो वेदान्तवाक्यविचारसहिता भगवद्भक्ति निष्ठा ततस्तत्वज्ञाननिष्ठा तस्याः फलञ्च त्रिगुणात्मिकाविद्यानिवृत्या जीवन्मुक्तिः प्रारब्धकर्मभोगपर्यन्तम् तदन्ते च विदेहमुक्तिः जीवनमुक्तिदशायां परमपुरुषार्थावलम्बनेन परवैराग्यप्राप्तिः परवैराग्योपकारिणी दैवी सम्पदा नाम्नी शुभभावना ग्राह्या तद्विरोधिनी असुरसम्पदाख्याऽशुभभावना हेया, दैवी सम्पदोऽसाधारणं कारणं सात्विकी श्रद्धा आसुरी सम्पदोऽसाधारणं कारणं राजसी श्रद्धा तामसी श्रद्धा च अनयारीत्या सर्वं गीतातत्वं निहितं द्वितीयाध्याये द्वितीयाध्यायोक्त पदार्थस्यैव षोडशाध्यायैर्विस्तरः कृतस्तदर्शयति—

योगस्थः[६] कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।

इत्यादिना सूत्ररूपेण सत्वशुद्धिसाधनभूता या निष्काम कर्मनिष्ठा वर्णिता तस्याएव निष्ठायाः तृतीयाध्याये सामान्यरूपेण वर्णनं कृतम्, चतुर्थाध्याये तु विशेषवर्णनं ततः शुद्धान्तःकरणस्य।

विहाय[७] कामान् यः सर्वान् पुमांश्चरति निस्पृहः।
निर्भमो निरहङ्कारः स शान्तिमधिगच्छति।।

इत्यादिना सूत्ररूपेण प्रतिपादितायाः शमदमादिसाधन-सम्पत्तिपूर्वकायाः सर्वकर्मसन्यासनिष्ठायाः सङ्क्षेपेण पञ्चमाध्याये निरूपणं विस्तरेण तु षष्ठाध्याये वर्णनं विद्यते एवं रीत्या प्रथमषट्के त्वं पदार्थो निरूपितः। एवं हि—

"तानि[८] सर्वाणि संयम्य युक्त आसीतमत्परः इत्यादिना" सूत्ररूपेण प्रतिपादितायाः भगवद्भक्तिनिष्ठायाः षड्भिरध्यायैः प्रतिपादनं कृतम्। तावता च तत्पदार्थोनिरूपितः—

वेदाविनाशिनं[९] नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थं कं घातयति हन्ति कम्।।

इति सूत्रेणबोधितायाः तत्त्वं पदार्थैक्यज्ञानरूपायाः तत्वज्ञाननिष्ठायाः प्रकृतिपुरुषविवेकद्वारा प्रपञ्चित ज्ञाननिष्ठायाश्च त्रयोदशेऽध्याये वर्णनं कृतम्। तयोः निष्ठयोः फलम्।

त्रैगुण्य[१०]विषया वेदा निस्त्रैगुण्यो भावार्जुन इत्यादिना सूत्रिता त्रैगुण्यनिवृत्ति; चतुर्दशाध्याये वर्णिता सैव जीवन्मुक्तिः तस्या एव गुणातीतलक्षणेन विस्तरः कृतः।

यदा[११] ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदागन्तासि निर्वेदं श्रोतव्यस्यश्रुतस्य च।।

इति सूत्रेण बोधितायाः परमवैराग्यनिष्ठायाः संसारवृक्षच्छेदन मुखेन पञ्चदशाध्याये प्रतिपादनं विहितम्।

दुःखे ष्वनुद्विग्न मनः सुखेषु विगतस्पृहा।
वीतरागभयक्रोधः स्थितधीर्मुनिरूच्यते।।

इत्यादिना स्थितप्रज्ञलक्षणेन परमवैराग्योपकारिणी दैवी सम्पत् आदेयेति।

यामिमां[१३] पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेद वादरताः पार्थ नान्यदस्तीति वादिनः।।

इत्यादिना सूत्रिता तद्विरोधिनी आसुरीसम्पच्चत्याज्येत्युक्तं तयोरेव सुस्पष्टतया षोडशाध्याये वर्णनं कृतम्।

निर्द्वन्द्वो[१४] नित्यसत्वस्थो निर्योगक्षेम आत्मवान् इत्यादि सूत्रेण बोधिताया दैवीसम्पदोऽसाधारणं कारणं सात्विकी श्रद्धा तस्या एवं वर्णनं सप्तदशाध्यायेऽभिहितम्।

एवञ्च सफलज्ञाननिष्ठाध्यायपञ्चकेन प्रतिपादिता अष्टादशाध्याये तु पूर्वोक्तसर्वोपसंहारः। भगवताधिकारिभेदेन सांख्यबुद्धिमाश्रित्य ज्ञाननिष्ठायाः प्रतिपादनं कृतम् योगबुद्धिमाश्रित्य कर्मनिष्ठायाः वर्णनं कृतम्। इतिशम्।

सुविदितमेतद्विदुषां यद्भक्तवत्सलेन भगवता वासुदेवेन महाभारतीय युद्धकालेउभयसैन्येषु स्वसम्बन्धिजनदर्शनेन विषीदिनोऽर्जुनस्य ज्ञानोपदेशेनाविवेकरूपं कालुष्यमपनीतम्।

ततः कियता कालेन भोगप्रयोजक प्रारब्धकर्म प्राबाल्याद्विस्मृत्यार्जुनः पुनर्भगवन्तं ब्रह्मोपदेशं प्रार्थितवान् ततोभक्तवत्सलो भगवान् सङ्क्षेपेण पुनस्तस्मै उपदिदेश तदुपदेश एव 'उत्तरगीता' नाम्ना प्रसिद्धः अस्यां त्रयोऽध्यायाः सन्ति तत्र ये विषयाः सन्ति तेषु काँश्चित् विषयान् परिगणयति यथा—ब्रह्मणः स्वरूपम्, तज्ज्ञानोपायभूत धारणाप्रकाशादिकम्, ज्ञाननिष्ठस्यजीवन्मुक्तेर्मुक्तेश्च स्वरूपम् धूमार्चिमार्गनिरूणार्थमिडापिङ्गलादि नाडीस्वरूपम्, कुण्डलिन्या उपासनाप्रकारः तत्वज्ञानपर्यन्तं कर्मानुष्ठानावश्यकत्वम् उपासनाप्रतिबन्धकतया पाण्डित्यादेर्हेयत्वम् वैराग्योपायाः योगिनः

सर्वदर्शित्वम् उक्तयोगसिद्धौ पुर्नजन्माद्यभाव उत्तरगीतायां प्रायः एते विषयाः निरूपिताः।

प्रसङ्गतः प्रस्थानभेदानपि निरूपणं क्रियते।

प्रस्थीयते = ज्ञायते अभ्युदयनिःश्रेयसोपायः येनतत्प्रस्थानम् = शास्त्रम्।

तथाहि—ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः। शिक्षा कल्पो व्याकरणं निरूक्तं छन्दो ज्योतिषमिति वेदाङ्गानि षट्। पुराण न्याय मीमांसा धर्मशास्त्राणि चेति चत्वार्युपाङ्गानि। अत्रोपपुराणानामपि पुराणेऽन्तर्भावः। वैशेषिकशास्त्रस्य न्याये। वेदान्तशास्त्रस्य मीमांसायाम्। महाभारतरामायणयोः सांख्यपातञ्जल-पाशुपतवैष्णवादीनां च धर्मशास्त्रे। मिलित्वा चतुर्दश विद्याः। तथाचोक्तं याज्ञवल्क्येन—

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चर्तुदश।।

एता एव चतुर्भिरूपवेदैः सहिता अष्टादश विद्या भवन्ति। आयुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं चेति चत्वार उपवेदा सर्वेषां चाऽस्तिकानामेतावत्येव शास्त्रप्रस्थानानि। अन्येषामप्येकदेशिना-मेतेष्वेवान्तर्भावात्।

ननु नास्तिकानामपि प्रस्थानान्तराणि सन्ति तान्येतेष्वनन्त-र्भावात्पृथग्गणयितुमुचितानि। तथाहि—शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्।

क्षणिकविज्ञानमात्रवादेनान्यद्योगाचाराणाम्। ज्ञानाकारानुमेय-क्षणिकवाह्यार्थवादेनापरं सौत्रान्तिकानाम्। प्रत्यक्षसलक्षणक्षणिकवाह्यार्थ-वादेनापरं वैभाषिकाणाम्। एवं सौगतानां प्रस्थानचतुष्टयम्। तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणाम। एवं देहातिरिक्त देहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम्।

सर्वेषां च सङ्क्षेपेण त्रिविध एव प्रस्थानभेदः। तत्राऽरम्भवाद एकः। परिणामवादो द्वितीयः विवर्त्तवादस्तृतीयः। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्वयणुकादिक्रमेण ब्रह्माण्डपर्यन्तं जगदारभन्ते। असदेव कार्यंकारकव्यापारादुत्पद्यत इति प्रथमस्तार्किकाणां मीमांसकानां च। सत्वरजस्तमो गुणात्मकं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते। पूर्वमपि सूक्ष्मरूपेण सदेवकार्यंकारणव्यापारेणाभिव्यज्यत इति द्वितीयः पक्षः सांख्ययोगपाताञ्जलपाशुपतानाम्। ब्रह्मण परिणामो जगदिति .वैष्णवानाम्। स्वप्रकाशपरमानन्दाद्वितीयं ब्रह्म स्वमायावशान्यिथ्यैव जगदाकारेण कल्पत इति तृतीयः पक्षो ब्रह्मवादिनाम्। सर्वेषां प्रस्थानकर्तृणां मुनीनां विवर्तपदपर्यवसानेनाद्वितीये परमेश्वर एव प्रतिपाद्ये तात्पर्यम्। न हि ते मुनयाभ्रान्ताः सर्वज्ञात्वात्तेषाम्। किन्तु वहिर्विषयप्रवणानामापाततः पुरुषार्थे प्रवेशो न सम्भवतीति नास्तिक्यवारणाय च तैः प्रकारभेदाः प्रदर्शिताः। तत्रतेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेप्यर्थे तात्पर्यमुत्प्रेक्ष्यमाणस्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना नानापथजुषो भवन्तीति सर्वमनवद्यम्।

।। इति शम् ।।

卐

ग. शुद्धाद्वैतवादस्य प्रस्थानत्रयविमर्शः

शुद्धाद्वैतसिद्धान्ते श्रौतन्यायस्मार्तभेदेन प्रस्थानत्रय सत्त्वेऽपि चतुर्थमपि प्रस्थानं विद्यते तथा च वक्तुं शक्यतेऽस्मिन्सिद्धान्ते प्रस्थानचतुष्टयी श्रौतप्रस्थानमुपनिषत्, न्यायप्रस्थानं ब्रह्मसूत्रम्, स्मार्तप्रस्थानं गीता, चतुर्थप्रस्थानं श्रीमद्भागवतम्। यतोहि जीवानामुपकारको भक्तिमार्गः 'पोषणं तदनुग्रहः' अर्थात् पुष्टिमार्गः। अतएव सम्प्रदायिकैरूक्तम्—

१. वेदः[१५] श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि समाधि भाषा व्यासस्य प्रमाणं तच् चतुष्टयम्—

उत्तरं पूर्वसन्देहवारकं परिकीर्तितम्
अविरुद्धन्तु यत्वस्य प्रमाणं तच्चान्यथा।
एतद्विरुद्धं यत्सर्वं न तन्मानं कथञ्चन।।

श्रीमद्भागवतस्य प्रतिपाद्यन्तु महर्षिणा व्यासेन स्वयमेव प्रतिपादितम्—

धर्मः[१६] प्रोज्झित कैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृतेकिं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्।।

अयं भावः श्री भागवतस्य सर्वशास्त्रेभ्यश्रैष्ठ्यमनुबन्ध-चतुष्कदर्शनमुखेन दर्शयति धर्म इति-महामुनि = श्री नारायणः प्रथमं सङ्क्षेपतः चतुः श्लोकीरूपेण ततो विस्तरेण च कृते प्रकाशिते अत्र = अस्मिन् श्रीमति = परमसुन्दरे भागवते प्रोज्झितं = प्रकर्षेण उज्झितं कैतवं = कपटं = फलाभिसन्धिरूपं यस्मिन् सः। प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः। निर्मत्सराणां = परोत्कर्षासहनं मत्सरस्तद्रहितानां सतां = शिष्टानां परमः = ईश्वराराधनलक्षणः धर्मः निरूप्यते। अत्र शिष्टा अपि काम्ये कर्मणि प्रवर्तमानाः

क्वचिन्मत्सरमबलम्बन्ते तद्व्यावृत्यर्थं निर्मत्सराणामिति। अत्रशिवदं = परमसुखप्रदं तापत्रयस्य = आध्यात्मिकादिकस्य उन्मूलनं नाशकं वास्तवं परमार्थभूतं वस्तुवेद्यं यद्वा वस्तुनोंशो जीवो वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्तुत्वेन न ततः पृथगितिवेद्यम्। त्रयस्तापाश्च आध्यात्मिकम् आधिभौतिकम् आधिदैविकम् तत्र आध्यात्मिको द्वेधा शारीरोमानसञ्च। आद्यो ज्वरादिनः द्वितीयो शोकादिजः। आधिभौतिको मानुषपश्वादिजः आधिदैविको यक्षभूतादिजः। परै = शास्त्रैः तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुद्ध्यते = स्थिरीक्रियते वः शब्दः कटाक्षे। किं तु विलम्बेन कथंचिदेव अत्र तु कृतिभिः = पुण्यशालिभिः शुश्रूषुभिः = श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुद्ध्यते। यद्वा अत्र ईश्वरः कृतिभिः शुश्रूषिभिः सद्यस्तत्क्षणादेव हृद्यवरुध्यते। अतः परैः शास्त्रैः किं वा साध्यमिति। अत्र महामुनिकृते इति कर्तृतः श्रैष्ठयम् धर्मः प्रोज्झितकैतव इति कर्मकाण्डेम्यः निर्मत्सरणामित्यधिकारितः वेद्यं वास्तवमित्यादिना ज्ञानकाण्डशास्त्रेभ्यः चतुर्थपादेन देवकाण्डशास्त्रेभ्यः श्रैष्ठ्यं दर्शितम्।

अत्र परमात्मरूपं वस्तुविषयः तापत्रयोम्मूलनं प्रयोजनम्, सन्ताअधिकारिणः, विषयप्रयोजनयोः प्रतिपाद्य प्रतिपादक भाव सम्बन्धः। इत्यनुबन्धा दर्शिताः।

अन्यत्र शास्त्रेईश्वरे मनोनिरूध्येत इत्येव पुरुषार्थः। अत्र तु ईश्वरो हृद्यवरुध्यते अतो निर्गन्तुं न शक्नोति तच्चावरोधनं सद्य एव विनापि श्रद्धयेति कापि श्री कृष्णाकार्षिणीया महाविद्येति सूच्यते।

अत्रेति पदस्य निरूक्तिरवधारणार्था। अत्रैवेश्वरोवरुद्ध्यते। अत्रैव वास्तवं वस्तुवेद्यमत्रैव प्रोज्झित कैतवोर्थो निरूप्यते।

द्वादशस्कन्धात्मिकाष्टादशसाहस्त्रीयं संहिता। सङ्क्षेपेण श्रीमद्भागवतीयविषयो विमर्श्यते।

अत्र [१७] ब्रह्म परं गुह्यं जगतः प्रभवाप्ययम्।
ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतम्।।

भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयम्।
पारीक्षितमुपाख्यानं नारदाख्यानमेव च।।
प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः।
योगधारणयोत्क्रान्तिः संवादो नारदाजयोः।
अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः।।
विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः।
पुराणसंहिता प्रश्नो महापुरुषसंस्थितिः।।
ततः प्राकृतिकः सर्गः सप्तवैकृतिकाश्च ये।
ततो ब्रह्माण्डसम्भूतिर्वैराजः पुरुषो यतः।।
कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः।
भुव उद्धरणेऽम्भोधेर्हिरण्याक्ष वधो यथा।।
ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च।
अर्धनारीनरस्याथ यतः स्वयम्भुवो मनुः।।
शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा।
सन्तानो धर्मपत्नीनां कर्दमस्य प्रजापतेः।।
अवतारो[१८] भगवतः कपिलस्य महात्मनः।
देवहूत्याश्च संवादः कपिलेन च धीमता।।
नवब्रह्म समुत्पत्तिर्दक्षयज्ञविनाशनम्।
ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनवर्हिषः।।
नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः।
नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च।।
द्वीपवर्ष समुद्राणां गिरिनद्युपवर्णनम्।
ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः।।

दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च सन्ततिः।
यतो देवासुरनरास्तिर्यङ्नगखगादयः।।
त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः।
दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः।।
मन्वन्तरानुकथनं गजेन्द्रस्य विमोक्षणम्।
मन्वन्तरावताराश्च विष्णोर्हयशिरादयः।।
कौर्मं धान्वन्तरं मात्स्यं वामनं जगत्पतेः।
क्षीरोदमथनं तद्वदमृतार्थे दिवौकसाम्।।
देवासुरमहायुद्धं राजवंशानुकीर्तनम्।
इक्ष्वाकुजन्मतद्वंशः सुद्युम्नस्य महात्मनः।।
इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च।
सूर्यवंशानुकथनं शशादाद्या नृगादयः।।
सौकन्यं चाथ शर्यातिः ककुत्स्थस्यचधीमतः।
खट्वाङ्गस्य च मान्धातुः सौभरेः सगरस्य च।।
रामस्य कोसलेन्द्रस्य चरितं किल्विषापहम्।
निमेरङ्गपरित्यागो जनकानां च सम्भवः।।
रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः।
ऐलस्य सोमवंशस्य ययातेर्नुहुषस्य च।।
दौष्यन्ते[११] र्भरतस्यापि शन्तनोस्तत्सुतस्य च।
ययाते र्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः।।
यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः।
वसुदेव गृहे जन्म ततो वृद्धिश्च गोकुले।।
तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः।
पूतनासुपयः पानं शकटोच्चाटनं शिशोः।।

तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः।
धेनुकस्य सह भ्रातुः प्रलम्वस्य च संक्षयः।।
गोपानां च परित्राणां दावाग्नेः परिसर्पतः।
दमनं कालियस्याहेर्महाहेर्नन्दमोक्षणम्।।
व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः।
प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनम्।।
गोवर्धनोद्धारणं च शक्रस्य सुरभेरथ।
यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु।।
शङ्खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः।
अक्रूरागमनं पश्चात् प्रस्थानं रामकृष्णयोः।।
व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः।
गजमुष्टिकचाणूरकंसादीनां च यो वधः।।
मृतस्यानयनं सूनोः पुनः सान्दीपनेर्गुरोः।
मथुरायां निवसता यदुचक्रस्य यत्प्रियम्।
कृतमुद्धवरामाभ्यां युतेन हरिणाद्विजाः।।
जरासन्धसमानीतसैन्यस्य बहुशो वधः।
घातनं यवनेन्द्रस्य कुशस्थल्या निवेशनम्।।
आदानं पारिजातस्य सुधर्मायाः सुरालयात्।
रूक्मिण्या हरणं युद्धे प्रमथ्यद्विषतोहरेः।।
हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनम्।
प्राग्ज्योतिषपतिंहत्वा कन्यानां हरणं च यत्।।
चैद्य[२०] पौण्ड्रकशाल्वानां दन्तवक्त्रस्य दुर्मतेः।
शम्बरो द्विविदः पीठो सुरः पञ्चजनादयः।।३९।।

माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनम्।
भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान्।।४०।।
विप्रशापापदेशेन संहारः स्वकुलस्य च।
उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः।।४१।।
यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः।
ततो मर्त्यपरित्यागआत्मयोगानुभावतः।।४२।।
युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः।
चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा।।४३।।
देह त्यागश्च राजर्षेर्विष्णुरातस्य धीमतः।
शाखा प्रणयनमृषेर्मार्कण्डेयस्य सत्कथा।
महापुरुषविन्यासः सूर्यस्य जगदात्मनः।।४४।।
इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः।
लीलावतारकर्माणि कीर्तितानीह सर्वशः।।४५।।
पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन्।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात्।।४६।।

शुद्धाद्वैतवादिभिराचार्यैरूपनिषद् ब्रह्मसूत्रगीताश्रीमद्भागवतोपरिभाष्यं कृतम्। श्रीमद्भागवतस्यापि स्मार्तप्रस्थानत्वेन स्वीकारे तु शुद्धाद्वैतसिद्धान्तेऽपि प्रस्थानत्रयमेव।

विमर्शः

श्रुतिशिरोभूतमुपनिषत्प्रमाणं तदनुसारीणि शारीरकसूत्रादीनि च प्रमाणान्यादाय भारतीयैराचार्यैः विद्वद्धौरेयैः स्वस्वमनीषानुकूलं श्रुतिसूत्रादिवाच्यार्थलक्ष्यार्थतात्पर्यार्थञ्च परस्परविलक्षणमेव निश्चिन्वानैः वेदान्तदर्शने बहूनि मतानि प्रचारमानीतानि तान्येव वादा इति अद्यत्वे व्यवह्रियन्ते। ते च सामान्यतो वर्गद्वये विभक्तुं शक्यन्ते। द्वैतवादः अद्वैतवादश्चेति। तत्र द्वैतवाद एकविध एव। अद्वैतवादस्तु दशविधः।

द्वैतवादः श्रीमन्मध्वाचार्येण प्रवर्तितः। अत्र नित्यानेव पञ्चविधान् भेदान् स्वीकृत्य मुक्तिदशायामपि जीवेश्वरयोः तारतम्यं स्वीक्रियते। नामतोऽपि अद्वैतं नात्र सोढव्यं भवति। अद्वैतवादस्तु-केवलाद्वैतवादः भेदाभेदवादः (प्रथमः) भेदाभेदवादः (द्वितीयः) विशिष्टाद्वैतवादः-द्वैताद्वैतवादः शैवविशिष्टाद्वैतवादः, वीरशैवविशिष्टाद्वैतबादः शुद्धाऽद्वैतवादः अविभागाद्वैतवादः अचिन्त्यभेदाभेदवादश्च। तत्र केवलाद्वैतवादः श्रीमच्छङ्कराचार्यस्य मतम्। अद्वैतवाद इत्यपिगीयते। प्रथमोभेदाभेदवादो भास्कराचार्य सम्मतः। अत्र भेद औपाधिकः अभेदस्तु स्वाभाविकः स्वीकृतः। द्वितीयोभेदाभेदवादः यादवप्रकाशाचार्यमतम्। अत्र भेदाऽभेदश्च द्वयमप्यनौपाधिक एव स्वीकृतः। अयमाचार्यः श्रीरामानुजाचार्यस्य पूर्वपक्षाध्ययने गुरुरासीत् इति तदीयेतिहासपरिशीलनतोऽवगम्यते। विशिष्टाद्वैतवादः श्रीमद्-रामानुजाचार्यसिद्धान्तः। अत्र चिदचिदीश्वररूपं तत्वत्रयमङ्गीकृतम्। चिदचिद्विशिष्टस्य ईश्वरस्य अद्वैतत्वं तू भेदेऽपि शरीर-विशिष्टस्यैकत्वाद्विशिष्टाद्वैत रूपम्। द्वैत्तऽद्वैतवादः श्रीमन्निम्बार्काचार्य-मतम्। अस्मिन् मते भेदप्रतिपादिकाः श्रुतयः जड़ानां जीवानाञ्च परस्परं परमेश्वरतः भेदं बोधयन्ति। अभेदप्रतिपादिकास्तु परमेश्वरस्य अद्वितीयत्वं प्रतिपादयन्तीति वर्णितम्। भेदाभेदौ द्वावपि सत्यावेवेति च दृढतया कथितम्।

शैवविशिष्टाद्वैतवादस्य प्रवर्तकः आचार्यः श्रीकण्ठः। अत्र शिवस्यैव पारम्यमभिप्रेतम् वीरशैवविशिष्टाद्वैतवादस्याचार्यः श्रीपतिः। शैव विशिष्टाद्वैतवादादत्रावन्तरभेदसत्वेऽपि शिवस्य पारम्ये न मतभेदः। अविभागाद्वैतवादी विज्ञानभिक्षुराचार्यः। विज्ञानामृतभाष्यं ब्रह्मसूत्रेषु कुर्वन्नयं जीवस्य ब्रह्मणा सह अविभागे सति अद्वैतत्वं सम्पद्यत इति सिद्धान्तयति स्म।

अचिन्त्यभेदाभेदवादः गौडीयवेदान्तः। श्रीमच्चैतन्यमहाप्रभु-सम्प्रदायानुसारिणः इममेव सिद्धान्तमाश्रयन्ते। अत्र जीवेश्वरयोः भेदोऽभेदश्च स्वीकृतो अपि सनचिन्तयितुं शक्यते इति अचिन्त्यभेदाभेदएव तयोरिति वर्णितम्। यद्यप्यं सम्प्रदायः

मध्वाचार्यसम्प्रदायस्य शाखैव तथापि आन्तरो मतभेदोऽनल्पः। उक्तेषु अद्वैतवादेष्वन्यतमो वादः शुद्धाद्वैतवादः। अस्याद्य प्रवर्तकः आचार्यः श्रीविष्णुस्वामी। पश्चाच्च श्रीमद्वल्लभाचार्यः। अत्र मते—

मायासम्बन्ध-रहितं शुद्धमित्युच्यते बुधैः।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्।।

इत्युक्तरीत्या अखण्डसच्चिदानन्दविग्रहं शुद्धमेव श्रीकृष्णस्यायं लीलेच्छया तिरःकृतानन्दांश जीवरूपेण न्यग्भावितचिदानन्दोभयांशञ्चजडात्मक प्रपञ्चरूपेण। आविर्भवति। आविर्भवितसच्चिदानन्दोभयांशञ्च अन्तर्यामिस्वरूपेण आविर्भवति। 'स एकाकी न रमते' 'स द्वितीयमैच्छत्' 'एकोऽहं बहुस्याम इत्यादि श्रुतयः शुद्धस्य ब्रह्मणः जगदाकारेण भवनं समर्थयन्ति। 'लोकवत्तु लीलाकैवल्यमिति सूत्रयन् भगवान् व्यासोऽपि तादृशमेवाशयमुपनिषदां प्रकाशयामास। शुद्धस्यैव ब्रह्मणः कार्यकारणरूपतया कार्यकारणयोश्चानन्यतया अद्वैतत्वं तस्येति शुद्धाद्वैतवादसमाख्यापिसंगच्छते। जड़जीवभावेन आविर्भवतोऽस्य शुद्धस्य ब्रह्मणः जड़जीवगतदोषभाक्त्वप्रसञ्जनं चिन्तामण्यादिदृष्टान्तेन नित्यशुद्धत्वाङ्गीकारेण निवारितं भवति एवं जगतस्तिरोभावोऽपि स्वकीयलीलासंवरणविषयया तदीयया इच्छया एव भवति।

अविर्भावपदार्थश्च जीवगतस्य अन्तर्यामिगतस्य विद्यमानवस्तुविषयकानुभवस्य विषयत्वयोग्यतात्मको विवक्षितः। विषयता योग्यत्वञ्च विषयतावच्छेदधर्मवत्त्वमेव। तादृशानुभवविषयतायोग्यताऽभाव एव तिरोभावपदार्थः। इमौ आविर्भावतिरोभावौ ब्रह्मगते नित्यभूते शक्त्येव।

'पराऽस्यशक्तिः विविधैवाश्रयते 'इति श्रुतेः। उक्तञ्च 'शक्तिस्तु सिद्धा प्राक्तेन शक्तात् हेतो बहिः स्थितिः। आविर्भावः तिरोभावस्तस्मिन्नेव स्थितिर्मतेति।

मृदादि भगवद्रूपं घटाद्यकारसंयुतम्।
मूलेच्छातस्तथा तस्मिन् प्रादुर्भावो हरेस्तथा।

तिरोभावस्तथैव स्यात् रूपान्तरविभेदतः।।

इति तत्वप्रदीपोक्त्या अजन्मनः परमेश्वरस्यैव सर्वाकार-भवनविषयकवीक्षणपूर्वक जगद्रूपेण प्रादुर्भावात् प्रपञ्चस्य भगवद्रूपतया शुद्धस्यैव ब्रह्मणोऽद्वितीयत्वं सिद्ध्यति।

एतन्मते ब्रह्मणः सविशेषत्वम् अप्राकृतशरीरवत्वात् साकारत्वम् प्राकृतगुणरहितत्वात् निर्गुणत्वम् जीवस्याणुत्वं ब्रह्मांशभूतत्वञ्चाभिमतम्। ज्ञानापेक्षया भक्तिरेवश्रेष्ठा सैव च साक्षात् परमपुरुषार्थसाधनमिति मन्वते। भक्तिपदार्थस्तु श्रीकृष्णविषयकप्रेमपूर्वककायिकव्यापारत्वं श्रीकृष्णविषयकपरमस्नेहत्वं वाङ्गीकृतः। गुरुभक्त्यादावव्याप्तिस्तु 'आचार्यं मां विजानीयात् नावमन्येत कर्हिचित्। इत्यादि वचनेन गुरुभगवतोरभेद प्रतिपादनात् वारिता भवति। श्रीकृष्णत्वन्तु परब्रह्मत्वं सच्चिदानन्दविग्रहत्वं वा स्वीकृतम्। स च श्रीकृष्णः सर्वदा अप्राकृताकारविशिष्ट एव भवति।

भक्तिश्चात्र द्विविधा स्वीकृता। उपासना मार्गीया भक्तिः भक्तिमार्गीया भक्तिश्च। तत्र साक्षात् मोक्षसाधनतया तान्त्रिकदीक्षापूर्वकं विहितत्वेन क्रियमाणा श्रवणकीर्तनादिरूपा भक्तिरूपासना भक्तिरित्युच्यते। सत्संगलब्धया भक्तया मयि मां य उपासितेत्युक्ते। 'स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् 'इत्युक्तः वैष्णवमार्गोऽयमेव प्रोच्यते।

भक्तिमार्गीयभक्तिस्तु त्रिविधा प्रवाहिकी भक्तिः, मर्यादा भक्तिः, पुष्टिर्भक्तिश्चेति। तत्र भक्तिमार्गीय भक्तकृतभक्तिः साम्प्रदायिकदीक्षापूर्वकं मोक्षसाधनत्वेन क्रियमाणाश्रवणकीर्तनादिरूपा भक्तिः। प्रवाहिकी-त्युच्यतेलोकप्रवाहवत् मुक्तिफलकत्वेन विहितत्वात्। अत्र नारायणाष्टाक्षरादिमन्त्राणां वैदिकीदीक्षा विवक्षिता।

आत्मनिवेदनसहितपञ्चाक्षरोपदेशग्रहणपूर्वकं प्रेमात्मकं भक्तिसाधनत्वेन क्रियमाणं श्रवणादिकं मर्यादाभक्तिः।

मामेकं शरणं व्रजेत्यादि वाक्यतात्पर्यं पर्यालोचनादितः एवमवगमात्। भगवति परमस्नेहोत्पत्यनन्तरं स्वव्यसनतः पुरुषार्थत्वेन

क्रियमाणश्रवणादिकं पुष्टिभक्तिः। इयमेव भक्तिसर्वत उत्तमा सिद्धान्तिता। आसु च भक्तिषु कामनाभेदेन अधिकारिभेदः विवक्षितः। अस्या एव पुष्टिभक्तेः समर्थकं 'मत् सेवया प्रतीतं च सालोकादि चतुष्टयम् नेच्छन्तिसेवयापूर्णाः कुतोऽन्यत्कालविप्लुतम् इत्यादिकं वाक्यम्। अयं भक्तिमार्गः ज्ञानमार्गादपिं श्रेष्ठः यतो भक्तिमार्गसाधनतया ज्ञानमार्गस्योपयोगोवर्णितः। ज्ञानमार्गे वाधकानामपि कामादीनां भक्तिमार्गे साधकत्वेन ब्रह्मसूत्रादिषु प्रतिपादनाच्च। तथा च वादरणीयं सूत्रम् 'कामादितरत्र तत्र चायतनादिभ्यः इति'।

पुष्टिदायस्तु भगवदनुग्रहविशेष ऐवेति पोषणं तदनुग्रह इति भागवतवाक्यादवगम्यते। स चानुग्रह विशेषः आत्मनिवेदिष्वेव भक्तेषु भवति इति सम्प्रदायरहस्यम् 'यमेवैष वृणुते तेन लभ्य इतिश्रुतेः। अयमेव पुष्टिमार्ग इत्युच्यते। तदुक्तम्-समस्तविषयत्यागः सर्वभावेन यत्र वै। समर्पणञ्च देहादेः पुष्टिमार्गः स उच्यते इति।

।। इतिशम् ।।

卐

घ. शुद्धाद्वैतं विशुद्धाद्वैतं वा

शुद्धाद्वैतं नास्त्यपितु विशुद्धाद्वैतमेव सिद्धान्तः। श्री विष्णुस्वामिसम्प्रदायस्य विस्तार कर्तृणां श्रीमद्वल्लभाचार्यस्य विशुद्धाद्वैतसिद्धान्तादन्येषां सिद्धान्तानां तुलनात्मकं विमर्शः।

श्रीवल्लभाचार्याणां	**श्रीमच्छङ्कराचार्याणां सिद्धान्तः**
१. विशुद्धाद्वैतवादः	१. अद्वैतवादः
२. प्रमाणादिसर्वं सत्यं केवलं-ब्रह्मैव स्वेच्छा परमार्थतः वशात् प्रमाणादिरूपै र्विचित्रां लीलां करोति	२. प्रमाणादीनि व्यावहारिकाणि सत्यं ब्रह्मैव।
३. प्रमाणं वेदाः साङ्गाः श्रीमद्-भगवद्गीतामीमांसाद्वयम् श्रीमद्भागवतञ्चेति प्रस्थान-चतुष्टयम्।	३. प्रस्थानत्रयं प्रमाणम्।
४. वेदोनारायणः साक्षादि'ति प्रामाण्यात्तस्यर्थिकत्वम्।	४. जगदन्तःपातित्वाद्वेदानामपि न पारमापारमार्थिकत्वम्।
५. प्रमेयं ब्रह्मैव।	५. प्रमेयं ब्रह्मैव।
६. सर्वधर्मविशिष्टत्वं ब्रह्मणः। सर्वधर्माणां च ब्रह्माभिन्नत्वं स्वाभाविकत्वं च, धर्मधर्मिणोऽविकृतरूपाः।	६. निर्गुणं निराकारं ब्रह्म।
७. आनन्दमयमेव ब्रह्मसैवपरा-काष्ठा न ततः परं किञ्चिद-परं किञ्चिदस्तीति।	७. आनन्दमयो न ब्रह्म किन्तु ततः परं ब्रह्मअन्यदेव।
८. सगुणनिर्गुणेतिकल्पना पराप-रेति विद्याद्वैविध्यं नाङ्गीक्रियते	८. सगुणनिर्गुणेति कल्पना परापरेति विद्याद्वैविध्यं च

ब्रह्मणो विरुद्धधर्माद्वैविध्यं च सर्वस्य सुसङ्गतत्वात्।	स्वीक्रियते।
९. ब्रह्मैव स्वतोऽभिन्ननिमित्तोपादानकारणकर्तृत्त्वेन तयाकर्तृ।	९. परमार्थतोऽकर्तृभूतं ब्रह्मैवमाया वशात् प्रतीयते।
१०. जगतः सत्यत्वादभेदसम्भवः।	१०. जगतोसत्यत्वाब्रह्मणानन्यत्वं न सम्भवति।
११. सच्चिद्गुप्तानन्दाद् ब्रह्मणोऽग्नेर्विस्फुलिङ्गव दंशात्मक जीवोत्पत्तिः। स चजीवोनित्यः।	११. अविद्यावशाद् ब्रह्मैव जीवरूपेण भासते।
१२. तदविद्यानाशे तत्संसारनाशः- न तु जीवनाशः।	१२. विद्ययाऽविद्यानिवृतौ जीवत्वनाशः।
१३. जीवो ज्ञातृरूपो धर्मी च।	१३. जीवश्चसम्यक् ज्ञानस्वरूपो नतु ज्ञातृरूपः।
१४. आनन्दांशतिरोभावेन व्यापकोऽपि जीवोऽणुरूप एव पुनरानन्दांशप्रादुर्भावे व्यापकश्च।	१४. जीवो विभुर्बुद्धिसंयोगादणुपेण भासते।
१५. ईशेच्छया जायमानं जीवस्य-कर्तृत्वभोक् तृत्वादिकं परमार्थिकम्।	१५. जीवस्य कर्तृत्वभोक्तृत्वादिकं न पारमार्थिकम्।
१६. विरूद्ध धर्माश्रयतया जीवो ब्रह्मण अंशोगर्भदासश्च।	१६. जीवः प्रतिविम्वभूत आभासः।
१७. ब्रह्मैव स्वेच्छावशादनेकजीव-रूपाणिधारयित्वा विचित्र-लीलाः करोति।	१७. ब्रह्म माययानेकजीववद्भासते।
१८. अविकृतपरिणामवादः।	१८. विवर्तवादः।

१९. आविर्भावतिरोभावौ	१९. अध्यारोपापवादौ।
२०. प्रकारभेदेनाख्यातिरन्यथा-रूव्यातिश्च।	२०. अनिर्वचनीयख्यातिः।
२१. भक्तिरन्या उपासनाचान्या-कर्मोपासनाज्ञा नानि भक्तेरङ्गानि	२१. कर्म, उपासना ज्ञानमिति साधनक्रमः। भक्त्युपासन-योर्भेदानाभिमतः।
२२. सर्वाणि साधनानि कलात्म-कानि। ब्रह्मरूपाणि च।	२२. कर्मादीनि साधनानि जगदन्तः पातित्वाद पारमार्थिकानि।
२३. आत्यन्तिकदुःखनिवृत्तिपूर्वकं-परमात् परं प्राप्तिरूपो मोक्षः।	२३. कर्मदीनि साधनानि जगदन्तः पातित्वादपारमार्थिकानि
२४. मोक्षः प्रवेशात्मकसायुज्य-मित्यभिधीयते	२४. मोक्षः कैवल्यमित्यभिधीयते।
२५. भगवदिच्छाभगवल्लीलाद्या-लम्बनेनाद्वैतंप्रतिपाद्यते	२५. अविद्यामायाङ्गीकारेणाऽद्वैतं साध्यते।
२६. एकमेवाद्वितीयं वस्तु स्वेच्छया तत्तद्रूपेणपरिणमत इति मत्वाऽद्वैतं साध्यते।	२६. सर्वमलोकमिति मत्वाऽद्वैतं साध्यते।
२७. वेदस्याक्षरमप्यन्यथा न विरुद्धधर्माश्रयं ब्रह्मेति स्वी-कारेणसर्वोऽपिकल्प्यते। सर्व-श्रुत्यर्थो व्यवस्थाप्यते।	२७. तत्तच्छुतिव्यवस्थार्थ निर्गुण सगुणोपजीव्यत्वोपास्यत्व परब्रह्मत्वादिकल्पनम्।

श्रीरामानुजमततो विष्णुस्वामिवैलक्षण्यमुपन्यस्यते

श्रीमद्विष्णुस्वामिनां मतम्	श्रीमद्रामानुजाचार्याणां मतम्
१. विशुद्धाद्वैतम्	१. विशिष्टाद्वैतम्।
२. चिदानन्दांशप्रादुर्भावे चिदपि ब्रह्मैव।	२. जडस्य जडेनैवाभेदश्चिश्चिदैव।
३. वेदानुकूलानिसर्वाणि प्रमाणानि तत्संख्यानियमो नास्ति	३. प्रमाणानां त्रयम् तत्रागमस्य मुख्यत्वम्।
४. ब्रह्मैव प्रमेयम्	४. ब्रह्मैव प्रमेयम। परन्तु ब्रह्मणः चिदचिद्रूपे शरीरे तयोः परिणामं चाभ्युपगम्यते।
५. विरूद्धधर्माश्रयं ब्रह्म। सर्व दिव्यधर्मवदपि	५. सर्वदिव्यधर्मवद्ब्रह्न।
६. ब्रह्मणः कर्तृत्वम्	६. ब्रह्मणः कर्तृत्वम्।
७. अविकृत परिणामवादः	७. ब्रह्म शरीरं परिणमते।
८. जीवोऽणुरूपो व्यापकश्चानन्दाविर्भावे।	८. जीवोणुर्नित्यः कर्तृरूपश्च।
९. ब्रह्मैव नानारूपाणि स्वेच्छया धारयतीति आविर्भावतिरोभाववादस्वीकारात्।	९. जगत्संसारयोर्भेदो नास्ति।
१०. जगत्संसारयोर्भेदः	१०. जगत्संसारयोर्भेदो नास्ति।
११. भक्त्युपासनयोर्भेदः	११. नास्ति भक्त्युपासनयोर्भेदः।
१२. अविद्वद्दशायामन्यथाख्यातिः पूर्णज्ञानिदृष्ट्याऽख्यातिश्च।	१२. सत्ख्यातिः।

माध्वमततो विष्णुस्वामिनः वैलक्षण्यम्

श्रीविष्णुस्वामिमतम्	श्रीमाध्वमतम्
१. विशुद्धाद्वैतम्	१. द्वैतम्
२. वेदानुकूलं सर्वप्रमाणं तत्संख्या नास्ति प्रमाणपथम्।	२. प्रत्यक्षानुमानशब्दाः प्रमाणान्यतः
३. ब्रह्मैव प्रमेयम्	३. ब्रह्मणः प्रमेयत्वेऽपि जीवो जगदिति पृथ क्तत्वद्वयम्।
४. ब्रह्मजीवजगतां सर्वथैवाभेदः	४. ब्रह्मजीवजगतां कदापि नास्त्यभेदः।
५. ब्रह्मसधर्मकं निर्धर्मकं चेत्युभयविधम्	५. ब्रह्म सर्वदा सधर्मकमेव।
६. ब्रह्मणि विरुद्धधर्माश्रयता वर्तते।	६. न विरुद्धर्माश्रयत्वं ब्रह्मणः।
७. ब्रह्मैवाभिन्ननिमित्तोपादान-कारणम्	७. ब्रह्मनिमित्वकारणम्। प्रकृतिश्चोपादानकारणम्।
८. अखण्डाऽद्वैतम्	८. अनन्यत्वं नास्ति।
९. आध्यात्मिकमक्षरब्रह्मस्वरूपम्	९. न तथाप्रभिप्रेतम्।
१०. जीवो ब्रह्मणएवेच्छागृहीतं रूपम्	१०. जीवः पृथक्तत्वम्।
११. जीवस्य नित्यत्वं ज्ञातृत्वञ्च	११. तथैवात्रापि।
१२. अखण्डरूपस्यापि तस्या-नन्दांशप्रादुर्भावेव्यापकत्वम्	१२. जीवः सर्वदाऽणुरूपः।
१३. जीवस्य कर्तृत्व भोक्तृत्वे वर्तेते।	१३. तथैवात्रापि।

१४. इच्छाविपरिणामवत्त्वंजीवस्य	१४. नानात्वं पारमार्थिकत्वं च।
१५. अंशत्वादेवांशाशित्वेन ब्रह्मणा सहाभेदा:।	१५. यद्यपि जीवस्यांशत्वमुररीक्रियते तथापितस्मादेवांशत्त्व रूपकारणात्तस्य ब्रह्मण: सकाशाद्भेद:।

श्रीमद्भागवत्पादश्रीशङ्कराचार्याणां सिद्धान्तेन ब्रह्म निर्गुणं निर्विशेषं निराकारञ्चेति किन्तु श्रीमद्वल्लभाचार्या: इदन्नस्वीकुर्वन्ति तेषां मतमस्ति सर्वधर्मविशिष्टत्वं ब्रह्मण: सर्वधर्माणाञ्च ब्रह्मभिन्नत्वं स्वाभाविकत्वञ्च धर्मधर्मिणोऽविकृतरूपा:।

महाप्रभु: श्री वल्लभाचार्यस्तु तादात्म्यरूपमद्वैतं मनुते तद्दृष्ट्या ब्रह्मातिरिक्तं किमपिनास्ति ब्रह्म एव जगत्रूपेण परिणतोस्ति। विशुद्धाद्वैतसिद्धान्तस्य पुष्ट्यर्थं श्रुतीनां प्रमाणत्वेन उपन्यस्यन्ति।

'सदेव[२१] इदम् अग्र आसीद् एकमेव अद्वितीयं तद् ऐक्षत बहुस्यां प्रजाजेय—

स[२२] आत्मानं स्वयम् अकुरुत

एतद्धि[२३] सर्वाणि नामानि....रूपाणि....कर्माणि विभर्ति ऐतदात्म्यम्[२४] इदं सर्वं तत् सत्यं स आत्मा तत् त्वम् असि।

'सर्वं[२५]खलुइदं ब्रह्म' ।

अनेन ज्ञायते यद्विशुद्धाद्वैतस्यैव शुद्धाद्वैतसिद्धान्तेन ग्रहणम्।

।। इति शम् ।।

卐

(ङ) वल्लभाचार्य सम्प्रदाय विमर्शः

श्रीरुद्रब्रह्मसनकवैष्णवसम्प्रदायेषु मध्ये रुद्रसम्प्रदायस्य प्रमुखप्रवर्तकाद् विष्णुस्वामितो बहुकालानन्तरमुच्छिन्नोन्मुखपीठस्य पीठाधीश्वरतां स्वीकृत्य शुद्धाद्वैतस्य सिद्धान्तस्य प्रचारः प्रसारः कृतः तदेव सम्प्रदायो वल्लभसम्प्रदायत्वेन लोके विख्यातः।

यद्यपि शुद्धाद्वैतसिद्धान्तमधिकृत्य किञ्चिल्लिखितं तथापि दार्ढ्याय पुनर्लिख्यते।

श्रीमहाप्रभुवल्लभाचार्यैः शुद्धाद्वैतमिति दर्शनं प्रतिपादितं तत्तु श्रीशङ्कररामानुजमध्वनिम्बार्कचैतन्यादिभिः आचार्यैः प्रतिपादितदर्शनेभ्यो भिन्नं विद्यते। शुद्धयोः जीवप्रपञ्चयोः ब्रह्मणश्च अद्वैतम् अभिन्नत्वमस्ति। शुद्धं च तदद्वैतं चेति शुद्धाद्वैतम् अत्रेदं ब्रह्म कार्यकारणोभयरूपेण शुद्धं विद्यते। तत्तु नास्ति मायोपहितम्। मायासम्बन्धरहितत्वादेव अस्ति तस्य शुद्धत्वम्—

माया [२६] सम्बन्धरहितं शुद्धमित्युच्यते बुधैः।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्।।

सजातीय विजातीय स्वगतद्वैत-वर्जितमस्ति तद् ब्रह्म तत्र सजातीयाः सन्ति जीवाः विजातीया जड़ाः स्वगताश्च अन्तर्यामिणः, ऐश्वर्यसमन्वितं तद् ब्रह्म एषु त्रिषु सर्वत्र अनुस्यूतम् ओतं प्रोतमस्ति एवं त्रिरूपं भवति। परन्तु तैः रूपैर्निरूपितं यद् द्वैतं भेदः प्रतीयते तत्वतोऽस्ति तद्वर्जितम्। अस्तीदं ब्रह्म सगुणसाकारं सावयवं सविशेषं सप्रपञ्चं सर्वज्ञं सर्वशक्तिमत्, सर्वधर्मविशिष्टम् अनन्तमूर्तियुक्तम आश्रयभूतं सर्वधर्माणाम्। विरुद्धधर्माणां तत्र ब्रह्मणि न केवलं सहस्थितिर्विद्यतेऽपितु तत्त्वस्ति स्वाभाविकम्। विविधा विरोधिनो गुणास्तत्र विलसन्ति समवायेन। इदं वैविध्यं वैचित्र्यं विद्यते स्वस्य विभूतिः। अचेतनं जगत् चेतनाः जीवाः सन्ति तस्य विभावाः। सकलद्रव्येषु पदार्थेषु यद्यपि तद् ब्रह्म अवस्थितमस्ति पूर्णरूपेण तथापि जगज्जीवेश्वररूप त्रिविध तत्वेषु भिन्न भिन्नानुपातेन स्वगुणान्

प्रकटीकरोति। सद्रूपेण जगति, सच्चिदद्वयेन जीवेषु सच्चिदानन्दरूपेण चान्तर्यामिणि एवं त्रिविधरूपेण सर्वत्र तद् ब्रह्मव्याप्तमनुस्यूतमस्ति—

अनन्त[२७] मूर्ति तद् ब्रह्मह्यविभक्तं विभक्तिमत् विरुद्धसर्वधर्माणाम् आश्रयं युक्त्यगोचरम्।

एवम् अनेक विभागेषु विभक्तमपि तदस्त्यविभक्तम् स्वम् अनेकमपि तदस्त्येकम्। अत्र श्रीकृष्णः एव परं ब्रह्म पुरुषोत्तमपदवाच्यः। विविधरूपैः स एव सर्वत्र परिव्याप्तोऽस्ति। एवं नामरूपविभेदेन यदस्ति जगत् तत्सर्वमस्ति भगवद्रूपम्। स भगवान् ततः क्रीडति। अस्य ब्रह्मणः स्वतन्त्रकर्तृत्वं कारणत्वं विद्यते। समवायिनिमित्तरूपं तदस्ति कारणमुभयमपि अस्य ब्रह्मणः भगवतः पुरुषोत्तमस्य आधिभौतिकं रूपमिदं जगत्। स्वचिद् आनन्दरूपद्वयं तिरोधाय केवलं सदंशेन स भगवान् प्रकटीकरोति इदं जगत्। तिरोहितचिदानन्दत्वे जडत्वम् अत्र जगत् प्रायेण प्रपञ्चशब्देन प्रोक्तमस्ति। अयं प्रपञ्चोनास्त्यविद्याजन्यमायाकल्पितः मिथ्यात्मको विलासोऽपितु ब्रह्मकार्यत्वाद् अविकृतपरिणामत्वाद् यथार्थरूपो नित्यः।

ब्रह्मात्मकः प्रपञ्चो ब्रह्मकार्यः इति सिद्धान्तः पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्, सर्वं खल्विदं ब्रह्म इत्यादि श्रुतयः पूर्णरूपेण अत्र संगतार्था भवन्ति। प्रमेयरत्नार्णवे गो. बालकृष्णभट्टः प्रपञ्चस्य भगवद्रूपत्वं निरूपयति। अयं प्रपञ्चः न मायिको न वा भगवद्भिन्नः। किन्तु सत्यत्वाद आविर्भावतिरोभावशाली, नोत्पत्तिविनाशकम्।

तत्त्वार्थनिबन्धे महाप्रभुवल्लभाचार्यः सुस्पष्टरूपेण अस्य स्वरूपं प्रतिपादयति।

अयं प्रपञ्चो न प्राकृतः नापि परमाणुजन्यः नापि विवर्त्तात्मा नापि अदृष्टद्वारा जातः नापि असतः सत्तारूपः किन्तु[२८] भगवत् कार्यः परमकाष्ठापन्न वस्तुकृतिसाध्यः। तादृशो[२९]ऽपि भगवद्रूपः।

सर्वभवनसामर्थ्यरूपा माया हि भगवतः शक्तिस् तत्रैव स्थिता। अनयैव स्वशक्त्या स भगवान् स्वसदंशात् स्वात्मरूपं प्रपञ्चं सृजति।

परमकाष्ठापन्नेन भगवता एकोऽहं बहुस्याम इति स्वलीलार्थमेव समुद्भावितः प्रपञ्चोऽद्भुतः। एवं प्रपञ्चाविर्भावे विद्यते लीलैवहेतुः। पुनः स भगवान् स्वेच्छया एनं प्रपञ्चं स्वस्मिन्नेवोपसंहरति। अतः प्रलयोऽपि विद्यते तस्यैव लीला। अत्र प्रलयो नह्यस्ति प्रपञ्चस्य विनाशः, अपितु केवलं तिरोभावः। यतोह्यत्र प्रपञ्चस्यैवाविर्भावतिरोभावौ अभिमतौ नोत्पत्तिविनाशौ। एतौ द्वावपि स्तः भगवतो द्वे शक्ती = आविर्भावतिरोभावौशक्ती[२] वै मुरवैरिणः।

एवं कार्यरूपोऽयं प्रपञ्चो विद्यते ब्रह्मणः आविर्भावः तथा अस्य तिरोभावोऽस्ति कारणं ब्रह्म। एवं कारणाद् अस्ति अभिन्नत्वं कार्यस्य।

एषः प्रपञ्चो दुग्धदधिवद् नहि तस्य ब्रह्मणो विकारोऽपितु स्वर्णस्वस्तिकवद् अस्ति तस्य अविकृतः परिणामः। कनककुण्डल रूचकादिविविध कार्येषुपरिणयमानोऽपि सुवर्णपिण्डः सुवर्णरूपेण तत्र सर्वत्र अवस्थितो भवति। एवं ब्रह्मअपि यथा कार्यावस्थायां कुण्डलं नहि भिन्नं कारणदशायाः सुवर्णपिण्डात्। तथैव कार्यप्रपञ्चः कारणब्रह्मणः नहि भिन्नोस्ति। यथाहि स्वेच्छया कुण्डलितोऽपि कामपि विकृतिं नहि गच्छति एवं परमात्माऽपि। स भगवान् स्वचिदानन्दरूपे तिरोधाय स्वेच्छया स्वरमणार्थं केवलं स्वकीयसदंशेन प्रपञ्चरूपकार्येऽभिव्यक्तो भवति। अस्यां दशायामपि स विकृतिविहीन एव तिष्ठति। अतः कार्य कारणाभिन्नत्वाद् **ब्रह्माभिन्नोऽयं** प्रपञ्चः न मिथ्यात्वप्रतिपादनमत्र नाभिमतं शुद्धाद्वैतसिद्धान्ते।

अत्र[३०] शुद्धाद्वैतवेदान्ते संसारप्रपञ्चयोर्भेदो विद्यते। संसारस्तु अविद्याजन्यः। अतः मोक्षकाले अविद्याजनितस्य बन्धनरूपसंसारस्यैव लयो भवति न तु प्रपञ्चस्य।

संसारस्य लयो मुक्तौ न प्रपञ्चस्यकर्हिचित् जीवानां मुक्ति विषये प्रपञ्चविलयस्य अपेक्षा न भवति। केवलं संसारस्य विलयो भवति। प्रपञ्चस्य विलयस्तु पुरुषोत्तमश्रीकृष्णस्य आत्मरमणार्थमेव भवति। एवं प्रपञ्चस्य आविर्भावः तथैव तिरोभावः उभावपि विद्यते परमेश्वरस्य लीला।

आचार्य प्रवरैस्त्रिमार्गाणां निरूपणं कृतं ते च पुष्टिमार्गमार्यादामार्गप्रवाहमार्गेण प्रसिद्धाः।

१. पुष्टि[३१] मार्गः = पोषणं पुष्टिः—पोषणं तदनुग्रहः तथा चायं मार्गः भगवत्कृपया प्राप्यते। सर्वश्रेष्ठतमोमार्गः।

२. मर्यादा मार्ग = वेदप्रतिपादितः सज्जनैः स्वनुष्ठितोमार्गः।

३. प्रवाहमार्गस्तु त्याज्यः यतोहि तस्मिन् मार्गे सुखभोगेच्छया कर्तव्यपरायणता।

तदतिरिक्तास्तु विरुद्धमार्गाः आचार्यप्रवरस्य वैशाखकृष्णैकादश्यां १५३५ तमे वैक्रमीये मध्यप्रदेशस्थ रायपुर मण्डलान्तर्गत-चम्पारण्यनामके स्थाने प्रादुर्भावोऽभवत्।

अस्य पिता श्रीलक्ष्मणभट्ट माता च श्रीमती 'एल्लमागारू रिति'। आचार्यचरणानां संस्काराः शिक्षा दीक्षापठनपाठनदिकञ्च सर्वं काश्यामेव जातम्।

श्रीविल्वमङ्गलाचार्येण स्वप्ने दीक्षा दत्ता विजयनगरे पीठाधीश्वरतां स्वीकृत्याचार्यपीठस्य स्थापनाकृता।

तदनन्तरन्तु गार्हस्थ्यकारणात् पीठाधीश्वरतायां पुत्रपरम्परायाः प्राधान्यं जातम्। आचार्यप्रवरस्य श्री गोपीनाथः श्री विट्ठलनाथश्च द्वौ पुत्रौ आस्ताम्।

श्री विट्ठलनाथस्य सप्तपुत्राः आसन्

१. श्री गिरिधरः, २. श्री गोविन्दरायः, ३. श्री बालकृष्णः, ४. श्री गोकुलनाथः, ५. श्री रघुनाथः, ६. श्री यदुनाथः, ७. श्रीघनश्यामः।

श्री विट्ठलनाथस्य द्वारस्य परम्परा

१. श्रीविट्ठलनाथः

२. श्रीयदुनाथः

३. श्रीमधुसूदनः
४. श्रीमुरलीधरः
५. श्रीब्रह्मराजः
६. श्रीपद्मराजः
७. श्रीप्रद्युम्न मुनिः
८. श्रीहृषीकेशः
९. श्रीवासुदेवः
१०. श्रीपरमानन्दः
११. श्रीकल्याण दासः
१२. श्रीप्रेमाः
१३. श्रीसाँवलदासः
१४. श्रीरतनदासः
१५. श्रीकिशनदासः
१६. श्रीकञ्चनदासः
१७. श्रीहंसदासः
१८. श्रीजगन्नाथदासः
१९. श्रीपीताम्बरदासः
२०. श्रीबालमुकुन्ददासः
२१. श्रीगणेशदासः
२२. श्रीसेवादासः
२३. श्रीचेतनदासः
२४. श्रीमहन्तहरिदासः
२५. श्रीमहान्तप्रेमदासः

श्री विट्ठलनाथस्य चतुर्थपुत्र
श्री गोकुलनाथस्य द्वारस्य परम्परा

१. श्रीगोकुलनाथः

२. श्रीविट्ठलरायः

३. श्रीगोवर्धननाथः

४. श्रीगणेशनाथः

५. श्रीधरणीधरदासः

६. श्रीलोकदासः

७. श्रीगोमतीदासः

८. श्रीराधिकारमणदासः

९. श्रीयुगलदासः

१०. श्रीपुरुषोत्तमदासः

११. श्रीरामनारायणदासः

१२. श्रीकेशवदासः

१३. श्रीदेवादासः

१४. श्रीजानकीदासः

१५. श्रीहनुमानदासः

१६. श्रीबाबारामशरणदासः

१७. श्रीबाबाश्यामसुन्दरदासः

वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः।।

।। इतिशम् ।।

卐

१. श्रीमद् रामकृष्ण भट्ट विरचिते शुद्धाद्वैतपरिष्कारे।
२. तत्वदीपे।
३. अष्टछाप ग्रन्थे पृ. ३९५। (हरिराय विरचिते)
४. पुष्टिमार्ग लक्षणानि अष्टछापग्रन्थे हरिराय विरचिते ब्रह्मवादे।
५. ईशोपनिषत्।
६. गीता २.४८।
७. गीता २.७१।
८. गीता २.६१।
९. गीता २.२१।
१०. गीता २.४५।
११. गीता १२.५२।
१२. गीता २.५६।
१३. श्रीमद्भगवद्गीता २.४२।
१४. गीता २.४५।
१५. ब्रह्मवादस्य भूमिकायाम्।
१६. श्रीमद्भागवतम्।
१७. श्री मद्भागवते द्वाद्वश स्कन्ध श्लोक सं. ४.१२।
१८. भागवत श्लोक सं. १२.२५।
१९. भागवत २६.३८।
२०. भागवत ३९.४६।
२१. छान्दो उप. ६.२.३।
२२. तैति उप. २.७।
२३. छान्दो उप. १.६१।
२४. छान्दो उप. ६.१४.३।
२५. छान्दो उप. ३.१४१।
२६. शुद्धाद्वैत मार्तण्ड २८।
२७. तत्वर्थदीप निबन्ध शा.का. २६.७।
२८. शा. प्रकरण प्रकाश २३।
२९. सर्वनिर्णय प्रकरण का. १४०।
३०. तत्वा शा.का. २४।
३१. भागवत २.१०।

।। इति शम् ।।

卐

चतुर्थ-परिच्छेदः

क. विष्णुस्वामि-सम्प्रदायस्य परम्परा

शाण्डिल्यसंहितायाः भक्तिखण्डस्य पञ्चमाध्याये स्पष्टतया विष्णुस्वामि-सम्प्रदायस्याचार्यपरम्परा निरूपिता तथाहि—

अथातः श्रूयतां विप्राः सम्प्रदायः पुरद्विषः।
एकदा शङ्करो देवो गतो गोकुलमण्डलम्।।

तत्र वृन्दावने रम्ये सच्चिदानन्दमन्दिरे।
त्रिभङ्गललितं देवं कोटिमन्मथसुन्दरम्।।

अनौपम्यं वेणुधरं व्रजस्त्रीगणसेवितम्।
श्रुतिभिर्मुनिभिश्चैव सेव्यमानं मुदान्वितम्।।

प्रणिपत्य मुदा देवं सामगानादतोषयत्।
जगतो हि समुद्धर्तुं सम्प्रदायस्य लब्धये।।

तस्मै ददौ प्रसन्नात्मा तत्रत्यानामनुग्रहात्।
स लब्ध्वा परमं लाभं स्वधामं सन्न्यवर्तत।।

परमानन्दसम्मग्नो नृत्यं चक्रे दिगम्बरः।
समुपासत तं देवं तत्प्रष्टुं धृतकौतुकः।।

न चाचष्ट तदा देवो हत्वा त्रिपुरमाध्वे।
तदा हर्षसमाविष्टो नारदेन प्रसादितः।।

जगौ तमेव सन्मार्गं श्रुतं यच्छ्रीपतेर्मुखात्।
नारदोऽपि महायोगी परमानन्दपूरितः।।

अलं प्रसादतः प्रादाद्व्यासायामिततेजसे।
कौण्डिन्यायमया प्रोक्तो गर्गाचार्यमहात्मने।।

व्यासस्तु वक्ति पुत्राय ब्रह्मराताय विष्णवे।
अथो कलौ सम्प्रवृते पूर्वाचार्यैरथागतैः।।
भविष्यति परा भक्तिः किञ्चित्कालं मुनीश्वराः।
वेदवेदान्त - तत्वज्ञैर्वैष्णवैर्ब्राह्मणोत्तमैः ।।
निर्वाहिता ततो भक्तिर्लुप्तप्राया भविष्यति।
ततोऽपि श्रीपतेरस्य स्वीयानुग्रहतो हरेः।।
माथुरे मण्डले तत्र गोकुलेऽस्मिन् गिरावपि।
प्रादुर्भविष्यति महापुरुषैरूपभाविता।।
तस्याः सम्प्रीतये तत्र सम्प्रदायं रिरक्षिषुः।
महात्मा सुमहातेजा भगवद्वदनोदितः।।
प्रादुर्भविष्यति ततः सर्वश्रुतिविशारदः।
योगी योगीश्वरस्तं वै सम्प्रदायं वदिष्यति।।
भगवानपि तं साक्षादुपदेष्टा निजागमम्।
आसाद्य गोकुलं धाम भक्तिं संवर्धयिष्यति।।
गिरिराजं ततः प्राप्य महात्मैकान्तसंश्रयैः।
निर्गुणं भक्तिमार्गं हि वर्धयन्विचरिष्यति।।
निजात्मप्रेमसम्पूर्णै र्भगवद्ध्यानतत्परैः।
तद्रसाप्लुतचित्तानां स्वाचारपरिवर्तिनाम्।।
सर्वभूतैकसुहृदां वेदप्रामाण्यमीयुषाम्।
विरलेष्वेव भविता सम्प्रदायोऽत्युत्तमः।।
आश्चर्याणि चरित्राणि कृत्वा नाना विधान्यसौ।
स्थापयिष्यति वै तस्याः पारम्पर्यक्रमं कुलम्।।
सुमद्धृत्य ततो जीवान् हरेः प्रीतिं करिष्यति।
ततः कतिपये काले कालदोषप्रभावतः।।

विलयं यास्यति पन्थाः कापटयेनाकुलः परः।
परदोषान्वितैः पुम्भिर्निजाचार्यपराङ्मुखैः।।

इत्येवं हि समाख्यातः सम्प्रदायः पुरद्विषः।
अयमेव परः पुण्यो भक्तिशास्त्रैकसम्मतः।।

एतन्मा[१]हात्म्यमतुलं नालं वक्तुं चतुर्मुखः।
अयं हरेः श्रीव्रजदेवतायाः अनुगृहीतः किल सम्प्रदायः।
आविर्भवो वेणुगृहीतवेदैर्विभावयध्वं त्रिपुरारिसम्मतम्।।

परम्परा परा प्रोक्ता परमात्मपुरः सरः।
चिराच्चराचराभीष्टा धरायां भक्तितत्परा।।

गोपीपति-समारम्भां श्रीविष्णुस्वामिमध्यमाम्।
श्रीमदाचार्यपर्यन्तां स्तुवो गुरुपरम्पराम्।।

सङ्क्षेपतः विमर्शः क्रियते

१. भगवान् श्रीकृष्णःपरिचयस्तु द्वितीयपरिच्छेदे।

२. भगवान् रूद्रदेवः-परिचयस्तु द्वितीयपरिच्छेदे।

३. आचार्यत्रिपुरारिःपरिचयस्तु द्वितीयपरिच्छेदे।

४. श्रीरूद्रसम्प्रदायाचार्यः शुद्धाद्वैतप्रवर्तकः आदिवैष्णवाचार्यः श्रीविष्णुस्वामी।

परिचयस्तु द्वितीयपरिच्छेदे-

५. श्रीदेवदर्शनाचार्यः (देवमुनिः)

६. श्रीपरमानन्दमुनिः।

७. श्रीआनन्दमुनिः

८. श्रीप्रकाशमुनिः

९. श्रीकृष्णमुनिः

१०. श्रीनारायणमुनिः
११. श्रीजयमुनिः
१२. श्रीश्रीमुनिः
१३. श्रीभट्टाचार्यः
१४. श्रीनिताचार्यः
१५. श्रीतत्वाचार्यः
१६. श्रीनृसिंहाचार्यः
१७. श्रीशुद्धाचार्यः
१८. श्रीसुबुद्धाचार्यः
१९. श्रीप्रबुद्धाचार्यः
२०. श्रीअसूयाचार्यः
२१. श्रीरूद्राचार्यः
२२. श्रीभगवताचार्यः
२३. श्रीरामेश्वराचार्यः
२४. श्रीब्रह्मपदचर्याचार्यः
२५. श्रीसुदयाचार्यः
२६. श्रीलक्ष्मीनारायणाचार्यः
२७. श्रीराजविष्णुस्वामी

२८. विल्वमङ्गलाचार्यः

आदिवैष्णवाचार्यश्रीमद्विष्णुस्वामिनः परम्परायां प्राप्तेष्वाचार्येषु श्रीबिल्वमङ्गलाचार्योऽन्यतमः। श्रीविल्वमङ्गलाचार्यः श्रीवल्लभाचार्याय दीक्षां ददौ।

श्रीविल्वमङ्गलाचार्यः द्रविडदेशवास्तव्यः आसीत्। तस्य गुरुः श्रीराजविष्णुस्वामी आसीत्। एतदतिरिक्तः परिचयस्तु विशेष रूपेण न

प्राप्यते। जन्मस्थानस्य यथार्थ परिचयोऽपि न लभ्यते। श्री विल्वमङ्गलस्य शिष्य: देवमङ्गलोऽपि आसीत्। श्रूयते यत् त्रय विल्वमङ्गलाचार्या: आसन्। कश्चिन्मते विल्वमङ्गल द्रविडदेशीयस्तथा विष्णुस्वामी पारम्परिकाचार्य: आसीत्। केचितु वदन्ति यद् विल्वमङ्गलउत्कलदेशवास्तव्य: आसीत्। तृतीयविल्वमङ्गलस्तु 'कृष्ण कर्णामृत' ग्रन्थकर्त्ताआसीत्। उक्तविल्वमङ्गलाचार्याणां नन्दनन्दन एवाराध्यासीत्। 'कृष्णकर्णामृत' रचियता विल्वमङ्गलस्तु बङ्गदेशवास्तव्य आसीत् तथा तेन गुरुपरम्पराया उल्लेख: कृत:। एतत् कथनस्य 'कृष्ण कर्णामृतम्' ग्रन्थस्य प्रारम्भ उल्लिखितेन श्लोकेन पुष्टिर्भवति—

'चिन्तामणि[३] र्जयतु सोमगिरिर्गुरुमे -
शिक्षागुरुश्च भगवान् शिखिपिच्छमौलि:।।

विल्वमङ्गलाचार्य: वेश्यासक्त: आसीत्। पश्चादासक्तिं विहायभगवति श्रीश्यामसुन्दरचरणशतदले रतिर्जाता। वेश्याचिन्ता-मणित: वैराग्योदयत्वात् प्रथमगुरुरूपेण चिन्तामणिरेव वृता।

द्वितीयगुरुरूपेण उक्तश्लोके सोमगिरिनामक: कश्चित् सन्यासी अस्ति। सम्भवत: सोमगिरित: पञ्चाक्षरशिवमन्त्रदीक्षा लब्धा। परन्तु नवघनसुन्दरश्री श्यामसुन्दर: विल्वमङ्गलचित्तहरणञ्चकार। एतत् सम्बन्धीय: श्लोकोऽपि प्राप्यते—

'शैवा[४] वयं किमपि नात्र विचारणीय-
पञ्चाक्षरी जप परा नितरां तथापि।
चेतो मदीयमतसी कुसुमावभास:
स्मेरानन: हरति गोपबधूकिशोर:'।।

।। इतिशम् ।।

卐

२८. श्री बिल्वमङ्गलाचार्यः

श्रीदेवमङ्गलाचार्यः — श्रीमद्‌वल्लभाचार्यः

श्रीमद्‌वल्लभाचार्यः

१५. ईसवीये[१] दक्षिणभारतस्य तैलङ्गदेशस्थित 'काँकरवाड' नामके ग्रामे श्रीलक्ष्मणभट्टनामक एकः विद्वान् ब्राह्मण आसीत्। लक्ष्मणभट्टस्य पत्नी श्रीमती इप्लम्मागारु आसीत्। उभयोः पुत्ररूपेण श्रीवल्लभाचार्य आगतवान्। १५३४ ईस्वीये लक्ष्मणभट्टः स्वपत्नीं नीत्वा तीर्थभूमौ गतवान् तस्मिन् काले पदयात्रां विहायोऽन्योपायोनासीत्। तीर्थान्तरमटन् लक्ष्मणभट्टः काशीं गतवान्। काश्यामवस्थानकाले श्रीमती इप्लम्मागारु गर्भवती आसीत्। काश्यां यवनानामाक्रमणवार्त्तां श्रुत्वा लक्ष्मणभट्टः पत्न्या सह दक्षिण भारतगमनोत्सुकः आसीत्। मार्गे चम्पारण्ये नामके स्थाने (रायपुर छत्तीसगढ़) इप्लम्मागारु पुत्रं प्राप्तवती।

भट्ट महोदयः पुत्रं शमीवृक्षस्य नीचैः पत्राणि एकत्रीकृत्य दुःखपूर्वकं स्थापयामास। परन्तु सायं काले वनं विहाय पुत्रं परित्यज्य सर्वे चोडा नगरं गतवन्तः। यदा भट्ट महोदयः श्रुतवान् यत काश्यामाक्रमणशङ्का नास्ति तदा दक्षिणं न गत्वा परदिवसे काश्यामेव गतवान्। अन्य दिवसे चम्पारण्यं गत्वा शमीवृक्षस्य निम्नतले जीवित पुत्रं प्राप्तवान् तदा वल्लभस्य शारीरिककान्तिः अतीवतेजोमयी आसीत्। भट्ट महाभागः बालकं नीत्वा काशीं गतवान्। काश्यामेव भट्टमहोदयः पुत्रस्य सर्वसंस्कारकार्याणि कृत्वा पुत्रं 'वल्लभः' इत्याख्यया अहूतवान्। वल्लभस्य पञ्चमवर्षे एव उपनयनसंस्कारकार्यं जातम्। बल्लभस्य लोकोत्तरप्रतिभां दृष्ट्वा जनमनसि इयम्भावना जाता यत् वल्लभः साधारणपुरुषः नास्ति अपितु कश्चिदवतारी पुरुषो वर्त्तते। बाल्यावस्यामेव जनाः वल्लभं 'बालसरस्वती' 'वाक्पतिः' इत्याख्ययाआह्वयतिस्म। यज्ञोपवीतानन्तरं सम्भवतः पञ्चवर्षपश्चाद् बल्लभस्य पिता श्रीलक्ष्मण भट्टः परलोकं गतवान्। बल्लभः श्री विष्णुचित्तिरुमल्लस्तथा श्रीमाधवयतीन्द्रसन्निधौ सकलवेद-वेदाङ्ग-

दर्शनपुराणादीनि शास्त्राणि उत्तमरूपेणाधीतवान् बाल्यकालतः एव बल्लभस्य तुलसीमालाधारणे, एकादशीव्रतपालने, विष्णुव्रते भगवदाराधनायाश्च रुचिरासीत्।

अध्ययनं परिसमाप्य बल्लभः देशाटनं कृतवान्। सः दक्षिणस्य तीर्थाटन् विजय नगरं गतवान्। विजय नगरस्य महाराजकृष्णदेवो वल्लभस्यागमनवार्तां श्रुत्वा अभ्यर्थनाञ्चकार। श्री वल्लभाचार्यः मायावादिनां विदुषां शास्त्रार्थमाहूय स्वीयाद्भुतपरिचयः प्रदत्तः। पश्चान्मायावादस्य खण्डनं कृत्वा शुद्धाद्वैतवादस्य मण्डनं कृतम्।

श्रीवल्लभस्य आचार्यत्वप्राप्तिः एवं दीक्षा

एकदा आचार्यवल्लभः शयनकाले कक्षमध्येऽभूतपूर्वप्रकाशं दृष्टवान्। क्रमशः आचार्यबल्लभः प्रकाशमध्ये तेजोमयींमूर्तिमालोक्य तद्दिव्यमूर्तिं ननाम। तद्दिव्यमूर्तिस्तु स्वयमेवोक्तवान्—'अहं विल्वमङ्गलोऽस्मि। सप्तशतवर्षतः तव प्रतीक्षारतोऽस्मि'। श्री[१] विल्वभङ्गलेनोक्तम् यत् श्रीश्यामसुन्दरः त्वां श्रीविष्णुस्वामिसम्प्रदायस्य 'प्रचारार्थं प्रेषितवान्'। विल्वमङ्गलाचार्यः बल्लभाचार्यं आद्याचार्यस्य विष्णुस्वामिनः सम्पूर्णचरितं श्रावयित्वा कथितवान् यद् रुद्रसम्प्रदाये इदानीं यावत् सप्तशताचार्याः सन्ति।

एकदा श्री बल्लभः[६]काश्यामाजगाम एतस्मिन्नन्तरे श्रीकृष्णस्याज्ञा जाता—'त्वं [७]गृहस्थो भव' श्री वल्लभो न तन्मेने। तदामहानुपद्रवो धूर्तेभ्यः कण्ठ्यपाशलक्षणः समजनि। ततस्तैर्विचारितम् पूर्वं तीर्थाटनं कुर्वतो मम किमप्युपद्रवो न जातः सम्प्रत्यत्र स्थानेऽपि जातः। एवं तत्क्लेशमुक्तिम् विचार्य सुप्तम्। पुनः स्वप्ने श्री कृष्णेनोक्तम्—'विवाहं कुर्विति। श्री बल्लभो भगवन्तं प्रत्याह—किं गृहाश्रमेण, अहं स्वयमेव कृतार्थोऽस्मि, न विषयेषु मे मनः। भगवानाहरूपद्वयेनाहं तव गृहेऽवतितीर्षुरस्मि गोपीनाथविट्ठलेश्वरौ अतः पश्चाद्—श्रीमद बल्लभाचार्यः विवाहमकार्षीत्।

एकदा पुनः श्रीकृष्णस्याज्ञा समजनि 'मायावादिभिः सार्द्धं विवादं कृत्वा मायावादमपनय'। पश्चादेकदा विश्वेश्वरस्य द्वारि पत्रावलम्बनं कर्तुमारेभे। तदित्थम्—

श्रीकृष्णस्य प्रसादेन मायावादो निराकृतः।
अवैदिको महादेवस्तत्र साक्षी न संशयः।।
ये वैदिका महात्मानस्तेषाश्चानुमितिस्तथा।
अवेदविन्न मनुते यया चोपेक्षितः तु नः।।
स्थापितो ब्रह्मवादो हि सर्ववेदान्तगोचरः।
काशीपतिस्त्रिलोकेशो महादेवस्तु तृप्यतु।।
कस्यचित्तत्र सन्देहः स मां पृच्छतु सर्वथा।
न भयं तेन कर्त्तव्यं ब्राह्मणानामियं गतिः।।
डिण्डिमस्तु वादितो द्वारि विश्वेशस्य मयात्र हि।
विद्वद्भिः श्रवणं कार्यं ते हि सन्मार्गरक्षकाः'।।

एकदा श्रीमद् वल्लभाचार्यः मथुरामण्डलमाजगाम। तत्र वृहद्वने गोविन्दस्थले भगवन्मदिरं कृत्वा भगवत्सेवां कर्त्तुमारेभे। तत्र खलु कश्चित् काश्मीरदेशीयः केशवभट्टः (केशवकाश्मीरिभट्टः) श्री वल्लभस्यालौकिको श्रीमद्भागवतार्थः पूर्वं क्वचिद्वपि न श्रुतवान्। केशवकाश्मीरि भट्टेन प्रार्थितं यदत्र श्रीमद्भागवतं व्याख्येयम्। व्याख्यायां श्रीबल्लभाचार्यः वक्तारूपेण तथा केशवकाश्मीरिभट्टस्तु श्रोता। पश्चाद् भागवतव्याख्यानमाराब्धम्। केशवभट्टेनोक्तम् मयैतादृशोऽर्थो न श्रुतः, यदर्थस्तु यथार्थरूपेणावधारितः सोऽपि गतः। श्री मदुक्तोऽपि मे हृदि न समागतः तत् किम्? तदा—श्री वल्लभैरुक्तम्—यत् समानम् उपविश्य त्वया श्रुतमतस्ते हृदि नागतम्। न मया कदाचिदपि विक्रीतं वृत्यर्थे। अतो मदुक्तमन्योक्तसदृशं मा जानीहि। मयात्वामुद्दिश्य नोक्तम्। त्वच्छिष्योऽयं माधवभट्टनामा, अयं मे श्रोता, मह्यमेनं देहि। ततः केशवभट्टेन त्रिभिरन्यैः, श्रोतृभिः सह श्री बल्ल॰भाय समर्पितः। ततस्तस्यात्मसमर्पणं कारयित्वात्मीयं विधाय श्री भागवत टीकाया लेखने श्रवणे चाधिकारी कृतः।

तत् पश्चात् कश्चित् कान्यकुब्जीयो नारायणमिश्रनामकः पण्डितः पराजितः सोऽपि श्रीबल्लभस्य शिष्योऽभवत्।

प्रेमपुरुषोत्तम-पतितपावन-चैतन्यमहाप्रभोर्निवासकाले श्रीश्रीजगन्नाथधाम्नि श्रीमद्-बल्लभाचार्यः जगाम। श्रूयते यदाकदा श्रीकृष्णचैतन्य-महाप्रभुराचार्यश्रीबल्लभसन्निधौ जगाम। उभयोर्मध्ये परिचयो नासीत्। तथापि श्रीमन्महाप्रभुं दृष्ट्वा श्रीबल्लभाचार्य अग्रेगत्वा विनम्ररूपेण सादरमासनं ददौ। तमदृष्टपूर्वं दृष्ट्वा श्री बल्लभाचार्येणोक्तम्—'इमे कृष्णचैतन्याः' इत्युक्त्वा नमस्कृताः। तत्समये मध्याह्न योगानन्तरं भगवति शयनं गते सति स्वधर्मपत्नीं श्रीबल्लभोऽब्रवीत्भोः। मदाज्ञया त्वमस्मै सुपक्वमन्नं भोजय। पत्नीं प्राहअनिवेदितं कथं देयम्? तदा श्रीबल्लभेनोक्तम् देयमेव अस्य हृदयस्य श्रीकृष्णो[१०] भोक्ष्यत्येव'। तस्मिन् समये श्रीबल्लाभाचार्यगृहे भगवत्प्रसादस्याभाव आसीत्। श्रीबल्लभाचार्यः कथयामास 'यदयं श्रीकृष्णचैतन्यसाक्षान्नीलांचलनाथजगन्नाथोऽस्ति। जगन्नाथपुरीमागत्य इमम्पुरुषोतमं नैवेद्यमर्पय। एवम्प्रकारेण साक्षाद्भगवद्बुद्ध्या आचार्यश्री मद्वल्लभः असमर्पितं नैवेद्यं श्रीकृष्णचैतन्यमहाप्रभुं निवेदयामास। १५६७ ईस्वीये श्रीवल्लभाचार्यस्य प्रथमः पुत्रः श्रीगोपीनाथस्य जन्म अभवत्। तथा १५७२ ई. द्वितीयपुत्रो विट्ठलनाथस्य जन्म अभवत्। बहुवर्षपर्यन्तं श्री बल्लभाचार्य देशान्तरमटन् भगवद्भक्तेः प्रचारः प्रसारश्च कृतवान्।

श्रीमद्बल्लभाचार्यस्य ८४ उपवेशनस्थानानि–

भारतस्य विभिन्नेषु तीर्थेषु चतुरशीति उपवेशनस्थानानि श्रीबल्लभसम्प्रदायानुसारेण वर्त्तन्ते। एतेषु मध्ये ब्रजमण्डले एव अधिककोपवेशनस्थानानि वर्त्तन्ते। उपवेशनस्थानानि यथा—

१. गोकुले—(गोविन्द घट्टे) अत्र भगवान् श्रीकृष्ण आचार्याय दर्शनं दत्वा 'ब्रह्मसम्बन्ध दीक्षायाः' उपदेशञ्चकार।

२. गोकुले—(मन्दिरमध्ये) अत्र आचार्यस्य निवासस्थानं तथा प्रवचनस्थानञ्च आसीत्।

३. गोकुले—अत्र खलु श्री द्वारकाधीशस्य शय्यामन्दिरमस्ति।

४. श्रीधाम वृन्दावने-(वंशीवटस्य निकटे) अत्र आचार्यः प्रभुदास जलोटा खत्रीं 'वृक्षे वृक्षे वेणुधारी पत्रे पत्रे चतुर्भुजः' एतच्छ्लोकानुसारेण सर्वत्रैव भगवल्लीलां दर्शयति स्म।

५. मथुरायां-(विश्रामघट्टे) अत्र आचार्य वल्लभः श्रीमद्-भागवतस्य पारायणञ्चकार।

६. मधुवने-(व्रजे) अत्र आचार्यः माधवकुण्डस्योपरि कदम्ब-वृक्षनिम्नतले श्रीमद्-भागवतपारायणञ्चकार।

७. कुमुद्वने-(ब्रजे) अत्र श्रीमद्भागवतसप्ताहद्वारा आचार्यः भक्तान् दिव्यदृष्टिं दत्वा भगवल्लीलादर्शनञ्चकार।

८. बहुलावने-(व्रजे) अत्र कृष्णकुण्डे वटवृक्षतले बैठक-स्थानमस्ति।

९. श्रीराधाकुण्ड-कृष्ण कुण्डे-(व्रजे) अत्र छोकर वृक्ष तले आचार्यस्य बैठकस्थानमस्ति। क्रीडार्थं श्रीकृष्णः कृष्णकुण्डं वंशीद्वारा तथा राधाकुण्डं श्रीराधा नखद्वारा खननञ्चकार।

१०. मानसी गङ्गायाम् (व्रजे) अत्राचार्यः मानसीगङ्गायाः दिव्य-दुग्धमयस्वरूपस्य दर्शनं कारितवान्।

११. पारसोली-(व्रजे) चन्द्रसरोवरसन्निधौ श्रीमद्भागवतपारायण-माचार्यः कृतवान् तथा भक्तान् श्यामसुन्दरस्य रासलीलादर्शनं कारितवान्।

१२. अनौर-(व्रजे) सद्दूपाण्डेयस्य गृहे आचार्यस्योपवेशन-स्थानमस्ति। अत्र यदा आचार्यः भागवतपारायणञ्चकार तदा श्रीनाथः प्रकटितः।

१३. गोविन्दकुण्डे-(व्रजे) अत्र दिवसत्रयमाचार्यः अवस्थित्वा भागवतपारायणञ्चकार।

१४. सुन्दरशिला-(व्रजे) गिरिराजमुखारवृन्दसन्निधौ अत्र सर्वप्रथमः श्रीनाथस्य आचार्यः अन्नकूटमहोत्सवञ्चकार।

१५. गिरिराज-(व्रजे) गिरिराजोपरि श्रीनाथस्य मन्दिरस्य दक्षिणभागे चत्वरे आचार्यः वसति स्म। अत्रोपवेशनस्थानमप्रकटम्।

१६. कामवने-(सुरभिकुण्डे व्रजे) अत्र आचार्यः कश्चित् प्रेत-योनिलब्धब्रह्मराक्षसम् तारितवान्।

१७. गह्वरचने-(व्रजे) अत्र आचार्यस्योपवेशनस्थानमस्ति।

१८. संकेत वटे-(व्रजे) कृष्णकुण्डे छोंकरवृक्षस्य तले आचार्य-स्योपवेशनस्थानमस्ति।

१९. नन्दग्रामे-(व्रजे) अत्र मानसरोवरोपवेशनस्थानमस्ति। अचार्योऽत्र षण्मासपर्यन्तं निवसतिस्म।

२०. कोकिलावने-(व्रजे) अत्र आचार्यः भासं स्थित्वा भागवत-पारायणञ्चकार।

२१. भाण्डीरवने-(व्रजे) अत्रबैठकस्थानम्प्राप्तम्। अत्राचार्यः सप्तदिवसपर्यन्तं अवस्थित्वा भागवतपारायणञ्चकार।

२२. मानसरोवरे-(व्रजे) अत्रापि आचार्येण भागवतपारायणं कृतम् उक्तप्रकारेण द्वाविंशत्ति बैठक स्थानानि आचार्यस्य व्रजे प्रसिद्धानि।

२३. सूकरक्षेत्रे—अत्रापिगङ्गातटे बैठकस्थानमस्ति।

२४. चित्रकूटे—अत्र कामतानाथपर्वतनिकटे बैठकस्थानमस्ति। अत्र षोडशदिवसपर्यन्तं मवस्थित्वा वाल्मीकिरामायणस्य पारायणं कृत्वा श्रीरामचन्द्राय नैवेद्यं समर्प्य भक्तान् मर्यादापुरुषोत्तमस्त-थालीलापुरुषोत्तमः उभयोरभिन्नतायाः स्वरूपं बोधितवान्।

२५. अयोध्यायाम्—सरयूतटे गोसाई (गोस्वामी) घट्टे बैठक-स्थानमस्ति। अत्र आचार्येण बाल्मीकिरामायणपारायणं कृतम्।

२६. नैमिषाऽऽरण्ये—गोविन्दकुण्डे आचार्येण भागवतपारायणं कृतम्। एकदा त्रिप्रहरपर्यन्तं—'नैषकर्म्यमप्यच्युत भाव वर्जितं, न शोभतेज्ञानमलं निरञ्जनम्'।

कुतः पुत्रः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्। श्लोकास्याचार्येण व्याख्या कृता।

२७. सेठ पुरुषोत्तमदास गृहे बैठकस्थानमस्ति। अत्र 'सन्यास-निर्णय' नामकग्रन्थआचार्येण विरचितः। इदमेवाचार्यस्यान्तिम बैठकस्थानमस्ति।

२९. हरिहर क्षेत्रे—गङ्गागण्डकी नद्योः संगमस्थले भगवान्-दासस्य गृहे बैठकस्थानमस्ति।

३०. जनकपुरे—अत्र भगवानदासवैष्णवस्योद्याने आचार्यस्य बैठकस्थानमस्ति। अत्र आचार्येण भागवतपारायणं कृतम्।

३१. गङ्गासागरसङ्गमे—अत्र कपिलाश्रमे कपिलकुण्डोपरि बैठक-स्थानमस्ति। अत्र षण्मासपर्यन्तमवस्थित्वा भागवतपारायणञ्चकार।

३२. चम्पारण्ये—मध्यप्रदेशस्य रायपुरे राजिमनगरनिकटे बैठक-स्थानमस्ति। अत्राचार्यः जन्म लेभे।

३३. चम्पारण्ये—अत्राचार्यस्य द्वितीयबैठकस्थानमस्ति। आ-चार्यस्य जन्मानन्तरं अत्रैव षष्ठीपूजनं जातम्।

३४. जगन्नाथक्षेत्रे—मन्दिरस्य दक्षिणे भागे बैठकस्थानमस्ति। इदानीं पृथक्स्थाने स्थानान्तरितं बैठकस्थानमस्ति।

३५. पण्ढरपुरे—अत्र भीमरथ्याः (चन्द्रभागायाः) नद्यास्तटे आचार्यस्य बैठक-स्थानमस्ति।

उपर्युक्त बैठक स्थानान्यतिरिक्त बैठक स्थानानि सन्ति। परन्तु चतुरशीति स्थानोल्लेखे शोधप्रबन्ध कलेवरवृद्धिर्भविष्यति।

अतएव शोधकलेवरवृद्धिं दृष्ट्वा अन्यानि बैठकस्थानानि न प्रदर्शितानि।

२९. श्री देवमङ्गलाचार्यः, ३०. श्री वरुणाचार्यः, ३१. श्री बामनाचार्यः, ३२. श्री दयालदेवः, ३३. श्री क्षमादेवः, ३४. श्री सन्तोष देवः, ३५. श्री ध्यानदेवः, ३६. श्री विज्ञानदेवः, ३७. श्री

शङ्करभट्टः, ३८. श्री पद्मभट्टः, ३९. श्री गोपालभट्टः, ४०. श्री धरभट्टः, ४१. श्री श्यामभट्टः, ४२. श्री रामभट्टः, ४३. श्री सेतुभट्टः, ४४. श्री कृष्णभट्टः, ४५. श्री दिवाकरभट्टः, ४६. श्रीकृपालभट्टः, ४७. श्री विद्याधरभट्टः, ४८. श्री दिनकरभट्टः, ४९. श्री बुद्धिनिधानभट्टः, ५०. श्री विद्यानिधान भट्टः।

५१. श्री प्रभुविष्णुस्वामी

प्रधानपीठे श्री बिल्वमङ्गलाचार्यानन्तरं त्रयोदशशताब्द्यां श्रीप्रभुविष्णुस्वामी अभवत् श्रूयतेयच्छङ्करः भगवान् प्रभुविष्णुस्वामिनां कृते गोपालगायत्र्युपदेशदानञ्चकार। भगवता शङ्करेण प्रभुविष्णुस्वामी इत्थमादिष्टोऽपि यत् कमपि मन्त्रप्रदानात् प्राक् गोपालगायत्र्युपदेशानन्तरमेव गोपालमन्त्रं दातव्यम्।

५२. श्रीश्रौतनिधिः, ५३. श्री हरियानिधिः, ५४. श्री ज्ञाननिधिः, ५५. श्री ध्याननिधिः, ५६. श्री आत्मानिधिः, ५७. श्री सहजनिधिः, ५८. श्री चरणनिधिः, ५९. श्री वामदेवाचार्यः, ६०. श्री रोहिणेयाचार्यः, ६१. श्री केशवाचार्यः, ६२. श्रीदेवाचार्यः, ६३. श्री हिरण्यगर्भाचार्यः, ६४. श्री बालगोविन्दाचार्यः, ६५. श्री रङ्गलाचार्यः, ६६. श्री मङ्गलाचार्यः, ६७. श्री लोकाचार्यः, ६८. श्री विलोकाचार्यः, ६९. श्री त्रिलोकाचार्यः, ७०. श्री विश्वाचार्यः।

७१. श्री ज्ञानदेवः

आचार्य श्री विष्णुस्वामी सम्प्रदाये गम्भीर बुद्धिमान् दृढसिद्धान्तः श्रीज्ञानदेवः आचार्यरूपेण लभ्यते। श्री ज्ञानदेवः काव्यरचनायां पटुरासीत्। तथा अस्यवाणी गङ्गाजलमिव निर्मला आसीत्। ज्ञानदेवस्य द्वौ सुप्रसिद्धौ शिष्यौ आस्ताम्। महाराष्ट्र प्रदेशे पैठणतः क्रोशचतुष्ट्यदूरं गोदावर्य्यास्तटे ज्ञानदेवः ग्रामनिवासी आसीत्।

७२. श्री नामदेवः

महाराष्ट्रस्य दक्षिणभागे चन्द्रभागानदीतटे देशस्य गौरव भूततीर्थं पण्ढरपुरमस्ति। पण्ढरपुरस्थानं महाराष्ट्र प्रदेशीयसन्तानामुपास्य-

स्थानमस्ति। महाराष्ट्रियानां कृते प्रणभूमिः वर्त्तते। पण्ढरपुरस्थानमेव सन्तश्रेष्ठस्य श्रीनामदेवस्य जन्म भूमिः तथा देहविसर्जनभूमिरपि वर्त्तते। पण्ढरपुरेएव व्रिकम सम्वत्—१३२७ तमे वैशाखशुक्लत्रयोदश्यां रविवासरे सूर्योदयकाले माताचन्द्रावती पुत्ररूपेण श्री नामदेवं प्राप्तवती। अयं शिशुः पश्चाज्जगति श्री नामदेवरूपेण पूजितः।

७३. श्री बालो देवः, ७४. श्री लधा देवः, ७५. श्री केशवदासः, ७६. श्री कल्याणदासः, ७७. श्रीबालकदासः, ७८. श्री तुलसीदासः, ७९. श्री महादासः, ८०. श्री प्रेमदासः।

८१. श्री हरिदासः

भक्तमालग्रन्थकारेण भक्तमालग्रन्थे अनेकहरिदासानां उल्लेख कृतः। विभिन्नेषु सम्प्रदायेषु हरिदासनामकाः भक्ताः सन्ति। यथा—श्री मध्वाचार्यः गौडीयसम्प्रदाये प्रतिदिनं लक्ष्यत्रय 'श्री हरिनाममहामन्त्रजपकर्त्ता' हरिदासः (श्री कृष्ण चैतन्य महाप्रभोः समसामयिकः) आसीत् तथा श्री विष्णुस्वामिसम्प्रदाये श्री हरिदासः नामधेयः यः खलु आसीत् स तु सुसङ्गीतज्ञ तानसेनस्य गुरुः आसीत्। तस्य निधिवनं निवासस्थानमासीत्। अनन्यरसिकः श्री हरिदासस्य पूर्वजाः प्राचीनकाले मथुरानगरे वास्तव्या आसन्। संवत्[१२] १५६९ तमे आशुधीरस्य गृहे श्री हरिदासस्य जन्म अभवत्। १५७५ तमे तथा १५८० तमे श्री हरिदासस्य क्रमशः श्री जगन्नाथ[१] श्री गोविन्दनामधेयौ द्वौ भ्रातरौ अभवताम्।

श्री हरिदासः १५८४ तमे राधाष्टम्यां श्री आशुधीरदेवतः दीक्षां गृहीत्वा श्री वृन्दावनं गतवान्। श्री वृन्दावने कतिपयदिवसपर्यन्तं तीर्थभ्रमणार्थं श्रीहरिदासः गतवान्। पश्चात् प्रत्यावर्त्तनं कृत्वा स्थायीरूपेण निधिवने निवसतिस्म। साक्षाद् रूपेण श्रीवङ्कविहारी देवः श्री हरिदासाय दर्शनं ददौ। श्री हरिदासः सङ्गीतशास्त्रपारङ्गतः आसीत्। तानसेनादयः अष्टसुप्रसिद्धाः शिष्याः आसन्। एकदा अकबरः[१३] तानसेनतः प्रशंसाश्रवणान्तरं श्री हरिदासस्य दर्शनार्थं वृन्दावनमागच्छत्। ९५ वर्षीयः १६६४ तमे शरदपूर्णिमायां श्रीश्यामसुन्दरस्य नित्यलीलायां श्री हरिदासः प्रविष्टः।

श्री हरिदासस्य श्रीविष्णुस्वामिसम्प्रदायानुयायित्वे प्रमाणमस्ति— 'एवञ्च सास्वतकुल-कमलप्रभाकर गर्गाचार्यान्वयश्रीमल्ललिलावतार-हरिवदाराध्यश्रीहरिदासस्वामिभिरपि श्रीविष्णु स्वामिसम्प्रदाय एवानुष्ठितस्तत्र ललितायाः प्राधान्यात्।

८२. श्री रामदासः, ८३. श्री भगवानदासः, ८४. श्री लछिमनदासः, ८५. श्री राधिकादासः, ८६. श्रीमहन्तवैष्णवदासः, ८७. श्री महन्तदयालदासः।

श्रीमद्वल्लभाचार्यपरम्परा

श्रीमद् वल्वभाचार्यस्य गृहस्थपरम्परत्वात् परवर्त्ती परम्परा पुत्र परम्परारूपेण लभ्यते। आचार्यस्य वल्लभस्य गोपीनाथ विठ्ठलौ द्वौ पुत्रौ आस्ताम्। श्री विठ्ठलस्य सप्त पुत्राः आसन्।

बिल्वमङ्गलाचार्यस्य विरक्तशिष्यस्य श्रीदेवमङ्गलाचार्यस्य शिष्यपरम्परा।

१. वरुणाचार्यः, २. वामनाचार्यः, ३. श्रीदयालदेवः, ४. श्रीक्षमादेवः, ५. श्री सन्तोषदेवः, ६. श्री ध्यानदेवः, ७. श्री विज्ञान देवः, ८. श्री शङ्करभट्टः, ९. श्री पद्मभट्टः, १०. श्री गोपालभट्टः, ११. श्री श्रीधरभट्टः, १२. श्री श्यामभट्टः, १३. श्रीराम भट्टः, १४. श्री सेतु भट्टः, १५. श्री कृष्ण भट्टः, १६. श्री दिवाकर भट्टः, १७. श्री कृपाल भट्टः, १८. श्री विद्याधर भट्टः, १९. श्री दिनकर भट्टः, २०. श्री बुद्धिनिधान भट्टः, २१. श्री विद्यानिधान भट्टः, २२. श्री प्रभुविष्णु स्वामी, २३. श्री श्रोतनिधिः, २४. श्री हरियानिधिः, २५. श्री ज्ञान निधिः, २६. श्री ध्यान निधिः, २७. श्री आत्मनिधिः, २८. श्री सहजनिधिः, २९. श्रीचरणनिधिः, ३०. श्रीवामदेवाचार्यः, ३१. श्री रौहिणेयाचार्यः, ३२. श्री केशवाचार्यः, ३३. श्री देवाचार्यः, ३४. श्री हिरण्यगर्भाचार्यः, ३५. श्री बालगोविन्दाचार्यः, ३६. श्री रङ्गलाचार्यः, ३७. श्री मंगलाचार्यः, ३८. श्री लोकाचार्यः, ३९. श्री विलोकाचार्यः, ४०. श्री त्रिलोकाचार्यः, ४१. श्री विश्वाचार्यः, ४२. श्री ज्ञानदेवः, ४३. श्री

नामदेवः, ४४. श्री बालोदेवः, ४५. श्री लधादेवः, ४६. श्री केशवदासः, ४७. श्री कल्याणदासः, ४८. श्री बालकदासः, ४९. श्री तुलसीदासः, ५०. श्री महादासः, ५१. श्री प्रेमदासः, ५२. श्री हरिदासः, ५३. श्री रामदासः, ५४. श्री भगवानदासः, ५५. श्री लक्ष्मणदासः, ५६. श्री राधिकादासः, ५७. श्री वैष्णवदासः, ५८. श्री दयालदास जी महाराजः। ५९. विट्ठलनाथः, ६०. श्री यदुनाथः, ६१. श्री मधुसूदनः, ६२. श्री मुरलीधरः, ६३. श्री ब्रह्मराजः, ६४. श्री पद्मराजः, ६५. श्री प्रद्युम्न मुनिः, ६६. श्री हृषीकेशः, ६७. श्रीवासुदेवः, ६८. श्री परमानन्दः, ६९. श्री कल्याणदासः, ७०. श्रीप्रेमदासः, ७१. श्री सॉवलदासः, ७२. श्री रतनदासः, ७३. श्री किशनदासः, ७४. श्री राधौदासः, ७५. श्री धनश्रीदासः, ७६. श्री दयारामः, ७७. श्री रामदासः, ७८. श्री बलरामदासः, ७९. श्री परशुराम दासः, ८०. श्री रणछोडदासः, ८१. श्री मोहनदासः, ८२. श्री भोलादासः, ८३. श्री दामोदरदासः, ८४. श्री नरोत्तमदासः, ८५. षष्ठपीठाधीश्वर महामण्डलेश्वरश्रीमहन्तजमुना-दासमहाराजः।

।। इतिशम् ।।

卐

ख. विष्णुस्वामि सम्प्रदायस्य स्थानादि

वर्तमानकाले विद्यमानानामाश्रमाणां नाम तथा यस्मिन्नगरे ग्रामे आश्रमस्थितिस्तस्य नाम तथाश्रमाधिपतित्वेन स्थितस्याचार्यस्य नाम लिख्यते।

१. आश्रमपीठमालासु सुमेरुरूपपीठः तापत्रयत्रिमोचन्याः काश्याः विश्वेश्वरखण्डे भागीरथ्याः पश्चिमे कूले मणिकर्णिकाघट्टे स्थितः।

	आश्रम नाम	आचार्यः	नगरादिकम्
१.	श्री सतुआ बाबा[१४] स्थानम्	जमुनादास जी-महाराजः	काशीविश्वप्रसिद्धः।
२.	श्री फलाहारिणः स्थानम्	श्री दामोदर दासः	गिरिना इति नाम्ना प्रसिद्धः।
३.	श्री नृसिंहमन्दिरम्	श्री कमलदासः	संगमनेर इति नाम्ना प्रसिद्धः।
४.	श्री लक्ष्मीनारायण मन्दिरम्	श्री कमलदासः	नासिकइति नाम्ना प्रसिद्धः।
५.	श्री बिहारी जी इति	श्री राधिकादासः	विहाली इति नाम्ना प्रसिद्धः।
६.	श्री गोपिनाथ जी इति	श्री बड़ादांगा इति	बूँदी इति नाम्ना प्रसिद्धः।
७.	श्री गोपीनाथः	श्री कल्याणदासः	सोलग इति नाम्ना प्रसिद्धः।
८.	श्री बिहारी जी इति	श्री उद्धवदासः	नैनुवाँ इति नाम्ना प्रसिद्धः।

९. श्री रघुनाथ जी इति	श्री रामस्वरूपदासः	कोटा इति नाम्ना प्रसिद्धः।
१०. श्री गोपाल् जी इति	श्री भागीरथदासः	किराके इति नाम्ना प्रसिद्धः।
११. श्री विहारी जी इति	श्री हरिनामदासः	पौण्ड्री इति नाम्ना प्रसिद्धः।
१२. श्री गोपाल जी इति	श्री छोटूदासः	टेरकी इति नाम्ना प्रसिद्धः।
१३. श्री दाऊ जी इति	श्री श्यामदासः	टेरकी इति नाम्ना प्रसिद्धः।
१४. श्री विहारी जी इति	श्री घुरेदासः	कारना इति नाम्ना प्रसिद्धः।
१५. श्री विहारी जी इति	श्री रामटहलदासः	गारे इति नाम्ना प्रसिद्धः।
१६. श्री गोपाल जी इति	श्री नरसिंहदासः	धतीर इति नाम्ना प्रसिद्धः।
१७. श्री दाऊ जी इति	श्री देवादासः	जखनगाँव इति नाम्ना प्रसिद्धः।
१८. चतुर्भुजी	श्री महेशदासः	जुडेहरा इति नाम्ना प्रसिद्धः।
१९. श्री गोपाल जी इति	श्री रघुनाथदासः	पीपरखेड़ा इति नाम्ना प्रसिद्धः।
२०. श्री गोपाल जी इति	श्री लक्ष्मिनदासः	बोरौला इति नाम्ना प्रसिद्धः।
२१. श्री गोपाल कुण्डम्	श्री आनन्ददासः	अजमेर इति नाम्ना प्रसिद्धः।

२२.	श्री गोपाल जी इति	श्री आनन्ददासः	अजमेर इति नाम्ना प्रसिद्धः।
२३.	श्री राधामोहन जी इति	श्री त्रिवेणीदासः	सादातपुरनाचनी इति नाम्ना प्रसिद्धः।
२४.	श्री गोपाल जी इति	श्री हरिदासः	सिकन्दरा इति नाम्ना प्रसिद्धः।
२५.	श्री जगन्नाथ जी इति	श्री मथुरादासः	गीजगढ़ इति नाम्ना प्रसिद्धः।
२६.	श्री मोहन जी इति	श्री हनुमानदासः	तमावा इति नाम्ना प्रसिद्धः।
२७.	श्री जगन्नाथ जी इति	श्री केशवदासः	केमरी इति नाम्ना प्रसिद्धः।
२८.	श्री रणछोड़ जी इति	श्री केशवदासः	भिवानी इति नाम्ना प्रसिद्धः।
२९.	श्री लाल जी इति	श्री तुलसीदासः	पीपली इति नाम्ना प्रसिद्धः।
३०.	श्री दुःखभञ्जन हनुमान इति	श्री बलरामदासः	इटगावाँ इति नाम्ना प्रसिद्धः।
३१.	श्री जगन्नाथ-बल्लभ जी	श्री बलरामदासः मन्दिरम्	जगन्नाथ इति नाम्ना प्रसिद्धः।
३२.	श्री रणछोड़ जी इति	श्री नारायणदासः	अहमदाबाद इति नाम्नाप्रसिद्धः।
३३.	गोवर्धननाथ जी इति	श्री तुलसीदासः	कुचामन इति नाम्ना प्रसिद्धः।
३४.	श्री बाँके बिहारी जी इति	श्री विष्णुदासः	जोधपुर इति नाम्ना प्रसिद्धः।

३५. श्री चौथा देवड़ी जी इति	श्री हनुमानदासः	जोधपुर इति नाम्ना प्रसिद्धः।
३६. श्री गोवर्धननाथ जी इति	श्रीकेशवदासः	जोधपुर इति नाम्ना प्रसिद्धः।
३७. श्री मेवासे की छतरी इति	श्री रामदासः	जोधपुर इति नाम्ना प्रसिद्धः।
३८. श्री यात्रियों का प्याऊ इति	श्री राम जीवन दासः	जोधपुर इति नाम्ना प्रसिद्धः।
३९. श्री सिंगी जी की हवेली इति	श्री सन्तदास जी इति	जोधपुर इति नाम्ना प्रसिद्धः।
४०. श्री गोवर्धननाथ जी इति	श्री विष्णुदासः इति	कोटा इति नाम्ना प्रसिद्धः।
४१. श्री विहारी जी इति	श्री मुरारिदासः	बेरीकपरा इति नाम्ना प्रसिद्धः।
४२. श्री गोवर्धननाथ जी इति	श्री व्रजवल्लभ दासः	पाली इति नाम्ना प्रसिद्धः।
४३. श्री गोवर्धननाथ जी इति	श्री बालकदासः	एटा इति नाम्ना प्रसिद्धः।
४४. श्री गोवर्धननाथ जी इति	श्री प्रेमदासः	हिम्मतपुर इति नाम्ना प्रसिद्धः।
४५. गोवर्धननाथ जी इति	श्री वनवारीदासः	सैदपुर इति नाम्ना प्रसिद्धः।
४६. गोवर्धननाथ जी इति	श्री गोविन्ददासः	बम्बई इति नाम्ना प्रसिद्धः।
४७. गोवर्धननाथ जी इति	श्री किशनदासः	भुवालडी इति नाम्ना प्रसिद्धः।

४८. गोवर्धननाथ जी इति	श्री श्यामदासः	सोनासन इति नाम्ना प्रसिद्धः।
४९. गोवर्धननाथ जी इति	श्री नरसिंहदासः	कुर्दरायपुर इति नाम्ना प्रसिद्धः।
५०. गोवर्धननाथ जी इति	श्री सुदर्शनदासः	तिहाई इति नाम्ना प्रसिद्धः।
५१. गोवर्धननाथ जी इति	श्री सुन्दरदासः	रणौज इति नाम्ना प्रसिद्धः।
५२. गोवर्धननाथ जी इति	श्री रघुनन्दनदासः	शाहपुरा इति नाम्ना प्रसिद्धः।
५३. गोवर्धननाथ जी इति	श्री रामदासः	खोड़वेड़ी पंजाब इति नाम्ना प्रसिद्धः।
५४. गोवर्धननाथ जी इति	श्री जगन्नाथदासः	जूलवाड़ी इति नाम्ना प्रसिद्धः।
५५. गोवर्धननाथ जी इति	श्री बजरंगदासः	गिरिधरपुर इति नाम्ना प्रसिद्धः।
५६. गोवर्धननाथ जी इति	श्री चेतनदासः	गुहाना (रोहतक) इति नाम्ना प्रसिद्धः।
५७. गोवर्धननाथ जी इति	श्री विधैतबाबा इति	दयाली का नगरा इति नाम्ना प्रसिद्धः।
५८. गोवर्धननाथ जी इति	श्री जानकीदासः	रामबाग इति नाम्ना प्रसिद्धः।
५९. गोवर्धननाथ जी इति	श्री भौरीदासः	इमलारी (अनवर) इति नाम्ना प्रसिद्धः।
६०. गोवर्धननाथ जी इति	श्री बंकटदासः	नवागाँव खुडमुडी इति नाम्ना प्रसिद्धः।
६१. अखिल भारतीय चार सम्प्रदाय (विष्णुस्वामी), श्री बाला जी मंदिर	श्री महन्त राम लखन दास महाराज गुरु गंगादास जी महाराजा	श्री बाला जी मंदिर एवतमाल, महाराष्ट्र
श्रीराम मंदिर	ओंकारदास गंगादास	कालापीपल, शाजापुर म.प्र.

व्रज[१५]स्थानाश्रमाः

आश्रमनाम	आचार्यः	प्रसिद्ध स्थानम्
श्रीगोवर्धननाथमन्दिरम्	श्री कलाधारी	वृन्दावनम्
१. श्री व्रजमोहन जी इति	श्री कलाधारी	वृन्दावनम्
२. श्री कलाधारी का बगीचा इति	श्री महन्तदयाल दासः	वृन्दावनम्
३. श्री विष्णुस्वामिपीठः	श्री महन्तदयाल दासः	भतरौंड वृन्दावनम्
४. श्री विजयविहारी इति	श्री विष्णुस्वामी	अखाड़ाइति वृन्दावनम्
५. श्री मोहन जी इति	श्री पूरनदासः	मथुरा इति
६. श्री नारायणदासस्थानम्	श्री पूरनदासः	मथुरा इति
७. श्री मुरली मनोहर जी इति	श्री श्यामसुन्दर दासः	कामवनम् इति
८. श्री मोहन जी इति	श्री बलदेवदासः	कामरि इति
९. श्री बलदाऊ जी इति	श्री प्रेमदासः	राल इति
१०. श्री राधामोहन जी इति	श्री रामरतन-दास जी इति	चौमुहाँ इति
११. श्री बद्रीनाथ जी इति	श्री श्यामलदासः	सोहनद इति
१२. श्री दाऊ जी इति	श्री गोपालदासः	मुखरारी इति
१३. श्री रघुनाथ जी इति	श्री रामदास जी इति	कुडेर इति
१४. श्री गोपाल जी इति	श्री गिरिवरदासः	हातिये इति
१५. श्री विहारी जी इति	श्री मानदासः	जानू इति

१६. श्री रघुनाथ जी इति	श्री मानदासः	खरोट इति
१७. श्री विहारी जी इति	श्री देवनारायण दासः	बदनगढ़ इति
१८. श्री विहारी जी इति	श्री देवनारायण	बठैन कला दासः इति
१९. श्री विहारी जी इति	श्री विहारीदासः	धमसींगा इति
२०. श्री विहारी जी इति	श्री हरीदासः	बरचावली इति
२१. श्री विहारी जी इति	श्री चूडादासः	राजागढ़ी इति
२२. श्री गोपाल जी इति	श्री हरीदासः	राप इति
२३. श्री हरदेव जी इति	श्री गोवर्धनदासः	मथुरा इति।
२४. श्री टोटाबाबा का कुञ्ज इति	श्री दयालदासः	रूपनगर इति
२५. श्री विहारी जी इति	श्री राधाचरणदासः	पहाणी इति
२६. श्री ललित अटा इति	श्री पूरनदासः	ऊँचेगाँव इति
२७. श्री नारायण दास इति	श्री कोथड़ा इति	मथुरा इति
२८. श्री गोपाल जी इति	श्री रामचरनदासः	कोथड़ी इति
२९. श्री गोपाल जी इति	श्री बालकृष्णदासः	जैत इति
३०. श्री रामताल जी इति	श्री युगलदासः	नौनेरा इति
३१. श्री दाऊ जी इति	श्री हरिकिशनदासः	भद्रवन इति
३९. श्री दाऊ जी इति	श्री यमुनादासः	रायपुर इति

एतान् परित्त्यज्य दीघ, दुलाना, टीकरी खैरार, सीकरी इत्यादिष्वप्याश्रमाणि सन्ति। विष्णुस्वामिसम्प्रदायस्य।

।। इतिशम् ।।

ग. विष्णु स्वामिसम्प्रदायस्यमुख्यस्थानम्

आचार्यो विष्णुस्वामी कलापग्रामे सन्यासंगृहीत्वा तीर्थयात्रा प्रसङ्गेन शुद्धाद्वैतस्य अपरपर्यायो विशुद्धाद्वैतस्य प्रचारः प्रसारः कुर्वन् उत्तराखण्डतः हस्तिनापुरमटन् श्री वृन्दावनधामे कियत्कालपर्यन्तं निवासञ्चकार। पश्चात् व्रजभ्रमितः ब्रह्मावर्त्तं नैमिषारण्यञ्चाटन् तीर्थराजप्रयागमागतवान। तत्र सम्पूर्ण तीर्थकृत्यानि कृत्वा चित्रकूटात् काशीं बव्राज। काश्यां भगवतोविश्वनाथस्य दर्शनं कृत्वा विद्वत् समाजे शुद्धाद्वैतवादस्य प्रतिपादनं कृतम्। काशीतः गयाक्षेत्रं गत्वा गङ्गासागरं बव्राज तथा तत्रैव भगवतः कपिलस्य दर्शनं कृत्वा श्रीमज्जगन्नाथधामं जगाम। यदा[१६] आचार्य श्रीजगन्नाथधामं जगाम तदा मन्दिरे केवलमेकमेव मुख्यद्वारमासीत् यभिदानीं जनाः 'सिहद्वारं' कथ्यन्ते पुरीतः मर्हेंद्राचलं सप्तगोदावरीं श्री विष्णुस्वामी काञ्चीनगरीं गत्वा श्रीवरदराजभगवद्दर्शनं कृतवान्। एवम् प्रकारेण सम्पूर्णभारतवर्षे भक्तिविजयपताकायाः स्थापना जाता। तथा श्री बालगोपालाराधना प्रतिगृहं प्रचारिता प्रसादिता च। विद्वांसः आचार्यस्य भाष्योपरिटीकां प्रस्थानचतुष्टयाध्यापनञ्च कृतवन्तः।

आचार्यपीठस्थापनम्

दिग्विजयानन्तरमाचार्यविष्णुस्वामी मथुरां जगाम। दिग्विजयोपलक्ष्ये मथुरायां महासमारोहेण सह महोत्सवञ्चकार आचार्यमहाराजपाण्ड्यविजयस्य मनसि मदुरायामेव प्रधानपीठस्य स्थापना भवतु इत्यभिलाषा आसीत्। परन्तु आचार्येण कथितं यत पीठस्यकृते काञ्ची एव समीचीना। स्वीयजन्मभूमौ अवस्थानं आचार्यस्यकृते मर्यादानुरूपं नास्ति।

निस्पृहस्वभावनित्यानासक्त श्री विष्णुस्वामिनः जागतिकवस्तूनां लालसानासीत्। अतः विष्णुस्वामिजन्मभूमिः बन्धनहेतुः नास्तिस्म। परन्तु आचार्यस्य कृते स्वीयानुगतानां आदर्शस्य ध्यान-मावश्यकमासीत्। अनुगतजनाः आचार्यस्यानुकरणञ्चक्रुः। तदाचार्य-

मदुरात: स्वीयाराध्यश्रीबालगोपालमूर्तिं गृहीत्वा काञ्चीं[१७] जगाम। काञ्च्यां श्री वरदराजमन्दिरस्यं सन्निकटे भागएको 'विष्णुकाञ्ची' तथा शेष भागस्तु 'शिवकाञ्ची' इति। वस्तुत: नगरमेकमेव तथा तत्र शैव-वैष्णवयो: भेदभावो न परिलक्ष्यते। [१८]यतोहि शिव काञ्च्यामेव अद्यापि भगवत: श्रीवामनदेवस्य मन्दिरं परिदृश्यते।

एवम् प्रकारेण आचार्यो निजसम्प्रदायस्यप्रधानपीठस्य स्थापनां विष्णुकाञ्च्यामेवचकार। दीक्षाप्रदानकाले आचार्य: समानरूपेण सकलान् शिष्यान् उपदेशयामास। उपदेशानां सारांशरूपेण प्रतिपादन-मावश्यकमतोदर्शयामि।

सच्चिदानन्दघनपुरुषोत्तमभगवान् श्रीकृष्णचन्द्र: प्रतिपाद्यपरात्पर-तत्वमस्ति। श्रीमद्भागवते उल्लिखितमस्ति यदन्यावतारा: अंशरूपेण परन्तु श्रीकृष्ण: स्वयं भगवान् एव। श्री नृसिंहदेव: श्रीराम: श्वेतद्वीपस्य विराट च पूर्णमेव परन्तुवैकुण्ठे तथा गोकुले च श्रीकृष्ण: स्वयं परिपूर्णत्तमो वैकुण्ठे श्रीकृष्णस्य विलासमूर्ति: लक्ष्मीपति: नारायण:। तत्र नारायण चतुर्भुजरूपेणास्ति गोलोकेगोकुलेच स्वयं द्विभुजधारी श्रीराधाकान्त:। योगिन: अस्यैव तेजसो नित्यं ध्यायन्ति, एवं भक्तजना: भगवत: पादाम्बुजं ध्यायन्ति।

'पूर्णो [१९] नृसिंहौ रामश्च श्वेतद्वीप विराड्विभु:।
परिपूर्णतम: कृष्णो बैकुण्ठे गोकुले स्वयम्।।
वैकुण्ठे कमलाकान्तो रूपभेदाश्चतुर्भुज:।
गोलोके गोकुले राधा कान्तोऽयं द्विभुज: स्वयम्।।
अस्यैव तेजो नित्यं च चित्ते कुर्वन्ति योगिन:।
भक्ता: पादाम्बुजं तेज: कुत: तेजस्विना विना'।।

भक्तिमार्गेषु विभिन्नावरोधा: सन्ति। ते अवरोधमूलकापराधा: भक्ते: पवित्रताया: म्लानं कुर्वन्ति। भगवदपराधत: मुक्तम् भवितव्यम्।

१. यथा सच्चिदानन्दघनस्य सर्वेश्वरस्य निखिलब्रह्माण्ड-नायकस्य सर्वकारणकारणस्य परात्परंश्रीहरिदेवताया विशेषरूपेण अथवा तत्वविशेषरूपेण ज्ञानम्।

२. भगवत्स्वरूपान्अनाद्यपौरुषेयवेदान् पुरुषकर्तृकेस्वीकारे अपराधः।

३. भगवतः भक्तेषु जातिभेदकरणं जातिभेदकरणमपि भक्तिमार्गेऽपराधो वर्तते। यतोहि जाति-विद्यारूपकुलाधनानि भगवत एव सन्ति। अतः वन्दनीयाः।

४. स्वगुरुंसाधारणमनुष्यरूपेण स्वीकरणमपि अपराधः।

५. भगवतः मूर्तिपाषाण-काष्ठ-धातु-मणिभृतिका-रूपेणाङ्गीकरणमपि अपराधः।

६. सामान्यभोज्यपदार्थरूपेण भगवत्प्रसादाङ्गीकरणमपि अपराधः।

'महा[२०] प्रसादे गोविन्दे नाम्नि[२] ब्रह्मणि वैष्णवे।
स्वल्पपुण्यवतां राजन् विश्वासो नैव जायते।।

७. भगवच्चरणोदकं साधारण जलस्वीकारेऽपि अपराधः

'अकाल[२१] मृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पीत्वा पुनर्जन्म न विद्यते।।

८. हरिप्रियायाः तुलस्याः कृते साधारणवृक्षरूपेण अङ्गीकरणेऽपि अपराधः।

९. निखिलदेवमयीं गां साधारणपशुरूपेण ज्ञानमपि अपराधः। गावो विश्वस्य मातरः।

१०. श्रीमद्भगवद्गीतां च सामान्यग्रन्थज्ञानमपि अपराधः।

११. भगवल्लीलाः मनुष्यकृताङ्गीकारेऽपि अपराधः।

१२. सांसारिकप्रेम्णा[२२]सहं भगवत् प्रेम्णः तुलनाऽपि अपराधः। उपर्युक्तापराधास्तथा[२] अन्यापराधा अन्यत्र परिदृश्यन्ते।

।। इतिशम् ।।

卐

घ. विष्णुस्वामी च तत्स्थानपरम्परा:

आचार्यैः ग्रन्थेषु स्वजन्मस्थानस्य कालस्य च परिचयो नदत्तस्तथापि वल्लभदिग्विजयमनुसृत्य लिख्यते।

भगवान्[२३] विष्णुस्वामी दक्षिणभारतस्य मदुराराज्यस्य पाण्ड्यविजयनामकराज्ञः कुलगुरोस्तथा मन्त्रिणोदेवस्वामिनः पुत्रः। तथा विष्णुस्वामिनः माता यशोमती आसीत्। देव स्वामिनः यथा नाम तथा कर्म आसीत्। मदुराराज्यस्य प्रजाः देवस्वामिनः सदुपदेशान् अक्षरशः पालने तत्पराः आसन्। यशोमती देवी न केवलं पतिप्राणानारी आसीत् अपितु धर्मप्राणापि आसीत्।

विष्णुस्वामिनः पित्तुर्नाम हिन्दी साहित्यस्य प्रख्यातकवेः भारतेन्दु हरिश्चन्द्रस्य '[२४]भारतेन्दु समग्र' नामके ग्रन्थे पृथगुपलभ्यते। उक्त ग्रन्थे विष्णुस्वामिनः पितुर्नाम नारायणभट्ट प्राप्यते। देवस्वामिनः जीवने कस्यापि वस्तुनः अभावो नासीत् परन्तु पुत्राभावत्वात् मानसिक-दुःखमासीत्। देवस्वामी जानाति स्म यत् पुत्रस्य अत्यावश्यकता वर्त्तते। यतोहि—पुं. नामकनरकात् त्रायते इति पुत्रः। पुत्राभावे पिण्डदानादिक्रियाः न सम्यक्तयाभविष्यन्ति। देवऋणतः ऋषिऋणतो वा मुक्तो भवितुमर्हामि परन्तु पितृऋणतः मुक्त्यर्थं पुत्रस्य आवश्यकता वर्त्तते। यावत् कालपर्यन्तं त्रिविधऋणतो मुक्ति र्न भविष्यति तावत् कालपर्यन्तं गृहस्थाश्रमं परित्यज्य सन्यासाश्रममहभङ्गीकर्तुं न शक्यते। साम्प्रदायिकमान्यतानुसारेण भगवान् विष्णुस्वामी विक्रम सम्वत् ६०० वर्ष प्राग् भाद्रपदकृष्ण सप्तम्यां गुरुवासरे जन्म लेभे।

'भारतेन्दु समग्र' ग्रन्थानुसारेण आचार्य विष्णुस्वामी रोहिणी नक्षत्रे भौमवासरे द्विप्रहरे जन्म लेभे। 'सम्प्रदायप्रदीप' ग्रन्थस्य हिन्द्यनुवादककण्ठमणिशास्त्रिणः हिन्द्यनुवादग्रन्थस्य द्वितीयप्रकरणानु-सारेण श्रीमद् विष्णुस्वामिनः समयः विक्रमसंवत् ७०० वर्षात् प्रागेव निश्चप्रचमिति परिलक्ष्यते।

शुक्लपक्षस्य चन्द्रमा यथा शनैः शनैः पूर्णतां प्राप्य एकदा सम्पूर्णपूर्णताँल्लभ्यते तथैव आचार्यदेव स्वामिनः पुत्रः विष्णुस्वामी शैशवावस्थां बाल्यावस्थां किशोरावस्थाञ्चातिक्रम्ययुवावस्वां प्राप्तवान्। शैशवावस्थायामात्यन्तिकसुन्दरताया हेतोः पौरस्त्यापौरस्त्याः सर्वे स्वे स्वेऽङ्के स्थापयितुं लालयिता आसन्। देवस्वामिनो ज्ञानेनकीर्तिः सदाचारपरायणेन गृहस्थाश्रमस्य पवित्रता आसीत्। परन्तु विष्णुस्वामी इव देवप्रदत्त बालकम्प्राप्य स्वीयग्रहस्थाश्रमस्य मर्यादा पवित्रता च क्रमशः परिवर्द्धिते। देवस्वामिनः सामाजिक मर्यादापि परिवर्द्धिता। देवस्वामिनो भवने भक्तजना आगत्य बालकविष्णुस्वामिनः स्वरूपं दृष्ट्वा विमुग्धा जाताः। लोके विशेषतः भारते सनातनपरम्परानुसारेण मनुष्याणां षोडशसंस्कारकार्याणि भवन्ति। भारतीयशाश्वतपरम्परानुसारेण गवादिपशूनामपि कानि चित्संस्कारकार्याणि भवन्ति। मनुष्याणां का कथा देवस्वामिनः गृहे बालकस्य जन्मनि क्रमशः जातकर्म षष्ठी, भूमिस्पर्शनं, भास्करदर्शनं द्वादशाह्निकं दोलारोहणं पयः पानं, धात्रीवरणमित्यादीनि कार्याणि शास्त्रविधिमनुसृत्यसम्पादितानि। एतानि कार्याणि विहायकुलाचारमूलककार्यमपि कारितम्। देवस्वामी तत्रत्यानां जनानां श्रद्धेय आसीत्। सर्वविधसंस्कारकार्याणि भव्यसमारोहेण चकार। देवस्वामी समयानुसारेण विष्णुस्वामिनः शिक्षायाः श्री गणेशः कृतवान्। विष्णुस्वामी अक्षरज्ञानं ग्रन्थाध्ययनस्य शक्तिञ्च शिक्षायाः पूर्वम् एव लेभे। विष्णुस्वामिनः सर्वाणि वस्तूनि कण्ठस्थीकरणे महत्प्रचेष्टायाः आवश्यकत्ता नासीत्। वारमेकं श्रवणेनसर्वमनायासेनलभ्यमासीत्। विष्णुस्वामिनः शिक्षाकालेऽद्भुतः परिचयः प्राप्यते। एकदा विष्णुस्वामी स्वयमेव पप्रच्छ आचार्यचरणम् विष्णुस्वामी कथयामास[२६]—'भो आचार्यचरण यदि भवदाज्ञा स्यात् तर्हि यत् सूत्रार्थं मे मनसि उपलभ्यते तन्निवेदितुमिच्छामि। विष्णुस्वाम्यतिरिक्तोऽन्ये ब्रह्मचारिणः सूत्रार्थवहनपटवः आसन् परन्तु आचार्यचरणः केवलं विष्णुस्वामिनः सुललितकण्ठतः सुललितभाषया सूत्रार्थनिगूढतत्वश्रवणे 'आश्वासनं[२७] चकार। विष्णुस्वामिनः व्याख्या स्पष्टा सुगमा सुपरिमार्जिता च आसीत्। श्रीविष्णुस्वामिनः तत्वपूर्णव्याख्यां

श्रुत्वा आचार्यचरणाः चकिता अभूवन्। यदा विष्णुस्वामी स्वल्पसमये वेद-वेदाङ्गादिशास्त्राणि अधीत्य श्रुतीनामध्ययनं चकार तदा विष्णुस्वामिना सूचितं यत् बहुविधमन्त्राणां स्वरमपि[२८] जानामि।

आचार्यदेवस्वामी एकस्मिन् दिवसे यशोमतींदेवीं तथा महाराजपाण्ड्यविजयमपि कथयामास यत् 'अहं यत्ः किमपि जानामि, विष्णुतदध्ययनं सम्पूर्णतया कृतवान् एव'। माता यशोमत्यादेव्यासह अवस्थान काले विष्णुस्वामिनः तुलसीपूजने गो पूजने या रुचिः परिलक्ष्यते सा पितृसन्निधौ अवस्थानकाले सन्ध्याकर्मणि देवार्चने सा सुरुचिः परिदृश्यते।

यदा[२९] देवस्वामी विधिपूर्वकमाचम्य प्राणायामं च कृत्वा भगवदाराधनकर्मणि लीन आसीत् तदा पितरमनुकृत्य बालक-विष्णुस्वाम्यपि क्रीडारूपेणासनोपरि अवस्थाय लीनः परिलक्ष्यते स्म। पश्चात् किशोरवस्थायां मित्रैः सह भगवत् सेवा पूजनादि क्रिया कृतवान् आसीत्। यद्यपि तस्मिन् समये सामान्य पत्र-तुलसीपत्रयोः तुलनाकरणे विष्णुस्वामी असमर्थ आसीत् तथापि बालकानां कल्पितमूर्त्तौ अर्चनायाः शिक्षा प्रदाता आसीत्।

उपनयनात् प्राक् श्री विष्णुस्वामीनिर्जनप्रिय आसीत्। मनोयोगपूर्वकमध्ययनेन सरस्वतीं देवीं तोषयित्वा तस्याः सेवां गृहीतवान्। परन्तु अध्ययनसमाप्ते सति श्रीविष्णुस्वामिनः प्राक्प्रवृत्तिः पुनरागता।

भगवान श्रीकृष्णएव जीवानाम्परमप्रेमास्पदः एवम्प्राप्यः। श्री नन्दनन्दस्य सेवा एव मनुष्याणां सर्वोपरि कर्तव्यमस्ति। अतः श्रुवि-स्मृति-पुराण-समर्थितभक्तिः सर्वोपरि साधनमस्ति। एवम् प्रकारचिन्तने मनसि तस्य नासीत् काचिच्छङ्का पितृदेवपरम्परात भक्तिं लेभे। श्रीविष्णुस्वामिनः मनसि भावनेयमासीत् यत् श्रीश्यामसुन्दरः केवलं प्रेमवश्यः बाल्यावस्थात एव श्रीविष्णुस्वामी नवधा भक्त्यनुकूलाचरणं कृतवान् आसीत्।

श्रीविष्णुस्वामिनः मनसि निरन्तरं भगवद्दर्शनलालसा आसीत्। श्री विष्णुस्वामी भगवच्छ्रीकृष्णस्य बालमूर्तिनिर्माणं कारयित्वा तस्य स्थापनाञ्चकार। तदनुयायिनोऽपि विमलसाधनाया उपदेशं प्राप्य साधनतत्परा आसन्। ब्राह्ममूहूर्त्ते उत्थाय प्रतिदिनं स्वीयाराध्यचिन्तने निमग्नोऽभवत्। श्रीविष्णुस्वामिनः मनसीयम्भावनासीत्, यद विवशतावशतोऽपि श्रीभगवन्नामोच्चारणेन सम्पूर्णपापराशीनां नाशो अनिवार्यएव। यः खलु श्री भगवच्चरणशरणं गतः श्री हरिः क्षणमपि तं न परित्यजति। श्रीमद्भागवतेऽपि भगवता श्री वेदव्यासेनोक्तम् यत्—

विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृतांघ्रिपद्मः स भवति भागवत प्रधान भक्तः।।

भगवद्भजने तथा भगवति अहैतुकभक्तिम् दृष्ट्वा श्री देवस्वामिनः मनसि अतीव प्रसन्नता जाता। परन्तु यशोमत्याः देव्याः मनसि विष्णुं प्रति प्रसन्नता नासीत्। यतोहि मातादृष्टवती यत् विष्णुः केवलं भगवदाराधनायां व्यापृतः कदा स्नानं कर्त्तव्यं, कदा वा न कर्त्तव्यं कदा भोजनं कर्त्तव्यं कदा च शयनं कर्त्तव्यमित्यादिषु कर्मसु ज्ञानं नासीत्। मातृचित्ते विष्णुस्वामिनः तादृशी परिस्थितिः वेदनायुताभवत्। यशोमत्याः देव्याः वेदनायाः मूलकारणं बात्सल्यस्नेहः क्रमेणमवर्द्धमानां भक्तेरन्तर्मुखतां च निरीक्ष्य देवस्वामी हृष्टचित्तो जातः। देवस्वामी विदितवान् आसीद् यत् सः गुरुः गुरुः नास्ति यः स्वजनान् मृत्युतः न मोचयेत् स पिता पिता नास्ति सा माता माता नास्ति तद्देवं दैवं नास्ति, तत् पति पतिर्नास्तियो मृत्युपाशतः न मोचयेत्। दृश्यते श्रीमद् भागवते श्लोकरूपेण उक्ताशयः—

गुरुर्न[३०] स स्यात्स्वजनो न स स्यात्
पिता न स स्याज्जननी न सा स्यात्।
दैवं न तत्स्यान्न पतिश्च स स्यान्
न मोचयेद्यः समुपेत मृत्युम्।।

आराधनाकाले विष्णुर्मनसि नवनवा चिन्ता जाता कदाचिच्चिन्तयति यदिदानीं बालगोपालस्य भोजनकाल: कदाचिच्चिन्ता जाता यद् गोपालस्येदानीं शयनसमय: कदाचिद् भावना जाता यत् तस्य खलु स्नानकाल: एतादृश्य: चिन्ता: भगवत् सम्बन्धिन्य: क्षणे क्षणेजाता:। उक्तप्रकारेण न केवलमेकद्विदिवसे अपितुसम्पूर्णवर्ष पर्यन्तंतादृशीभावना मनसि आसीत्। तथा भूते सति यदा भगवत् साक्षात्कार: न जात: तदा भगवद् विरहजन्यतापेन महत्कष्टमनुभूय कथयामास—

न [३१]प्रसीदति परमेशो न मत्सपर्यां स गृह्णाति।
न प्रत्यक्षी भवति न ममापराधं समाख्याति।।

प्रायश्चित्तकृतेऽहं निरशनमस्यापराधस्य।
यावद्दर्शनमीशो ददाति तावच्चरामि नियतात्म।।

प्रेम्णैव भगवत [३२]आविर्भावो भवति। शास्त्रेषु लिखितमस्ति यत् **प्रेम्णैव वश्यो हरिरादि देवो सदा प्रमाणं किल चात्रगोप्य:।** षष्ठ दिवसपर्यन्तमुपवासानन्तरं श्री विष्णुस्वामिन: शारीरिकशैथिल्यता जाता। तथापि निजसंकल्पस्य परिवर्तनं न कृतम्। परन्तु यदा सप्तमदिवस आगत: तदाविष्णो: शरीरे शक्तिर्जाता विष्णु: स्नानं कृत्वा बालगोपालस्य अर्चनाञ्च कृत्वा यज्ञार्थं समिधं एकीकृत्य अग्निं प्रज्वालयति स्म। श्री श्यामसुन्दरं प्रति कथितवान् यत् तादृशस्य शरीरस्य किं प्रयोजनं येन तव सेवा न भवति। अत: इदानी[३३] अग्नावेव स्वं समर्पयामि। उक्तवचनं श्रुत्वा भगवतश्चित्ते तदा भक्तवात्सल्यहेतुकचञ्चलता जाता। भक्तवाञ्छाकल्पतरुनवनीरद-कान्तिधरपीताम्बरपरिधानवनमाली श्रीहरिगिरिधारी मृदुहसन्नाविर्भूत:। श्रीविष्णुस्वामी भगवच्छ्रीकृष्णस्य किशोरावस्थां दृष्टवान्। सम्प्रदायप्रदीप ग्रन्थे श्रीकृष्णस्य स्वरूपं यद् यद् श्री विष्णुस्वामी दृष्टवान् तदित्थम्—

'सन्तं वयसि कैशोरे द्विभुजं पीतवाससम्।
नवीननीरदश्यामं पद्मगर्भारूणेक्षणम्।।१।।

रुचिरोरुभ्रूपुटन्यस्तवेणुवादनतत्परम् ।
शिखिपिच्छावतंसेन शोभितं वनमालया।।२।।

हारकंकणकेयूरमुद्रिकाभिरलं कृतम् ।
सुन्दरं निम्ननाभिञ्च हेममेखलया युतम्।।३।।

स्फुरन्नूपुरझङ्कारं वीरं श्रीरसिकं मुदा।
कल्पितहृद्यश्रृङ्गारं रसमूर्तिमनोरमम्।।४।।

पीतोत्तरीयसंवीतं त्रिभङ्गिललिताकृतिम्।
गण्डमण्डलसंसर्गिलसत्काञ्चनकुण्डलम् ।।५।।

तुङ्गगुल्फारुणनखव्रातदीधितिभिश्चितम् ।
पाणिपादतले पद्मपत्रारुणतयाऽन्वितम्।।६।।

श्यामलमूर्तिः श्रीकृष्ण उक्त[३५]वान् विष्णो! कथमियतकष्टं तथाकृतम्। अत्र सन्देहावसरो नास्ति यत् तव सेवा मेऽस्वीकरणीया। चिन्तय एवं यत् षष्ठदिवसपर्यन्तमहं क्षुधातआर्तोस्मि। उपविश, अधुना आवां मिलित्वा भोजनं करिष्यावः। भगवतोदिव्यातिदिव्यसौन्दर्यमवलोक्य परमानन्दमनुभूय च बद्धाञ्जलिं भूत्वा विष्णुस्वामी कथितवान्-प्रभो अज्ञानतावशतः यदपि कार्यं कृतं मया तत्सर्वं कृपामूर्तिर्भवान् क्षम्यताम् श्री विष्णुः श्रीविष्णुं उक्तवान्—'सौम्य त्वं किमिच्छसि? अहन्तत्पूरयामि। श्रीविष्णुः श्री विष्णुं कथितवान्—'प्रभो[३६] शरणागतवत्सलो[१] भवान् स्वजनं त्यक्त्वा दर्शनं प्रदत्तवान्, अतः कृतकृत्योऽहम् अधुना श्रीचरणसेवा प्राप्तिरस्तु, इयमेव मे प्रार्थना तदा श्री भगवतोक्तम्—'सौम्य! कलिप्रभावेण खलु यत्र तत्र इदानीं धर्मस्य ह्रासः अधर्मस्य च बृद्धिः परिलक्ष्यते, जगति भागवद्धर्मसुविस्तारार्थं त्वमेवागतवान्। अतः त्वं कियत् कालपर्यन्तं जगति अवस्थित्वा मे प्रियकार्यं कुरु।

'पुनर्भगवता[३७] विष्णुस्वामिनं प्रत्युत्तम् सौम्य! भगवद्गीता, श्रीभागवतं मे शास्त्रे अहमेव देव एक एव **कृष्ण तवास्मीति** पंचाक्षर वाक्येनात्मनिवेदनम्, नामैव मन्त्रः महाराजोपचारं विधिना सेवैव कर्म,

यस्त्वत्सम्प्रदायी भूत्वा यशोदागोप्युद्धवादिवत्परिचरिष्यति, मां प्रतिमारूपमपि साक्षान्मत्वा तत्कृतां सेवां पुरावद् गृहीष्यामि।

तदनन्तरं श्री भगवान् निजकरारविन्देन तुलसीमन्त्रोच्चारणपूर्वकं विष्णुस्वामिनः कण्ठदेशे माल्यं प्रदाय कथितवान् 'इदानीं त्वं श्री व्यास देवतः ब्रह्मसूत्रस्य तात्पर्यं तथा आचार्य त्रिपुरारेः सम्प्रदायिकदीक्षां गृहीत्वा मे प्रवर्तितरुद्रसम्प्रदायस्य स्वरूपं जगति प्रतिष्ठापय श्री व्यासदेवः कलापग्रामे तव प्रतीक्षां करोति। अधुना व्याकुलता वर्जनीया तथा सुस्थिरताया आवश्यकत्ता वर्त्तते यतोहि तदैव तत्र गन्तुं शक्नोति। एतदतिरिक्तान्याभिलाषा तव मनसि वर्तते चेत् तर्हि[३८] वद'। विष्णु स्वामी प्रार्थथामास भगवन्! यदि भवान् प्रसन्नोऽस्ति तर्हि अत्रैव वर्तमानस्वरूपेणावस्थानं करोतु।

राजोपचार[२] विधिनाहं सदैव भवत् सेवां कर्त्तुमिच्छामिं।

श्री भगवतोक्तम्—'सौम्य कलिकाले साक्षाद्रूपेण ममात्र निरन्तरं स्थितिः ममैव मर्यादानुसारं नास्ति। तदा भगवद्भावं श्रीविष्णुस्वामी स्वीकृतवान् तथा चिद्वपुः श्रीकृष्णः श्रीविग्रहरूपेण विष्णुस्वामिनं सम्प्राप्तवान्। तदा विष्णुस्वामी विग्रहरूपं प्रभुं परम प्रेम्णा सेवितवान्[३९]।

अधुना यथा तीर्थयात्रामार्गे सुगमता दृश्यते तथा प्राक्काले नासीत्। तथापि श्री विष्णुस्वामिनः उत्तराखण्डस्य दिव्यक्षेत्रे यत्र सामान्यनराणां कृते दुर्गमस्थानमस्ति गमनेऽभिलाषा आसीत्। तस्मिन् काले [४०]मदुरातः उत्तराखण्डपर्यन्तं सम्पूर्णदेशागम्यासीत् केवलं तत्कृते एव तीर्थयात्रा समीचीना आसीत् यः स्वीयसांसारिककर्त्तव्यपूर्णं कृत्वापुनः संसारे प्रत्यावर्त्तनं नाभिलषति। यतोहि यात्रार्थं गृहतः बहिर्गमने कदाचित् दृश्यते यत् यः खलु तीर्थाटने गतवान सः न प्रत्यागतवान्। तद्विदित्वा यशोमतीदेवी निजपुत्रं तीर्थयात्रायाः कृतेऽनुमतिं न ददौ। यतोहि पुत्रमोहवशतः तन्मनसि तीव्रव्याकुलतासीत्। परन्तु देवस्वामिनः मनसि एतज् ज्ञानमासीत यच्छ्यामसुन्दरः स्वयमेव विष्णुं वेद-व्यास-दर्शनार्थमुपदेशञ्चकार।

अतः नोपेक्षणीयोऽयमा[४१]देशः। अन्ततोगत्वा देवस्वामी स्वसहधर्मिण्याः कृते वास्तविकतां अवबोधयित्वा परामर्शकृते सति उभयोरादेशेन विष्णुः गतवान्। समयानुसारेणविष्णुस्वामिनः शुभयात्रा नासीत् काचिद् बाधा भविष्यति। पितरौ प्रणम्य विष्णुः मदुरातः प्रस्थानं कृतवान्। मार्गे कदाचित् मिलतिस्म अरण्यम्, आश्रमः देवस्थानं पुण्याः सरितश्च। अन्ततः विष्णुः अलकानन्दतटस्थितं श्री बदरीनाथधामं गतवान् तथा तत्र तीर्थकृत्यं कृत्वाग्रे गतवान्। भगवान् श्रीवेदव्यासः कल्पान्तजीवी अस्ति। यदा श्री विष्णुस्वामी तत्रगतवान तदा दृष्टवान् गिरिगह्वरे शिलापीठोपरि परमतेजस्वी श्रद्धावनतमुनीपरिवेष्टितः प्रकाशमूर्तिः ज्ञानप्रचारकः शास्त्राणां साक्षात स्वरूपरूपेण भगवान् श्रीकृष्णद्वैपायनो[४२] विराजते। तदा विष्णुस्वामी स्वगोत्रोच्चारणपूर्वकं स्वस्य नाम गृहीत्वा पृथ्व्यां साष्टाङ्गं प्रणिपत्य निवेदयामास। तदा श्रीवेदव्यासः कथितवान्—'किं भवान्[४३] मदुरातः आगतवान्? भवत् प्रतीक्षारतोऽहम्'। भगवान् व्यासः मर्यादारूपेण स्वकीयवरदहस्तमुत्थाय आर्शीवादं ददौ। श्री विष्णुस्वामी विनम्रतापूर्वकं प्रार्थयामास यत्—श्याम[४४]सुन्दरः मां भवतश्चरणयोरूपस्थितार्थं आदेशं ददौ। सर्वज्ञो भवान् भवदाज्ञापालनार्थं प्रस्तुतोऽहम्। भगवान् व्यासस्तु कथयामास यत् कलिकल्मषाच्छन्नयुगे भक्तेः पुनीतप्रकाशभवलोक्य प्राणिनामुद्धारार्थं साक्षात् विष्णुस्वयमवत्तीर्णः। तत् परिचयप्रदाने मुनिमण्डल्यः प्रसन्ना जाताः। श्री हरिः सदैव परम्परां रक्षति। अतः ब्रह्मसूत्राणां तात्पर्यं बोधयामि। यद्यप्ययं कार्यमनावश्यकं तथापि परम्परा रक्षा हेतुः आवश्यकमस्ति। स्वल्पसमये श्रीव्यासविष्णुं ब्रह्मसूत्रतात्पर्यं बोधयामास। श्रीमद् भगवद्गीतायाः उपनिषदश्च उभयोः शास्त्रयोरैकतामपि श्रीवेदव्यासेन स्पष्टीकृता। एवम्प्रकारेण शास्त्राणां ज्ञानदीक्षा भगवतो व्यासतः श्री विष्णुस्वामिना सम्प्राप्ता। विष्णुस्वामी बद्धाञ्जलीभूय प्रार्थयामास—**'प्रस्थानचतुष्टयं विना[४५] कस्यापि ज्ञानं परिपूर्णं न भवति'**। भगवान व्यासो अत्यन्तप्रसन्नो जातः। तेन गदितं—'यद्यपि श्रीमद् भागवतस्य निर्माणं मयाकृतं परन्तु तच्छात्रस्य रहस्यन्तु महामुनिः श्रीशुकदेव एव

जानाति। यतोहि तत्परमहंससंहितायाः परास्थितौ तस्यैव नित्यस्थितिरस्ति। तवकृते तद्दर्शनं न खलु दुर्लभम्। प्रस्थानचतुष्ट्यानां प्रधानाङ्गं लभताम्।

कलापग्रामस्य मार्गे तु तद्दर्शनं भविष्यति। कलापग्रामं गत्वा तत्र श्रीविष्णुस्वामी श्यामसुन्दर इव नव नीरदश्यामपरमसुन्दरपरम-सुकुमारकिशोरवयः श्रीव्यासनन्दनः कस्मिश्चित प्रस्तरोपरि अवस्थितः इतिदृष्टः। विष्णुस्वामी अनुभवञ्चकार यत् साक्षात् श्रीकृष्णः अस्मत्कृते पुनर्मिलितवान्। उल्लासपूर्वकं विष्णु स्वामी तमानन्दमूर्तिं ननाम। यद्यपि गद्गद्कण्ठः श्रीविष्णुस्वामी स्वीयपरिचयं न दत्तवान्, तथापि श्री शुकदेवसम्यक्तयावगत आसीत्। सर्वज्ञः श्रीशुकदेव स्वयं सम्बोधयामास—'विष्णो त्वं धरायां आचार्यरूपेण आगतोऽसि। मनसि इयं भावनासीत् यत् त्वमद्यात्र आगमिष्यसि। मम सम्पत्तिस्तु श्रीश्रीमद् भागवतमेवास्ति। अहं त्वां श्रीमद् भगवतं प्रदास्यामि[१]। श्री विष्णुस्वामी भागवतोत्तमात् श्री शुकदेवतः पुराणममलं श्रीमद्भागवतंप्राप्य तच्छिक्षा कलापग्रामस्य नित्यसिद्धतापसानामाश्रमे लब्धवान्। शिक्षा संम्पूर्णे सति श्री शुकः कथितवान्—'विष्णो दीक्षां विना शिक्षायाः परिपूर्णतानास्ति। त्वया पारम्परिकदीक्षा ग्रहीतव्या यतः प्राणिनः भगवन्तं प्राप्तुं शक्नुवन्ति। अहन्तु दीक्षां प्रदातुं न शक्नोमि। परन्तु सौभाग्यवशतः भगवतो रूद्रदेवस्य शिष्यः आचार्यत्रिपुरारिरधुना खलु अत्रैवास्ति। तच्चरणे निदेवयितुं शक्नोति।

महामुनिः श्रीशुकदेवाज्ञां शिरोधार्य विष्णुस्वामी आचार्य-त्रिपुरारेश्चरणयोः प्रणिपत्य प्रार्थयामास भगवन्। श्रीश्यामसुन्दरः भवतश्चरणयोरुपस्थिते आदेशं ददौ। अतः श्री चरण[४६]योः समर्पयामि। आचार्यत्रिपुरारिः सुयोग्यशिष्यरूपेण विष्णुस्वामिनं प्राप्तवान्। झटिति दीक्षासंस्कारकर्मणः व्यवस्था जाता। हवनादिक्रियाः सम्पन्नान्तरं श्री त्रिपुरारिः विष्णुस्वामिनः ललाटपटले गोपीचन्दनेन श्री हरिचरणाकृतिविशिष्टोर्द्धपुण्ड्रतिलकञ्चकार। तदनन्तरमष्टादशा[४७]क्षर-गोपालमन्त्रमुपदिश्य आचार्यमन्त्रमुपदिश्य आचार्यः मन्त्रपरम्परां श्रावयामास। आचार्य कथितवान्—तव 'विष्णुनाम' इदानीं

'विष्णुस्वामी' भविष्यति। एवम्प्रकारेण श्री विष्णुस्वामिनः पञ्चसंस्कारपूर्वकं [४८]वैष्णवीयदीक्षासुसम्पन्ना जाता। श्री त्रिपुरारिः दीक्षान्ते विष्णुस्वामिनं उपदिष्टवान् मानवजन्मनः परमसाफल्यमेव श्रीकृष्ण-चरणयोः प्रीतिप्राप्तिः। श्रीविष्णुस्वामी ज्ञातवान् यत् निःस्वार्थरूपेण तथा निष्कामरूपेण भगवच्छरणागतेरावश्यकतावर्तते। भगवान् शङ्करः भगवतीं कथयामास शरणागति सम्बन्धे—

'सत्कर्मनिरताः[४९] शुद्धाः सांख्ययोगविदस्तथा।
नार्हन्ति शरणस्थस्य कलांश कोटितामपि।।
नारद[५०] पाञ्चरात्रेऽपि शरणागतेर्लक्षणमित्थम्-
'आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासः गोप्तुरवरणं तथा
विश्वासो वरणं न्यासः कार्पण्यमितिषड्विधा।।

उपासकः पूर्णतयाभिलाषा शून्यरूपेणेश्वराधनं करोति चेद् तर्हि श्री भगवान् स्वयमेव अर्थात् उपास्यः स्वयमेवोपासकस्य योगक्षेमं वहति।

श्रीमद्भगवद्गीतायां स्पष्टरूपेणपरिलक्ष्यते—

'अनन्या[५१]श्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।

आचार्यः स्वीयोपदेशस्योपसंहारे कथयामास—'विष्णु-स्वामी अधुना अवतारकार्यपूर्णार्थं निजजन्मभूमिं गत्वा भगवद्भक्तेः विस्तारार्थं पूर्णतया प्रचेष्टा करणीया। विष्णुस्वामी आचार्यचरणयोः साष्टाङ्ग-प्रणिपत्य स्वयं मनसि तुतोष। एवंप्रकारेण श्री विष्णुस्वामिने भगवान् श्रीवेदव्यासः शास्त्रशिक्षां ददौ। श्री शुकदेवतः श्रीमद्भागवतशिक्षां तथा श्री त्रिपुरारितः साम्प्रदायिकदीक्षां लब्धवान्।

आचार्यदिशं शिरोधार्य विष्णुस्वामी उत्तराखण्डतः प्रत्यावर्त्तनञ्चकार। मार्गे देवर्षिनारदेन सह साक्षात्कारः जातः।

श्रीमन्नारदेनोक्तं यदिदानीं भक्तेर्व्यापकप्रचार-प्रसारयोरावश्यकत्ता वर्त्तते। तत् पश्चात् विष्णुस्वामी श्रीनन्दनलीला भूमौ ब्रजभूमावागतवान् व्रजमण्डले मथुरा-वृन्दावन-वृहद्वन (गोकुलं) गिरिराज-वृहत्सानु (बरसाना)-नन्दग्रामान् दृष्ट्वा श्रीधामवृन्दावने कियत्कालं यापयामास। पश्चात् श्रीवृन्दावनतः प्रस्थानं कृत्वा मार्गस्थिततीर्थान्यटन्नवलोकयञ्च मदुरायां जगाम। मदुरायां महाराजपाण्डयविजयः स्वपरिकरेण सह विष्णुस्वामिनः स्वागतञ्चकार। तस्मिन् समये सूचना प्राप्ता यद् देवस्वामी यशोमतींदेवी चेहलोके नास्ति। यदा मम पितरौ गतवन्तौ इत्थमनुभूतः तदा तु सन्यासदीक्षां गृहीतवान्। कलापग्रामे एव यदा दीक्षावसरे अच्युतगोत्रं स्वीकृतं तदा तु गृहेण सह विष्णुस्वामिनः सम्बन्धः नासीत्। धर्मस्य स्वरूपद्वयं वर्त्तते परापरञ्च। अपरधर्मस्तु लौकिकधर्मः यथा मातृधर्मः पितृधर्मश्च। लौकिकधर्मपालने खलु ऐहिकसुखस्य-पारलौकिकसुखस्य च प्राप्तिर्भवति। परन्तु लौकिकधर्मो जन्ममृत्युपाशतः तथा मायातीतपरमात्मप्राप्तौ सहायको नास्ति। येषां तपयुते शुद्धान्तःकरणे धर्मरहस्यंप्रादुर्भूतम् तैः लौकिकधर्माणां विवेचनं कृतम्। मनुष्याणां कृते तस्मादयं श्रेष्ठधर्मः यतः भगवच्छ्रीकृष्णाचरणे भक्तिर्भवति। एतत् प्रसङ्गे श्रीमद्भागवते उक्तमपि—

'स वै पुंसां परो[५२] धर्मो यतो भक्तिरधोक्षजे'।

श्रीमद्भागवतस्य प्रसिद्धटीकाकारः श्रीधरस्वामी टीकाया-मुल्लिखितवान् यत् आचार्यविष्णुस्वामी ब्रह्म सूत्रस्य भाष्यं 'सर्वज्ञ[५३] सूक्तञ्च' रचयामास। महाराजपाण्डविजयः श्री विष्णुस्वामिनः पवित्राभियाने पूर्णतया सहयोगप्रदानं कृतवान् आचार्य विष्णुस्वामी विदुषान्मध्ये नक्षत्रेषु चन्द्रमाः इव प्रतीयते स्म। पाखण्डानां मतानां ह्रासार्थं तथा शुद्धाद्वैतमतस्य स्थापनार्थंमेव भगवान् श्री गोपालोपासनाप्रचारार्थञ्च महदभियानस्योद्देश्यमासीत्। पाण्ड्यचोल-केरल प्रभृतिस्थानातिरिक्तं कन्याकुमारीपर्यन्तं तथा गोकर्णपर्यन्तं अर्थात पश्चिमसमुद्रतटपर्यन्तं भ्रमणं कृत्वा आचार्यः अनेकस्थानेषु शास्त्रार्थञ्चकार।

प्रख्याततमा अनेके विद्वासः पराभूताः। पश्चादाचार्यतः [५४]दीक्षां गृहीतवन्तः[२]। गोकर्णस्थानतः महाराष्ट्राभिमुखे आचार्योजगाम। महाराष्ट्रदेशः स्वागतार्थं प्राक्कालतः एव प्रस्तुत आसीत्। अधुनापि आचार्यस्य भक्तिसम्प्रदायः तद्देशे वर्त्तते। सौराष्ट्रदेशं प्रभासक्षेत्रञ्चाटनं श्रीविष्णुस्वामीद्वारिकापुरीपर्यन्तं जगाम। पश्चाद् द्वारिकापुरीतः सिन्धुसौवीर-मरुधन्व (राजस्थान) पाञ्चाल प्रभृतिदेशं परिभ्रम्य काश्मीरं वव्राज तत् स्थानतः प्रत्यावर्त्तनकाले कुरुक्षेत्रं गच्छन् यदा हरिद्वारं जगाम तदा सर्वान् परित्यज्य बदरिकाश्रमं गतवान् आसीत्। तत्र मुनिभिः सह भगवतो व्यासस्य दर्शनं जातम्। तत्रैव च आचार्यत्रिपुरारेरूद्धवस्य च दर्शनं तथा भगवतो नरनारायणस्य साक्षात्कारः जातः। उत्तराखण्डतः हस्तिनापुरेश्रीवृन्दावनधामे च कियत्कालपर्यन्तं यापयामास। पश्चात् व्रजभूमितः ब्रह्मावर्तं नैमिषारण्यञ्चाटन् तीर्थराजप्रयागमागतवान्। तत्र सम्पूर्णतीर्थ-कृत्यानिकृत्वा चित्रकूटमटन् काशीं वव्राज। काश्यां भगवत् विश्वनाथस्य दर्शनं कृत्वा विद्वत्समाजे शुद्धाद्वैतवादस्य प्रतिपादनं कृतम्। काशीतः गयाक्षेत्रं गत्वा गङ्गासागरं बव्राज। तथा तत्रैव भगवतः कपिलस्य दर्शनं कृत्वा श्री जगन्नाथ[५६]धामं जगाम। यदा आचार्यः श्री जगन्नाथधामं जगाम तदा मन्दिरे केवलमेकमेव मुख्यद्वारमासीत् यमिदानीं जनाः 'सिंहद्वारं[५७]' कथ्यन्ते।

पुरीतः महेन्द्राचलं सप्तगोदावरीं पर्यन्तमटन् श्रीविष्णुस्वामी काञ्चीनगरीं गत्वा श्रीवरदराजभगवतोदर्शनं कृतवान्। एवंप्रकारेण सम्पूर्णभारतवर्षे भक्तेर्विजयपताकायाः स्थापना जाता। तथा श्री बालगोपालाराधना प्रतिगृहं प्रचारिता प्रसारिता च। विद्वांसः आचार्यस्य भाष्योपरि टीकां प्रस्थानचतुष्टयस्याध्यापनं कृतवन्तः।

दिग्विजयानन्तरमाचार्यविष्णुस्वामी मदुरां जगाम। तत्र महाराज दिग्विजयोपलक्ष्ये मदुरायां महासमारोहेण सह महोत्सवञ्चकार आचार्यो महाराजपाण्ड्यविजयं दीक्षा-शिक्षां च दत्तवान् महाराजपाण्ड्यविजयस्य मनसि मदुरायामेव प्रधानपीठस्य स्थापना भवतु इत्यभिलाषा आसीत्। परन्तु आचार्येण कथितं यत् पीठस्यकृतेकाञ्ची एव समीचीना।

स्वीयजन्मभूमौ अवस्थानं आचार्यस्यकृते मर्यादानुरूपं नास्ति। निःस्पृहस्वभावनित्यानासक्त श्री विष्णुस्वामिनः मनसि जागतिकवस्तूनां लालसा नासीत्। अतः विष्णुस्वामिनः जन्मभूमिः बन्धनहेतुः नास्ति। परन्तु आचार्यस्य कृते स्वीयानुगतानां आदर्शस्य ध्यानमावश्यकमासीत्। अनुगतजनाः आचार्यस्यानुकरणञ्चक्रुः। आचार्यो मदुरातः स्वीयाराध्य श्रीबालगोपालमूर्तिं गृहीत्वा काञ्चीं जगाम। काञ्च्यां श्री वरदराजमन्दिरसमीपमेव महाराजपाण्ड्यविजयआश्रमस्य निर्माणञ्चकार। तत्रैव श्रीबालगोपालस्य स्थापना जाता कतिपयानां प्राचीनानां विदुषां मतमस्ति यत् तस्मिन् कालतः काञ्च्याः श्रीवरदराजमन्दिरस्य सन्निकटे एकोभागः 'विष्णुकाञ्ची' शेषभागस्तु 'शिवकाञ्ची' इति।

वस्तुतः नगरमेकमेवतथापि तत्र शैववैष्णवयोः भेदभावो न परिलक्ष्यते। यतोहि शिवकाञ्च्यामेव अद्यापि भगवान् श्री वामनदेवस्य मन्दिरं परिदृश्यते। एवंप्रकारेण आचार्यनिजसम्प्रदायस्य प्रधानपीठस्य स्थापना विष्णुकाञ्च्यामेव चकार।

।। इतिशम् ।।

卐

(ङ) विष्णुस्वामिसम्प्रदायस्य मुख्य-पीठाचार्यपरम्परा

१. भगवान् श्रीकृष्ण एव आचार्यस्येष्टदेवः अस्ति। अतः परम्परायाः श्रीकृष्णः प्राथमिकाचार्यः।

परिचयस्तु द्वितीये परिच्छेदे उट्टङ्कितः।

२. भगवान् श्रीरूद्रदेवः परिचयस्तु द्वितीयपरिच्छेदे।

३. आचार्यत्रिपुरारिः परिचयस्तु द्वितीयपरिच्छेदे लिखितः।

४. **आद्याचार्याः**

श्रीरुद्रसम्प्रदायाचार्याः शुद्धाद्वैतप्रवर्त्तकाः अनन्तश्रीविभूषिताः श्रीविष्णुस्वामिनः।

५. श्रीदेवदर्शनाचार्यः।

६. श्रीपरमानन्दमुनिः।

७. श्रीआनन्दमुनिः।

८. श्रीप्रकाशमुनिः।

९. श्रीकृष्णमुनिः।

१०. श्रीनारायणमुनिः।

११. श्रीजयमुनिः।

१२. श्रीश्रीमुनिः।

१३. श्रीमहाचार्यः।

१४. श्रीनीताचार्यः।

१५. श्रीतत्त्वाचार्यः।

१६. श्रीनृसिंहाचार्यः।

१७. श्रीशुद्धाचार्यः।

१८. श्रीसुबुद्धाचार्यः।

१९. श्रीप्रबुद्धाचार्यः।

२०. श्रीरसूयाचार्यः।

२१. श्रीरूद्राचार्यः।

२२. श्रीभगवत्ताचार्यः।

२३. श्रीरामेश्वराचार्यः।

२४. श्रीब्रह्मपदचर्याचार्यः।

२५. श्रीसुदयाचार्यः।

२६. श्रीलक्ष्मी नारायणाचार्यः।

२७. श्रीराम विष्णुस्वामी।

२८. श्रीविल्व मङ्गलाचार्यः।

आदि वैष्णवाचार्य श्रीमद् विष्णुस्वामिनः परम्परायां प्राप्तेष्वाचार्येषु श्री विल्वमङ्गलाचार्योऽन्यतमः। श्रीविल्वमङ्गलाचार्यः श्रीवल्लभाचार्यस्यकृते दीक्षां दत्तवान्।

२९. श्रीमहाप्रभुबल्लभाचार्यः।

३०. श्रीविट्ठलदासः।

३१. श्रीयदुनाथः।

३२. श्रीमधुसूदनः।

३३. श्रीमुरलीधरः।

३४. श्रीब्रह्मराजः।

३५. श्रीपद्मराजः।

३६. श्रीप्रद्युम्नमुनिः।

३७. श्रीहृषीकेशः।

३८. श्रीवासुदेवः।

३९. श्रीपरमानन्दः।

४०. श्रीकल्याणदासः।

४१. श्रीप्रेम जीः।

४२. श्रीसाँवलदासः।

४३. श्रीरतनदासः।

४४. श्रीकिंशनदासः।

४५. श्रीराघौदासः।

४६. श्रीधनश्रीदासः।

४७. श्रीदयारामदासः।

४८. श्रीरामदासः।

४९. श्रीबलरामदासः।

५०. श्रीपरशुरामदासः।

५१. श्रीरणछोड़दासः।

५२. श्रीमोहनदासः।

५३. श्रीभोलादासः।


५४. श्रीदामोदरदासः।

५५. श्रीनरोत्तमदासः।

५६. वर्तमानः षष्ठपीठाधीश्वर महामण्डलेश्वरः श्री महन्तो जमुनादासजी महाराजः सतुआ बाबा इति।

।। इतिशम् ।।

卐


।। श्री रामकृष्णाभ्याम् नमः ।।

प्रमाण-पत्र

ज.गु. भक्तिमयी मीराबाई एवार्ड

अर्द्धकुम्भ प्रयाग-2007

अखिल भारतीय अखाड़ा परिषद् अध्यक्ष, अखिल भारतीय चार सम्प्रदाय, तीनों अनी अखाड़ा, डाकोर, खालसा, श्री महंत एवं सर्व खालसा श्री महन्तान आज दिनांक 24 जनवरी 2007 सांय श्री सतुआ बाबा सेवा शिविर में H.H. साध्वी श्री सर्वानन्दमयी लक्ष्मी देवी (साई माँ) को सर्वश्री महन्तान द्वारा ज.गु. मीराबाई एवार्ड एवं महामण्डलेश्वर से अलकृत किया।

अखाड़ा परिषद् अध्यक्ष	डाकोर खालसा	चार सम्प्रदाय
दिगम्बर अनी		1.
निर्वाणी अनी		2.
निर्मोही अनी		3.
		4.

श्रीमज्जगद्गुरु विष्णुस्वामिसम्प्रदायाचार्याणांसतुआबाबेत्युपाधि-विशिष्टानां यमुनाचार्य-महाराजानामाध्यात्मिकशिष्यायाः श्री सर्वानन्द-मय्याः मालक्ष्मीदेव्याः कृते प्रयागराजतीर्थे अर्धकुम्भस्य परमपुण्यकाले २२/१/२००७ ईस्वीयतमेवर्षे अलङ्करणसमारोहं विधाय अखाडापरिषदः अध्यक्षेण, अनी अखाड़ापरिषदः अध्यक्षेण डाकोर इन्दौर खालसा च सर्वसम्मत्या 'जगद्गुरुभक्तिमयीमीरावाई इत्युपाधिर्दत्तः।

१. सिद्धान्त मार्तण्डः पृ. १२७।
२. श्री विष्णुस्वामी और उनका सम्प्रदाय २३५।
३. विष्णुंस्वामी और उनका सम्प्रदाय २५६।
४. विष्णुस्वामी और उनका सम्प्रदाय २५७।
५. विष्णुस्वामी और उनका सम्प्रदाय ३४०।
६. विष्णुस्वामी और उनका सम्प्रदाय ३४७।
७. सम्प्रदाय प्रदीप लोक : (चतुर्थ) ७९।
८. सम्प्रदाय प्रदीप लोकः (चतुर्थ प्रकरणम्) ७४।
९. सम्प्रदाय प्रदीपलोकः (चतुर्थ प्रकरणम्) ७५।
१०. विष्णुस्वामी और उनका सम्प्रदाय ८०।
११. श्रीमद्भागवतम् १, अ.-५, श्लो. २।
१२. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ४३२।
१३. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ४३७।
१४. सन्त स्मृति ५३।
१५. सन्त स्मृति ५५।
१६. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९९।
१७. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. १०।
१८. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. १०।
१९. ब्रह्मवैवर्त्त पुराण श्रीकृष्ण जन्मखण्ड पृ.सं. ९।
२०. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. १०८।
२१. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. १०९।
२२. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ११०।
२३. डॉ. सुरेन्द्र नाथ दास गुप्त कृत भारतीय दर्शन का इतिहास चतुर्थ भाग पृ.सं. ३८२।

२४. भारतेन्दु समग्र—पृ.सं. ८६४-६५।

२५. विष्णु स्वामी और उनका सम्प्रदाय .. और शिक्षा पृ. ९२।

२६. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ८२।

२७. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ८३।

२८. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ५३।

२९. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ५४।

३०. श्रीमद्भागवत, स्कन्द ५, श्लोक १८।

३१. श्री वल्लभ दिग्विजय ५.१६.१७।

३२. गर्ग संहिता श्री विष्णु स्वामी और उनका सम्प्रदाय ७३।

३३. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ६७।

३४: विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ६९।

३५. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ६९।

३६. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ६९।

३७. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. २९।

३८. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७१।

३९. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७१।

४०. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७१।

४१. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७१।

४२. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७४।

४३. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७४।

४४. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७४।

४५. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७५।

४६. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७८।

४७. अष्टादशाक्षरोऽयं दरि......, ... गोलोके—श्री वल्लभ दिग्विजय ७९।

४८. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ७९।

४९. श्री विष्णु स्वामी उनका सम्प्रदाय पृ.सं. ८४। (पद्मपुराण उत्तराखण्ड)

५०. नारद पाञ्चरात्र श्री विष्णु स्वामी उनका सम्प्रदाय पृ.सं. ८४।

५१. श्रीमद्भागवत गीता १.२२।

५२. श्रीमद्भागवत् स्क. १., अ. २, श्लो. ६।

५३. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९७।

५४. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९८।

५५. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९९।

५६. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९९।

५७. विष्णु स्वामी और उनका सम्प्रदाय पृ.सं. ९९।

।। इतिशम् ।।

卐

:

वैष्णववैभवकाव्यकर्तुः परिचयः

(क) म.म. श्रीमनुदेवभट्टाचार्यस्य संक्षिप्तः परिचयः

भारतवर्षे ब्राह्मणानां दश भेदाः प्रसिद्धाः, तत्र पञ्च गौडाः, पञ्च द्रविडा इति भेदेन ब्राह्मणानां दश भेदाः सन्ति।

तत्रायं विवेकः—ये खलु विन्ध्याद् उत्तरवासिनः अर्थात् उत्तराखण्डनिवासिनः, ते पञ्च गौडा इति कथ्यन्ते।

सारस्वताः कान्यकुब्जाः गौडा मैथिला उत्कलाः।
पञ्च गौडा इति ख्याताः विन्ध्यस्योत्तवासिनः।।

एवमेव ये विन्ध्यदक्षिणवासिनः ते पञ्च द्रविडाः कथ्यन्ते। अयं च विभागः तत्तद्देशत्वेन, वस्तुतः ब्राह्मणत्वं सामान्येन सर्वेषामेकमेव, अत एव एतेषां परस्परं विवाहादौ शास्त्रीयनिषेधो नास्ति। तत्र मनुदेवभट्टाचार्याः पञ्चगौडान्तर्गतगौडब्राह्मणाः साम्प्रतम्,

परन्तु एतत्पूर्वजाः पञ्चद्राविडान्तर्गता आसन् इति विश्वकोषादौ स्पष्टम्—

कर्नाटकराज्यान्तर्गतं काञ्चीक्षेत्रम् आसीत्, यत्र कर्नाटकदेशस्य कश्चिद् राजा जगद्गुरुभट्टनामकः स्वराजधान्यां काञ्च्याम् उवास, यस्य सर्वज्ञभट्ट इति अपरं नाम आसीत्, इदानीमपि कर्नाटकब्राह्मणानां **भट्ट** इति पदवी विद्यते।

अयं जगद्गुरुभट्टः दक्षिणदेशे कृष्णयजुर्वेदीयतैत्तरीयशाखीय आपस्तम्वसूत्रीयब्राह्मणो राजा आसीत्। एष खलु मनुदेवभट्टाचार्यस्य पूर्वजः, अस्माद् जगद्गुरोः पश्चाद् मनुदेव एकविंशः पुरुषः, तस्य पुत्रः **अनिरुद्धभट्ट**नामकस्तस्य द्वौ पुत्रौ **रूपेश्वरभट्टो हरिहरभट्टश्च**।

पिता जगद्गुरुभट्टो देहत्यागात् पूर्वमेव स्वराज्यमर्द्धम्-अर्द्धम् विभज्य द्वाभ्यां पुत्राभ्यां प्रददौ, परन्तु पितुः जगद्गुरुभट्टस्य मरणात् परं **हरिहरभट्टो रूपेश्वरं** विजित्य राज्याद् निष्कासयाञ्चक्रे, स च ततः परमितस्ततो भ्रामं भ्रामं तत्र तत्र वासं कल्पयित्वा बहून् देशान् अतिक्रम्य शिखरदेशम् आजगाम।

रूपेश्वरस्य पुत्रः **पद्मनाभः**, तस्य पञ्च पुत्राः—१. **पुरुषोत्तमः**, २. **जगन्नाथः**, ३. **नारायणः**, ४. **मुरारिः**, ५. **मुकुन्द** इति नामान आसन्, तेषु प्रथमस्य पुरुषोत्तमस्य सप्त पुत्राः, अन्तिमस्य पञ्चमस्य मुकुन्दस्य कुमार इति पुत्रः; यन्नाम्ना **कुमारहट्ट** इति किमपि स्थानं बङ्गप्रदेशेषु श्रूयते क्वचित्।

पद्मनाभस्तु यदा कर्नाटकराज्यं परित्यज्य बहिर्गतः, तदानीं नवहाटीस्थानं जगाम। नवहाटी तु **नवहट्ट** इति, तत्तु साम्प्रतं नौहाटी प्रसिद्धं स्थानम्। एतस्य पञ्च पुत्राः इति, अष्टादश कन्यकाश्च जाताः, तेषु अन्तिमः **मुकुन्ददेवः**, अयं च परमभागवतः, प्रायो वाणिज्यवृत्तिनैव यशोहरजनपदे (सम्प्रति जिला जैशोर) फतेहाबादनगरं प्रति गमनागमनेन वाणिज्यमकरोत्।

अतः परं किमपि सामाजिकविरोधप्रसङ्गेन मुकुन्ददेवः खलु फतेहाबाद एव उवास।

तत्र च आगत्य पूर्ववास्तव्यस्य पं. श्रीहरिनारायणप्रसादस्य पुत्रीम् रेवतीं परिणिनाय।

रेवतीमुकुन्ददेवयोः पञ्च पुत्राः बभूवुः-ते **च-हंसभट्टः**, **नारायणभट्टः**, **अमरभट्टः**, **सन्तोषभट्टः**, **अनुपमभट्ट** इति नामानः, इमे च पञ्चापि मुकुन्ददेवभट्टसुताः नवहट्ट (नौहाटि) वास्तव्य पं. श्रीसर्वानन्दसिद्धान्तवाचस्पतिमहोदयाद् शास्त्राणि अधिजग्मुः।

तदानीं पारस्यभाषा (फारसी) राजकीयभाषा आसीत्, तामपि ते ज्ञातवन्तः, तेषु **नारायणभट्टस्य** पुत्रः कविडिण्डिमः।

तस्य पुत्रः **अच्युतः**, तस्य चत्वारः पुत्राः—१. **जनमेजयः**, २. **गोपालः**, ३. **हृदयः**, ४. **मनोहरः**, ततः मनोहरस्य द्वौ पुत्रौ

गोविन्दकाशीरामौ। गोविन्दस्य त्रयः पुत्राः—१. **महेशभट्टः**, २. **चन्द्रशेखरभट्टः**, ३. **श्यामभट्ट** इति नामानः, अयं महेशभट्टः शिविकास्थपत्न्या सहितः कर्कमारुह्य तीर्थयात्रां प्रतस्थे, तत्र बङ्गदेशान्तर्गतमल्लभूमिक्षेत्रे विष्णुपुरराज्यं प्रविवेश, तत्र राजा सादरमाहूय स्वराज्ये निवासार्थं प्रार्थितः महेशभट्टः 'साम्प्रतमहं तीर्थयात्रायै गन्तुमिच्छामि, ततो निवृत्य वस्तास्मि' इति प्रजगाद, तदनुसारं निवृत्ततीर्थदर्शनः विष्णुपुरनरेशेन स्वराज्यवासाय प्रार्थितः, **'नाहं नगरे वत्स्यामि'** इत्युक्ते तद्- वासाय किमपि तपोवनस्थानमर्पयामास। तदर्थं च तस्य राज्ञः द्वादशसहस्रसैनिक-शिविरसंनिवेशोचितं शालीनद्याः समीपं बाणकुण्डनामकस्थानं निर्णीय, तद्ग्रामो महेशभट्ट- नामानुसारेण **भट्टपाड़ा** इति नाम्ना प्रसिद्धः, द्वादशसहस्रसैनिकसंनिवेशस्थानत्वेन **बारोहजारी**; सैनिकानाम् प्रायः अभ्यासोपयोगित्वेन **रणाढ्य** इति साम्प्रतं **रनियाडा**, पञ्चकुण्डत्वेन बाणकुण्डत्वात् **बाकुड़ा** जनपदः इत्यादि सम्प्रति प्रसिद्धम्, किञ्च पञ्चानां कुण्डानां कतमस्य जलस्वच्छतमम् इति जिज्ञासायां तेषां जलानि तोलयामास, तदा यस्य जलं सर्वथा अल्पभारं तस्य चाकचिक्यत्वेन अद्यापि **चकचकी** इति प्रसिद्धम्, सरश्च च पद्मसर आसीत्।

तदुपकण्ठं तस्य वासः कल्पितः। महेशभट्टस्तु सिद्धान्तवागीशपदविभूषितः, विष्णुपुरराज-सभाप्रधानपदव्या विभूषित आसीत्, परन्तु सति प्रयोजने राज्ञा प्रार्थितः यथावसरं राज्यसभां गच्छति स्म, नियतवासस्तु भट्टपाड़ाग्राम एव। अस्य चत्वारः पुत्राः—१. **धर्मदास**, २. **मधुसूदन**, ३. **जगन्नाथ**, ४. **हरिः** इति नामानः। आद्यस्य धर्मदासस्य त्रयः पुत्राः—१. शङ्कररामः, २. **शिवचरणः**, ३. श्रीचरणः इति सञ्ज्ञकाः। शिवचरणस्य त्रयः पुत्राः—१. प्राणवल्लभ, २. **सुखदेवः**, ३. मुरलीधरश्च, तत्र सुखदेवस्य—१. **हरानन्दः**, २. गोपालः ३. रघुः, ४. रामेश्वरः, ५. शत्रुघ्नः इति पञ्च पुत्राः। ज्येष्ठस्य हरानन्दस्य—१. राममोहनः, २. रामचन्द्रः, ३. **रामकृष्णविद्यालङ्कारः**, अयं ग्रन्थकर्त्तुः वृद्धप्रपितामहः, एतस्य पञ्च

पुत्राः—१. हलधरः, २. रामः, ३. गणेशः, ४. मधुसूदनः, ५. **रामपरायणविद्यालङ्कारः,** रामपरायणविद्यालङ्कारो ग्रन्थकर्तुः प्रपितामहो यत्पुत्राः—१. **राजारामः,** २. सुधारामः, ३. महेशश्च; सर्वेषु ज्येष्ठः **राजारामः, वैयाकरणकेशरी पण्डितशिरोमणिः शास्त्रमहारथ** इत्याद्यनेकपदवींविभूषितः। अयमपि विष्णुपुरमहाराजस्य सभाध्यक्ष आसीत्।

महाकविः **श्रीराजारामभट्टाचार्यः,** अयं ग्रन्थकर्त्तुः पितामहः, पितामही च परित्रायिणी देवी, अस्य द्वौ पुत्रौ **महाकवी रामपदभट्टाचार्यः, धराप्रदाननामकहरिश्चन्द्रोपाख्यानात्मक- विंशति-सर्गात्मकमहाकाव्यकर्ता बहुकाव्यनाटकादिप्रणेता।** काव्यव्याकरणतीर्थः एम.ए. **ज्येष्ठतातः, ज्येष्ठमाता सुवर्णबाला देवीति। ग्रन्थकर्तुः पिता साहित्यसागरो महाभारतीयव्यासकूटाविष्कर्ता पशुपतिभट्टाचार्यः, माता च वीणापाणिदेवी,** यस्य त्रयः पुत्राः ज्येष्ठो **रामशङ्करः, काशीनरेशसभापण्डितः** साम्प्रतं दिवंगतः, मध्यमो **गौरीशङ्करो भट्टाचार्यः पुराणेतिहासाचार्यः, कनिष्ठ एतस्य महाकाव्यस्य रचियता मनुदेवभट्टाचार्यः** एभिः**महामहोपाध्यायैर्महाकविभिरनेककाव्यनाटकानां** रचना कृता तथा पत्रिकादीनां सम्पादनञ्च कृतम्।

एतैर्महाकविभिरनेकसभासु सभापतिपदमलङ्कृतम्, तथानेकस्यां समितौ अध्यक्षपदञ्चालङ्कृतम्। **एते महामहोपाध्यायसम्मानेन** च विभूषिताः सन्ति।

माता वीणापाणिदेवी पिता च साहित्यसागरः महाभारतीय-व्यासकूटानाम् आविष्कर्ता **श्रीपशुपतिभट्टाचार्यः।**

एतेषां पूर्वजाः भागवतकाव्यव्याकरणकर्मकाण्डेषु आनुवांशिक-पद्धत्या निष्णाता आसन्। अस्य महांकवेः मातामहस्य श्रीरामसत्य-भट्टाचार्यस्य साहित्यदर्पणानुवादः साम्प्रतं लभ्यते। महाराजादिभि-रायोजितायां शास्त्रगोष्ठ्यां शास्त्रार्थे च अस्य पूर्वजस्य श्रीराजाराम-भट्टाचार्यस्य विजयपताका दोधूयते स्म।

ग्रन्थकारस्य ज्येष्ठपितृचरणैः वैराग्यसत्त्वाद् स्वपितुः मरणोत्तरं विष्णुपुरनरेशेन ससम्मानमामन्त्रितोऽपि राजसभाध्यक्षपदं नाङ्गीकृतम्।

तदन्तरं ग्रन्थकारस्य पिता पशुपतिभट्टाचार्यो राज्ञा प्रार्थितः, परन्तु नाहं पितृस्थानमभिलषामि इत्युक्त्वा लक्ष्मणपुरं प्रस्थितवान्; तत्र सुन्दरबागस्थाने बी.ए.बी इण्टरकालेजे संस्कृतमाध्यापितवान्। ग्रन्थकारो मनुदेवभट्टाचार्योऽपि पूर्वं लक्ष्मणपुर एव पितृचरणेभ्यः अष्टाध्यायीम्, अमरकोशं चाध्यैष्ट, ततः गणेशगंजस्थितधर्मसंघ-महाविद्यालयाध्यापकस्य बस्तीजनपदान्तर्गतमहोईग्रामीणपंक्तिपावन-वंश्यवत्सगोत्रीय-माध्यन्दिन-शाखीय—श्रीधरमिश्रमहोदयस्य समीपे उत्तरमध्यमां यावदध्यैष्ट, ततः काशीमागत्य मन्त्राचार्याग्निष्वात्त-भट्टाचार्यतः स्वीयाम् तैत्तरीयशाखाम् **अथ च वैदिकरत्नमालामणि-पं. गोपालचन्द्रमिश्रमहोदयाज्ञया दुण्ढिराजगलीस्थसिद्धपीठसंन्यासी-संस्कृतकालेजे मणिराम-काशीरामओढेकरमहोदयात् अनेकसतीर्थैः साकं माध्यन्दिनशाखामप्यधीतवान्,** ततः काश्यां काशीराजस्थापित-सर्वभारतीयपुराणन्यासकार्यालयान्यतमसदस्यानाम् ज्येष्ठभ्रातृणां व्या-करणा-चार्य-पं.-रामशङ्करभट्टाचार्याणां गृहे स्थित्वा ललिताघट्टस्थ-गोयनकासंस्कृत- महाविद्यालयतः शास्त्रिपरीक्षां षट्षष्ट्यधिकस्त्रीष्टवर्षे उत्तीर्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये व्याकरणाचार्यमधीत्य ऊनसप्तत्यधिकस्त्रीष्टवर्षे व्याकरणाचार्यपरीक्षामुत्तीर्णवान्।

आचार्य म.म. गोपीनाथकविराजस्य सत्सङ्गतिप्राप्तिः।

यदा मनुदेवभट्टाचार्यः ललिताघट्टस्थगोयनकासंस्कृतमहाविद्यालये शास्त्रिद्वितीयवर्षस्य छात्र आसीत्, तदानीं अस्य जीवने या काचित घटना घटिता सा खलु भट्टाचार्यस्य चिरस्मरणीया अस्ति—

इति स एव असकृत् कथयति। **इत्थं खलु वृत्तम्**—यदा द्वाषष्ट्यधिके एकोनविंशति-शततम (१९६२) ख्रीष्टवर्षे चीनेन भारतमाक्रान्तं तदा किमपि अलौकिकं कारणमासीत्। तदनन्तरम् उत्तरप्रदेशदेशस्य तात्कालिकैः **महामहिमराज्यपालैः मान्यश्रीविश्व-नाथदासमहोदयैः** तान्त्रिकप्रयोगाणां अध्ययनम्-अध्यापनं विधेयम् इति

निश्चित्य, तदर्थञ्च-सम्पूर्णानन्दसंस्कृतविश्वविद्यालये व्यवस्था विधेया इति विमृश्य, महामहोपाध्याय-पूज्यपादश्रीगोपीनाथकविराज-महोदयानाम् सिगरा(श्रीगिरि)स्थितगृहं गत्वा, साञ्जलि प्रार्थितास्तैरेसकृत् अस्वीकारे कृते, भवतां गृहे सर्वं व्यवस्थापयिष्यामि इति भृशं सम्प्रार्थ्य, तदनुज्ञां प्राप्य, तद्गृहस्य द्वितीयतले योगतन्त्रविभागस्य स्थापना कृता, तत्र महामहिमराज्यपालैः प्रार्थिताः कविराजमहोदयाः तन्त्रागमग्रन्थानां प्रतिलिप्यर्थम्—

व्याकरणशास्त्री बङ्गलिपिज्ञोऽन्वेषणीय इति राज्यपालम् आदिदिशुः। ततो महामहिमकुलाधिपतिश्रीराज्यपालेनमहोदयेन तेन आज्ञप्तः कुलपतिः श्रीसुरतिनारायण-मणित्रिपाठी तात्कालिकग्रन्थाध्यक्षं प्राच्यपाश्चात्त्यवाङ्मयनदीष्णं न्यायाचार्यविभूतिभूषण-भट्टाचार्यं प्रेरितवान्, स च रमापदचक्रवर्तिनामकं साहित्यच्छात्रं ग्रन्थकारस्य ज्येष्ठभ्रातुः रामशङ्करभट्टाचार्यस्य सविधे प्रेषितवान्। विभूतिभूषण-भट्टाचार्यस्तु 'बङ्गलिपिज्ञः व्याकरणशास्त्रछात्रः मनुदेवभट्टाचार्योऽस्ति' इति निश्चित्य कविराजमहोदयानां सविधे मनुदेवस्य प्रेषणाय रामशङ्करं निर्दिदेश।

ततः आदौ तु रमापदचक्रवर्तिना सहैव मनुदेवः कविराजमहोदयानां गृहं जगाम।

तत्र वर्षं यावत् बङ्गलिपिलिखितानां तन्त्रागमग्रन्थानां देवनागरलिप्यन्तरं कृतवान्, ततः अग्रिमे वर्षे इत्थं जातः यत् कविराजश्रीचरणानां सविधे महान् ग्रन्थसंग्रह आसीत्। वार्धके आयाते कस्मैचित् पुस्तकालयाय इमे ग्रन्थाः निर्मूल्यं प्रदेयाः इति तैर्मनसि निश्चितम्, एतत् ज्ञात्वा अनेकविश्वविद्यालयादिसंस्थानाधिकारिणः कुलपतिप्रभृतयः तल्लाभाय श्रीचरणान् प्रार्थितवन्तः।

परन्तु धनाढ्यसंस्थास्तु ग्रन्थक्रयणाय समर्था इति मनसि प्रकामं निश्चित्य गोयनकासंस्कृतमहाविद्यालयीयविश्वनाथपुस्तकालयाय सर्वग्रन्थप्रदानायोद्यता अभूवन्।

तदर्थं तत्पुस्तकालयाध्यक्षेण श्रीपन्तमहोदयेन आदिष्टा तद्व्याजेनैव श्रीचरणानां श्रीचरण- संनिधिं ग्रन्थकारः पुनः प्राप्तवान्,

तदन्तरं साधनारहस्यजालं एतस्मै उपदिश्य गुरोः जीवनवृत्तात्मकं महाकाव्यरचनाय महाकविमादिष्टवान्, तदाज्ञामनुसृत्य **विशुद्धवैभव-नामकं द्वादशसर्गात्मकमनेनारचि**, यच्च एकाधिकद्विसहस्त्रतमखिष्टवर्षे विश्वविद्यालयेन प्रकाशितमथ च उत्तरप्रदेशशासनेन पुरस्कृतं राजस्थानशासनेन च अखिलभारतीयकाव्यपुरस्कारनामकेन प्रथम-पुरस्कारेण सम्मानितम्।

ततः परं षष्ठपीठाधीश्वर-सतुआबाबा-यमुनाचार्यमहोदयैर्महा-काव्यरचनाय मनुदेवभट्टाचार्य आदिष्टः, तदनुसारमल्पीयसा कालेन नवसर्गात्मकं महाकाव्यमपि प्रणीय उपस्थापितवान्।

इतः पूर्व कविराजमहोदयानां सविधे मनुदेवभट्टाचार्येण एकदा **प्राचीनभारतीयविमान**विषयिका जिज्ञासा उपस्थिता, श्रीकविराज-महोदयैस्तद्विषयकं जिज्ञासा- जातं ज्ञात्वा तद्विषयकाः ग्रन्था निर्दिष्टाः, ततः परं श्रीभट्टाचार्याः पण्डितराजश्रीराजेश्वरशास्त्रि-द्राविडश्रीचरणसन्निधावपि उपस्थाय प्राचीनभारतीयविमानविषयकान् ग्रन्थान् उपलब्धवान्। अस्मिन् काले एव अमेरिकादेशे-**नासा-केन्द्रीयवैज्ञानिकैः चन्द्रगमनम् साधितम्**, ततो निवृत्य **नील-अमर्स्टांगप्रभृतीनां** विश्वस्मिन् महान् आदरो जातः, तत्प्रसङ्गे अमेरिकादेशीयेन नासाकेन्द्रीयवैज्ञानिकेन **ब्लूमफील्ड आईरिश** नामकेन विदुषां इदं कथितं यत् **प्राचीनभारतीयमन्तरिक्षविज्ञानमतीव विशालम् उन्नतं चासीत्।**

ततः विशेषजिज्ञासायाम् तद्देशीयवैज्ञानिकैः असकृत् पृष्टः प्रेरितः च श्रीब्लूमफील्ड आईरिश—महोदयः भारते स्वमित्रं कोलकाता-निवासिनं अजीतदत्तमहोदयं प्राचीनभारतीयविमानविषयकं विशेषज्ञा-नार्थम् पत्रं प्रहितवान्।

ततः प्राप्तपत्रोपि श्रीब्लूमफील्डमहोदयः नासावैज्ञानिकः असन्तुष्टहृदयः पुनः पत्रं ददौ, अजितदत्तस्तु कोलकतायां भ्रामं भ्रामं अनवाप्तविमानशास्त्रः काले गते बहुतिथे तत्र गवर्मेण्टसंस्कृत-कालेजप्रिंसिपलमहोदयं श्रीकाञ्चीलालनामानम् एतद्विषयं पृष्टवान्, स तु नात्र कश्चित् इदमुपदेष्टुमलं काश्यां श्रीगोपीनाथकविराजमहोदयः

एतद्विषयं प्रष्टव्यः इत्युक्तवान्; स च पत्रं कविराजमहोदयं प्रेषितवान्, तच्च पत्रं कविराजमहोदयेन नितान्तकृपाभाजनाय **श्रीहेमेन्द्रनाथ-चक्रवर्तिने** सकलतन्त्रागमदर्शनवाचस्पतये आजीवनं श्रीकविराज-महोदयश्रीचरणसंनिधिभाजे दत्तम्, तदधिगम्य तदाज्ञया तदुत्तरस्य प्रस्तुतये मह्यं दत्तवान्; मया तदुत्तरादिकं प्रेषितम्। मनुदेवभट्टाचार्यस्य विमानविषयकशोधप्रसङ्गे अन्येपि मार्गदर्शका अभूवन्, यथा रामजी उपाध्यायः, तात्कालिकसंस्कृतविभागाध्यक्षः सागरविश्वविद्यालये साम्प्रतं सेवानिवृत्तः, सुबोधचद्रपन्तः झाँसीश्वरीचरितमहाकाव्यप्रणेता चतुरङ्गनिष्णातः गणितप्रवीणः तात्कालिक एन.सी.सी. अधिकारी लेफ्टिनेंट कम्पनी कमाण्डर २८/ए सं.सं.वि.वि.। बी. जोशी, गोपालगजाननजोशीप्रभृतयः तत्र सुबोधचन्द्रपन्तमहोदयैः पञ्चनवत्यधि-काष्टादशसहस्त्रख्रिष्ट-वर्षे मुम्बय्यां चौपाट्यां शिवकर-बापूजी-तल्पदेकर्तृकविमानाविष्कारघटना प्रस्तुता।

अनुसन्धाने च विघ्नः–

एतत्सर्वमपि **शोधजातं** मनुदेवभट्टाचार्येण सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये तात्कालिकप्राचीनदर्शनविभागे एकाकिनैव व्यधायि, परं हां हन्त नियुक्तिः स्थायिनी नासीत्;

इति कृत्वा अग्रे नाचलत्। वर्षद्वयं यावत् अनुसन्धाय अग्रे तन्निरोधो जातः, मध्ये तावद् मनुदेवभट्टाचार्यः स्याद्वादसंस्कृत-महाविद्यालये विश्वनाथपुस्तकालये च कञ्चित् कालं सेवां विधाय, तदनन्तरं यूरोपयात्रां कृतवान्, तदानीं लक्सम्वर्ग-वेल्जियम-जर्मन-फ्रांस- स्विटरजलैण्ड-इंग्लैण्ड-स्काटलैण्ड-नेपालदेशान् भ्रामं भ्रामं वर्षाभ्यन्तरे भारतं प्रतिनिवृतः। ततः परमं सार्धैकवर्षं यावत् निर्वृत्तिकः निर्विण्ण इतस्ततः स्थायं स्थायं ततः गोयनका संस्कृतमहाविद्यालये षट् वर्षाणि यावत् व्याकरणमध्याप्य, मध्यमव्यायोगनामकरूपकदि अभिनिनाय; संस्कृतविश्वविद्यालये नव्यव्याकरणप्राध्यापकपदे नियुक्तः सम्प्रत्यपि तत्रैव अध्यापयति।

।। इति शम् ।।

卐

ख. निष्कर्षः

अनादिकालतआधि दैविकाधिभौतिकाध्यात्मिकदुःखैर्दुःखितानां महासंसारसागरे पतितानां जीवानां मोहादात्मानो हितकारकोपदेशविष इव त्यागे तत्पराणां जनानां कल्याणार्थं प्रेयः श्रेयश्च प्राप्त्यर्थमहैतुककृपा पारावारीणाः दयालवो मुनयबर्हिर्विषयासक्तानां जीवानां परमपुरुषार्थे प्रवेशार्थं महिर्षिभिर्नानाप्रस्थानभेदाः प्रदर्शिताः।

किन्तु भगवद्विमुखान् विहाय सर्वेषां सम्प्रदायानां साक्षात्परम्परया परमतत्वे एव तात्पर्यम् तदुक्तं यक्षराजेन पुष्पदन्तेन—

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रूचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।

इदं तात्पर्यं हे अमरवर नाना संकीर्णाः पन्थानः ऋजवश्च कुटिलाश्च ऋजुकुटिलाः ऋजुकुटिलाश्च ते नानापथाश्चेति ऋजुकुटिलनानापथास्ताञ्जुषन्ते भजन्तीति तथा तेषां नृणामधिकार्यनधिकारिसाधारणानां तत्तत्साधनानुष्ठानैः साक्षात्परम्परया वा त्वमेवैको गम्यःप्राप्यः नत्वन्यः कश्चिदित्यर्थः। अत्र दृष्टान्तमाहपयसामर्णवइव। यथा ऋजुपथजुषां यमुनासरय्वादीनां गङ्गादिप्रवेशद्वारा परम्परया, एवं वेदान्तवाक्यश्रवणमननादिनिष्ठानां साक्षात्त्वं प्राप्यः अन्येषां त्वन्तःकरणशुद्धितारम्येन परम्परया त्वमेव प्राप्यः। चेतनत्वेनैव मोक्षयोग्यत्वात्परमात्माभ्युपगमाच्चेत्यर्थः। ननु ऋजुमार्गे सति तं विहाय किमिति कुटिलमार्गे भजन्ते ऋजुमार्गस्यैव शीघ्रफलदायित्वादित्यतआह। प्रभिन्ने स्थाने इदं परं पथ्यं अदः परं पथ्यमिति च रूचीनां वैचित्र्यात्तत्तस्मिञ्शास्त्रप्रस्थाने इदमेव श्रेष्ठमिदमेव मम हितमितीच्छाविशेषाणामनेकप्रकारत्वात् प्राग्भवीयतत्तत्कर्मवासनावशेन ऋजुत्वकुटलित्वनिश्चया-सामर्थ्यात्कुटिलेऽपि ऋजुभ्रान्त्या प्रवर्तन्त इत्यर्थः।

प्रस्थानभेदान् दर्शयामि। तथाहि त्रयीशब्देन वेदत्रयवाचिना तदुपलक्षिता अष्टादश विद्या अप्यत्र विवक्षिताः। तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः। शिक्षा कल्पो व्याकरणं निरूक्तं छन्दो ज्योतिषमिति वेदाङ्गानि षट्। पुराणानि न्यायो मीमांसा धर्मशास्त्राणि चेति चत्वार्युपाङ्गानि। अत्रोपपुराणानामपि पुराणेष्वन्त-र्भावः। वैशेषिकशास्त्रस्य न्याये, वेदान्तशास्त्रस्य मीमांसायाम् महाभारतरामायणयोः सांख्यपातञ्जलपाशुपतवैष्णवादीनां च धर्म-शास्त्रेष्विति मिलित्वा चतुर्दश विद्या। तथा चोक्तम् **'पुराणन्याय मीमांसाधर्मशास्त्राङ्ग मिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश इति।** एता एव चतुर्भिरूपवेदैः सहिता अष्टादश विद्या भवन्ति। आयुर्वेदो, धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं चेति चत्वार उपवेदाः। ता एता अष्टादश विद्यास्त्रयी सांख्यमित्यनेनोपन्यस्ताः। अन्यथा न्यूनता प्रसङ्गात्। सर्वेषां चास्तिकानामेतावन्त्येव शास्त्रप्रस्थानानि। अन्येषामप्येकदेशिनामेष्वेवान्तर्भावात्। ननु नास्ति-कानामपि प्रस्थानान्तराणि सन्ति तेषा मेतेष्वनन्तर्भावात्पृथग्गण-यितुमुचितानि। तथाहि शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्। क्षणिकविज्ञानमात्रवादेनापरं योगाचाराणम्। ज्ञानाकारानुमेयक्षणिक-वाह्यार्थवादेनापरं सौत्रान्तिकानाम्। प्रत्यक्षत्वलक्षणक्षणिकवाह्यार्थ-वादेनापरं वैभषिकाणाम्। एवं सौगतानां प्रस्थानचतुष्टयम्। तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणाम्। एवं देहातिरिक्तदेहपरिणा-मात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम्। एवं मिलित्वा नास्तिकानां षट् प्रस्थानानि तानि कस्मान्नोच्यन्ते। सत्यम् वेदवाह्यत्वात् तेषां म्लेच्छादि प्रस्थानवत्परम्परयापि पुरुषार्थानुपयोगित्वादुपेक्षणीयत्वमेव। इह च साक्षाद्वा परम्परया वा पुमर्थोपयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितोऽतो न न्यूनत्वशङ्कावकाशः। अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेद हेतुः प्रयोजनभेद उच्यते। तत्र धर्मब्रह्म प्रतिपादकमपौरुषेयं प्रमाणवाक्यं वेदः। स च मन्त्र ब्राह्मणात्मकः। तत्र मन्त्रा अनुष्ठानकारणभूतद्रव्यदेवताप्रकाशकाः। तेऽपि त्रिविधाः ऋग्यजुःसामभेदात्। तत्र पादबद्धगायत्र्यादिच्छन्दोविशिष्टा ऋचः

'अग्निमीले पुरोहितम्' इत्याद्याः। ता एव गीतिविशिष्टाः सामानि। तदुभयविलक्षणानि यजूंषि। अग्नीदग्नीन्विहर इत्यादि सम्बोधनरूपा निगद संज्ञा मन्त्रा अपि यजुरन्तर्भूता एव। तदेवं निरूपिता मन्त्राः ब्राह्मणमपि त्रिविधम्। विधिरूपम्, अर्थवादरूपम्, तदुभयविलक्षणं च। तत्र शब्दभावना विधिरिति माट्टाः। नियोगो विधिरिति प्राभाकराः। इष्टसाधनता विधिरिति तार्किकादयः। सर्वो विधिरपि चतुर्विधः। उत्पत्त्यधिकारविनियोगप्रयोगभेदात्। तत्र कर्मस्वरूपमात्रबोधकोविधि-रूत्पत्तिर्विधिः 'आग्नेयोऽष्टाकपालो भवति इत्यादिः। सेतिकर्तव्यताकस्य करणस्य यागादेः फलसम्बन्धबोधको विधिरधिकारविधिः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत्' इत्यादिः। अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः 'व्रीहिभिर्यजेत्' समिधो यजति इत्यादिः। साङ्गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वविधित्रयमेलनरूपः प्रयोगविधिः। सच श्रौत इत्येके। काल्प इत्यपरे। कर्मस्वरूपं च द्विविधम्। गुणकर्म अर्थकर्म च। तत्र क्रतुकारकाण्याश्रित्य विहितं गुणकर्म। तदपि चतुर्विधम्। उत्पत्याप्तिविकृतिसंस्कृतिभेदात्। तत्र 'वसन्ते' ब्राह्मणोऽग्नीनादधीत 'यूपं तक्षति' इत्यादावाधानलक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः। 'स्वाध्यायोऽध्येतव्यः' गां पयो दोग्धि इत्यादावध्ययनदोहनादिना विद्यमानस्यैव स्वाध्याययादयः प्रभृतेः प्राप्तिः 'सोममभिषुणोति' व्रीहीनवहन्ति 'आज्यं विलापयति' इत्यादावभिषवावधातविलापनैः सोमादीनां विकारः। 'व्रीहीन्प्रोक्षति' 'पत्न्यवेक्षते' इत्यादौ प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कारः। एतच्चतुष्टयं चाङ्गमेव। तथा क्रतुकारकाव्यनाश्रित्य विहितमर्थकर्म। तच्च द्विविधम् 'अङ्गं प्रधानं च'। अन्यार्थमङ्गम्। अनन्यार्थं प्रधानम अङ्गमपि द्विविधं संनिपत्योपकारकमारादुपकारकं च। तत्र प्रधानस्वरूपनिर्वाहकं प्रथमं यथाऽवहनन प्रोक्षणादिफलोपकारि। द्वितीयं यथा प्रयाजादि। एवं सम्पूर्णाङ्गसंयुक्तो विधिः प्रकृतिः। विकलाङ्गसंयुक्तो विधिर्विकृतिः। तदुभयविलक्षणो विधिर्दर्बीहोमः। एवमन्यदप्यूह्यः। तदेवं निरूपितो विधिभागः।

प्राशस्त्यनिन्दान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः। सचत्रिविधः। गुणावादोऽनुवादो भूतार्थवादश्चेति। तत्र प्रमाणान्तराव-

रुद्धार्थबोधको गुणवादः 'आदित्यो यूपः' इत्यादिः। प्रमाणान्तर-प्राप्तार्थबोधकोऽनुवादः 'अग्निर्हिमस्यभेषजम्' इत्यादिः। प्रमाणान्तर-विरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः 'इन्द्रोवृत्राय' वज्रमुद्यच्छत् इत्यादिः। तत्र त्रिविधानामप्यर्थवादानां विधिस्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वतः प्रामाण्यम्। देवताधिकरणन्यायात्। अबाधिताज्ञातार्थज्ञापकत्वं हि प्रामाण्यम्। तच्च बाधित विषयत्वाऽज्ञापकत्वाच्च न गुणवादानुवादयोः। भूतार्थवादस्य तु स्वार्थे तात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विद्यते। तदेवं निरूपितोऽर्थवादभागः।

विध्यर्थवादोभयविलक्षणं तु वेदान्तवाक्यम् तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठाना-प्रतिपादकत्वाच्चविधिः। स्वतः पुरुषार्थपरमानन्दज्ञानात्मकब्रह्मणिस्वार्थे उपक्रमोपसंहारादिषड्विधितात्पर्यलिङ्गवत्तयास्वतः प्रमाणभूतं सर्वानपिविधीनन्तःकरणशुद्धिद्वारा स्वशेषतामापादयदन्यशेषत्वाभावाच्चनार्थवादः। तस्मादुभयविलक्षणमेव वेदान्तवाक्यम् तच्चक्वचिदज्ञातज्ञापकत्वमात्रेण विधिरितिव्यपदिश्यते। विधिपदरहितमपि प्रमाण वाक्यत्वेन च क्वचित्ज्ञातज्ञापकत्वमात्रेण विधिरिति व्यपदिश्यते। विधिपदरहितमपि प्रमाणवाक्यत्वेन च क्वचित् भूतार्थवाद इति व्यवह्रियत इति न दोषः। तदेवं त्रिविधं निरूपितं ब्राह्मणम्।

एवं च कर्मकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः। स च प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुः सामभेदेन भिन्नः। तत्र हौत्रप्रयोग ऋग्वेदेन आध्वर्यवप्रयोगो यजुर्वेदेन, औद्‌गातृप्रयोगः सामवेदेन। ब्राह्मयाजमानप्रयोगौ त्वत्रैवान्तर्भूतौ। अथर्ववेदस्तु यज्ञानुपयुक्तोऽपि शान्तिकपौष्टिकाभिचारिकादि कर्म प्रतिपादकत्वेनात्यन्तविलक्षणएव। एवं च प्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः। एवं च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपकत्वमेव ब्रह्मकाण्डमिति चतुर्णां वेदानां प्रयोजन भेदेन भेद उक्तः। अथाङ्गानामुच्यते तत्र शिक्षाया उदान्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिवि शिष्टत्वस्वरव्यञ्जनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनम् तदभावे मन्त्राणामनर्थकफलत्वात्। तथा **चोक्तम्—'मन्त्रो हीनः स्वरतोवर्णतो वा मिथ्या**

प्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' इति। तत्र सर्ववेदसाधरणी शिक्षा 'अथ शिक्षां' प्रवक्ष्यामि इत्यादि नवखण्डात्मिका पाणिनिना प्रकाशिता प्रतिवेदशाखं च भिन्नरूपाः प्रातिशाख्यसंज्ञिका अन्यैरेव मुनिभिः प्रदर्शिताः। एवं वैदिकपदसाधुत्वज्ञानेनोहादिकं व्याकरणस्य प्रयोजनम्। तच्च वृद्धिरादैच् इत्याद्यध्यायाष्टकात्मकं महेश्वरप्रसादेन भगवता पाणिनिनैव प्रकाशितम्। तत्र कात्यायेन मुनिना पाणिनीयसूत्रोपरिवार्तिकं विरचितम्। तद्वद्वार्तिकोपरि च भगवता पतञ्जलिना महाभाष्यमारचितम्। तदेतत्त्रिमुनि व्याकरणं वेदाङ्गमाहेश्वरमित्याख्यायते। कौमारादि-व्याकरणानि तु न वेदाङ्गानि किन्तु लौकिकप्रयोगमात्रज्ञानार्था-नीत्यवगन्तव्यम्। एवं शिक्षाव्याकरणाभ्यां वर्णोचारणे पदसाधुत्वे च ज्ञाते वैदिकमन्त्रपदानामर्थज्ञानाकाङ्क्षायां तदर्थंभगवता यास्केन 'समान्नायः समान्नातः' 'स व्याख्यातव्यः' इत्यादि त्रयोदशाध्यायात्मकं निरूक्तमारचितम्। तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकमन्त्रपदानामर्थः प्रदर्शितः। मन्त्राणां चानुष्ठेयार्थ प्रकाशनद्वारेणैव करणत्वात्, पदार्थज्ञानधीनत्वाच्च वाक्यार्थज्ञानस्य मन्त्रस्थपदार्थज्ञानाय निरूक्ताभवश्यमपेक्षितम्। अन्यथानुष्ठाना-सम्भवात्।

सूण्येव जर्भरी तुर्फरीतून इत्यादीनामतिदुरुहाणां प्रकारान्तरेणार्थ-ज्ञानस्यासम्भावनीयत्वाच्च। एवं निघण्ट्वादयोऽपि वैदिकद्रव्यदेव-तात्मकपदार्थपर्यायशब्दात्मका निरूक्तान्तर्भूता एव। तत्रापि निघण्टुसंज्ञकः पञ्चाध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः। अन्येप्यमरहेमचन्द्रादि प्रणीताः कोषाः सर्वे निघण्टुरूपत्वेन निरूक्तान्तर्गता दृष्टव्याः। एवमृङ्मन्त्राणां पाद बद्धछन्दोविशेष-विधानाच्च छन्दोज्ञानाकाङ्क्षायां तत्प्रकाशनाय 'धीश्रीस्त्रीम्' इत्याद्यष्टाध्यात्मिका छन्दोविचितिर्भगवता पिङ्गलेन विरचिता। तत्राप्यलौकिकम्। 'अथ लौकिकम्' इत्यन्तेनाध्यायत्रयेण गायत्र्युष्णिमनुष्टुब्बृहती पक्तित्रिष्टुब् जगतीति सप्तछन्दांसि सर्वाणि चावान्तरभेदानि प्रसङ्गान्निरूपितानि। 'अथ लौकिकम्'

इत्यारभ्याध्यायपञ्चकेन पुराणेतिहासादावुपयोगिनि लौकिकानि छन्दांसि प्रसङ्गान्निरूपितानि व्याकरणे लौकिकपदनिरूपणवत्।

एवं वैदिककर्माङ्गदर्शादिकालज्ञानाय ज्योतिषं भगवतादित्येन-गर्गादिभिश्च प्रणीतं बहुविधमेव। एवं शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानाय कल्पसूत्राणि। तानि च प्रयोगत्रयभेदात्त्रिधा तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनसांख्याय-नादिप्रणीतानि। आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तम्ब—कात्यायनादिप्रणीतानि। औद्गातृ प्रयोगप्रतिपादकनि तु लाव्यायन ड्राह्यायनणादिभिः प्रणीतानि। एवं निरूपितः षण्णामङ्गानां प्रयोजनभेदः।

चतुर्णामुपाङ्गानाधुनोच्यते। तत्र सर्गप्रतिसर्ग वंशमन्वन्तर वंशानुचरितप्रतिपादकानि भगवता बादरायणेन कृतानि पुराणानि। तानि च ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कण्डेयं आग्नेयं भविष्यं ब्रह्मवैवर्तं लैङ्गं वराहं स्कान्दं वामनं कौर्मं मात्स्यं गरुडं ब्रह्माण्डं चेत्यष्टादश। एवमुपपुराणान्याप्यनेकप्रकाराणि द्रष्टव्यानि। न्याये, आन्वीक्षिकी पञ्चाध्यायी गौतमेन प्रणीता। प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद जल्पवितण्डाहेत्वा-भासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षा-भिस्तत्वज्ञानं तस्याः प्रयोजनम्। एवं दशाध्यायं वैशेषिकशास्त्रं कणादेन प्रणीतम्। द्रव्यगुणकर्मासामान्यविशेषसमवायानां षण्णां भावपदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनम्। एतदपिन्यायपदेनोक्तम् एवं मीमांसापि द्विविधा। कर्ममीमांसा शारीरिकिमीमांसा च। तत्र द्वादशाध्यायी कर्ममीमांसा 'अथातो धर्मजिज्ञासा' इत्यादिः अन्वाहार्ये च दर्शनात् इत्यन्ता भगवता जैमिनिना प्रणीता। तत्र धर्मप्रमाणं—१. धर्मभेदाभेदौ, २. शेषशेषिभावः, ३. कृत्वर्थपुरुषार्थ भेदेन प्रयुक्तिविशेषः, ४. श्रुत्यर्थपठनादिभिः क्रम। भेदः, ५. अधिकारविशेषः, ६. सामान्यातिदेशः, ७. विशेषातिदेशः, ८. ऊहः, ९. वोधः, १०. तन्त्रं, ११. प्रसङ्गश्च, १२. इति क्रमेण द्वादशानामध्यानामर्थाः।

तथा च संकर्षकाण्डमप्यध्यायचतुष्ट्यात्मकं जैमिनिना प्रणीतम्। तत्र देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनाख्यकर्म प्रतिपादनत्वात्कर्म-मीमांसान्तर्गतमेव।

तथा चतुरध्यायी शारीरकमीमांसा 'अथातो ब्रह्मजिज्ञासा' इत्यादिः अनावृत्तिः शब्दात् इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुः श्रवणाख्यविचार प्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन-कृता। तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात्परम्परया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाध्यायेन प्रदर्शितः। तत्र च प्रथमपादे स्पष्टब्रह्मलिङ्गयुक्तानि वाक्यानि विचारितानि। द्वितीयपादे त्वस्पष्टब्रह्मलिङ्गयुक्तान्युपास्यब्रह्मविषयाणि। तृतीयपादेऽस्पष्टब्रह्मलिङ्गानि प्रायशोज्ञेयब्रह्मविषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः। चतुर्थपादे तु प्रधानविषयत्वेन संदिह्यमानान्यव्यक्ताजादिपदानि चिन्तितानि। एवं वेदान्तानामद्वये ब्रह्मणि सिद्धे समन्यवये तत्र सम्भावितस्मृतितर्कादिविरोधमाशङ्क्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राद्यपादे सांख्ययोगकाणादिस्मृतिभिः सांख्यादिप्रयुक्तैस्तर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः।

द्वितीयपादे संख्यादिमतानां दुष्टत्वं प्रतिपादितं स्वपक्षस्थापनपरपक्षनिराकरण-रूपपक्षद्वयात्मकत्वाद्विचारस्य। तृतीयपादे महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्वभागेनपरिहृतः।

उत्तरभागेन तु जीवविषयाणाम्। चतुर्थपादे इन्द्रियादिविषयश्रुतीनां विरोधपरिहारः। तृतीयाध्याये साधननिरूपणम्। तत्र प्रथमपादे जीवस्य परलोकगमननिरूपणेन वैराग्यं निरूपितम्। द्वितीयपादे पूर्वभागेन त्वंपदार्थः शोधितः। उत्तरभागेन च तत्पदार्थः।

तृतीयपादे निर्गुणे ब्रह्मणि नानाशाखापठितः पुनरूक्तपदोपसंहारः कृतः। प्रसङ्गाच्च सगुणविद्यासु शाखान्तरीयगुणोपसंहारानुपसंहारौ निरूपितौ। चतुर्थपादे निर्गुण ब्रह्मविद्याया वहिरङ्गसाधनान्याश्रम-धर्मयज्ञदानादीनि, अन्तरङ्गसाधनानि शमदमनिदध्यासनादीनि च

निरूपितानि। चतुर्थेऽध्याये सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयः कृतः।

तत्र प्रथमपादे श्रवणाद्याकृत्या निर्गुणं ब्रह्म, उपासना वृत्या निर्गुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यालेप लक्षणा जीवन्मुक्तिरभिहिता।

द्वितीयपादे म्रियमाणस्योत्क्रान्तिप्रकारश्चिन्तितः। तृतीयपादे सगुणब्रह्मविदो मृतस्योतरमार्गोऽभिहितः।

चतुर्थपादे पूर्वभागेननिर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरूक्ता।

उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोके स्थितिरूक्तेति। इदमेव सर्वशास्त्राणां मूर्धन्यं शास्त्रान्तरं सर्वमस्यैव शेषभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोदितप्रकारेणेति रहस्यम्। एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णु-अङ्गिरोवसिष्ठदक्षसंवर्तशातातप-पराशरगौतमशङ्खलिखितहारीतापस्तम्वोशनोव्यासकात्यायनवृहस्पतिदेवल-नारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं च धर्मशास्त्रएवान्तर्भूतं स्पष्टमितिहासत्वेन प्रसिद्धम्। सांख्यादीनां धर्मशास्त्रान्तर्भावेऽपीह स्वशब्देनैव निर्देशात्पृथगेव संगतिर्वाच्या।

अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः। तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति सूत्रं शारीरमैन्द्रियं चिकित्सा निदानं विमानं कल्पः सिद्धिश्चेति। ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्र भरद्वाजात्रेयाग्निवेश्यादिभि-रूपदिष्टश्चरकेण संक्षिप्तः। तत्रैव सुश्रुतेन पञ्चस्थानात्मकं प्रस्थानान्तरं कृतम्। एवं वाग्भटादिभिरपि बहुधेति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदान्तर्गतमेव। सुश्रुतेन वाजीकरणाख्यकाम-शास्त्राभिधानात्। तत्र वात्स्यायेन पञ्चाध्यायात्माकं कामशास्त्रं प्रणीतम्। तस्य च विषयवैराग्यमेव प्रयोजनं, शास्त्रोद्दीपितमार्गेणापि विषयभोगेदुःखमात्रपर्यवसानात्। चिकित्साशास्त्रस्य च रोगतत्साधन-रोगनिवृत्तितत्साधनज्ञानं प्रयोजनम्। एवं धनुर्वेदः पाद चतुष्टयात्मको विश्वामित्रप्रणीतः। तत्र प्रथमो दीक्षापादः। द्वितीयः संग्रहपादः। तृतीय

सिद्धिपादः। चतुर्थः प्रयोगपादः। तत्र प्रथमपादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम्। तत्रधनुः शब्दश्चापे रूढोऽपि चतुर्विधायुधवाचीवर्तते। तच्च चतुर्विधं मुक्तं अमुक्तं मुक्तामुक्तं यन्त्रमुक्तं च। तत्र मुक्तं चक्रादि अमुक्तं खड्गादि, मुक्तामुक्तं शल्यावान्तरभेदादि। यन्त्रमुक्तं शरादि। तत्र मुक्तमस्त्रमित्युच्यते। अमुक्तं शस्त्रमित्युच्यते। तदपि ब्राह्मवैष्णवपाशुपत प्राजापत्यग्नेयादिभेदादनेकविधम्। एवं साधिदैवतेषु समन्त्रकेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वे चतुर्विधाः पदाविरथगजतुरगारुढाः दीक्षाभिषेकशकुनमङ्गलकरणादिकं च सर्वमपि प्रथमपादे निरूपितम्। सर्वेषां शस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः। क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं च ब्रह्मप्राजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशास्त्रम्। एवं गान्धर्ववेदशास्त्रं भरतेन प्रणीतम्। तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपञ्चितः। देवताराधननिर्विकल्पक-समाध्यादि सिद्धिश्च गान्धर्ववेदस्य प्रयोजनम्। एवमर्थशास्त्रं च बहुविधं नीतिशास्त्रमश्वशास्त्रं गजशास्त्रं शिल्पशास्त्रं सूपकारशास्त्रं चतुःषष्टिकलाशास्त्रं चेति। ताश्चतुःषष्टिकलाः शैवागमोक्ताः—

१. गीतम्, २. वाद्यम्, ३. नृत्यम्, ४. नाट्यम्, ५. आलेख्यम्, ६. विशेषकच्छेद्यम्, ७. तण्डुलकुसुमबलिविकाराः, ८. पुष्पास्तरणम्, ९. दशनवसनाङ्गरागाः, १०. मणिभूमिकाकर्म, ११. शयनरचनम्, १२. उदकवाद्यम्, १३. उदक (धातः) वादः, १४. अन्दुत-दर्शनवेदिता, १५. भालाग्रथनकल्पः, १६. शेखरापीडयोजनम्, १७. नेपथ्ययोगः, १८. कर्णपत्रभङ्गाः, १९. गन्धयुक्तिः, २०. भूषण-योजनम्, २१. इन्द्रजालम्, २२. कौचुमारयोगाः, २३. हस्तलाघवम्, २४. चित्रशाकापूपभक्तविकारक्रियाः, २५. पानकरसरागासवयोजनम्, २६. सूचीवापकर्म, २७. सूत्रक्रीडा, २८. वीणाडमरूकवाद्यानि, २९. प्रहेलिकाप्रतिमालाः, ३०. दुर्वच्चकयोगाः, ३१. पुस्तकवाचनम्, ३२. नाटिकाख्यायिकादर्शनम्, ३३. काव्यसमस्यापूरणम्, ३४. पट्टि-कावेत्रबाणविकल्पाः, ३५. तर्कुकर्माणि, ३६. तक्षणम्, ३७. वास्तु-

विद्या, ३८. रूप्यरत्नपरीक्षा, ३९. धातुवादः, ४०. मणिरागज्ञानम्, ४१. आकरज्ञानम्, ४२. वृक्षायुर्वेदयोगाः, ४३. मेषकुक्कुटलावक-युद्धविधिः, ४४. शुकसारिकाप्रवलापकम्, ४५. उत्सादनम्, ४६. केशमार्जनकौशलम्। ४७. अक्षरमुष्टिका कथनम्, ४८. म्लेछित-कविकल्पाः, ४९. देशभाषाज्ञानम्, ५०. पुष्पशकटिकानिमित्तज्ञानम्, ५१. यन्त्रमातृका, ५२. धरणमातृका, ५३. असंवाच्यसंवाच्यम्, ५४. छलितकयोगाः, ५५. अभिधानकोशछन्दोज्ञानम्, ५६. क्रिया-विकल्पाः, ५७. ललितविकल्पाः, ५८. वस्त्रगोपनानि, ५९. द्यूत-विशेषाः, ६०. आकर्षक्रीडा, ६१. बालक्रीडनकानि, ६२. वैनायकी-विद्याज्ञानम्, ६३. वैजयिकविद्याज्ञानम्, ६४. वैतालिकीविद्याज्ञानम् इति प्रणीतम् नानामुनिभिः तस्य च सर्वस्य लौकिकालौकिक-तत्तत्प्रयोजनोभेदोद्रष्टव्यः। एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः।

एतेन निश्चितं यत्समस्तसच्छास्त्राणां साक्षात्परम्परया वा जीवकल्याणार्थं परमलक्ष्यस्यप्राप्तिरेवज्यायसी।

तथैव सत्सम्प्रदायानामपि साक्षात्परम्परयावाभगवद्भक्तौमुक्तौवा तात्पर्यम्।

सर्वेपन्थानः श्रेष्ठाः यथा हरिस्तथा हरस्तथापि स्वेष्टदेवतायां प्रीतिर्भवति तथैव अस्मत्कृते श्रीविष्णुस्वामिसम्प्रदायः श्रेष्ठो यतोहि अस्यसम्प्रदायस्यसिद्धान्तमङ्गीकृत्य श्री १००८ बल्लभाचार्यैः स्वपरम्परा प्रचालिता।

।। इतिशम् ।।

卐

ग. परिशिष्ट-भागः

ऐतिहासिक दृष्ट्या विमर्शेतु १५०० ई. पूर्वतः ५०० ईस्वीयवर्षं यावत् वैष्णवतायाः स्वर्णकालः वक्तुं शक्यते यतोहि शुभवंशीय राज्ञां तथा मौर्यवंशीय राज्ञां राज्याधिकारपतनानन्तरं शुंगवंशीयराज्ञां राज्यकालः आसीत्, शुंगवंशीयाः राजानः ब्राह्मणाः आसन्, एतेषां समये वैष्णवधर्मस्य महान् प्रचारोऽभवत्, इति मध्यभारतस्य वेसनगरे (वर्तमानकाले भेलसानगरे) स्थापितगरूडस्तम्भेन तथा चित्तौरगढ़ समीपस्थ धोसुडीशिलालेखेन ज्ञायते।

अस्मिन्नेव काले-पाञ्चरात्रस्य अहिर्बुध्न्य संहितानाञ्च प्रणयनमभवत्। तस्मिन् काले वैष्णवधर्मराष्ट्रधर्मः आसीत् इति तात्कालिककार्यकारणे दृष्ट्वानुमीयते।

७०० ई. वर्षतः १४०० ईस्वीयवर्षं यावत् वैष्णवानां रजतकालः यतोहि अस्मिन्नेवकाले निम्बार्क सम्प्रदायस्य श्री सम्प्रदायस्य, माध्वसम्प्रदायस्य विष्णुस्वामिसम्प्रदायस्य रुद्रसम्प्रदायस्य प्रचारः प्रसारश्च जातः।

वारकरी सम्प्रदायः = अस्य सम्प्रदायस्योपास्यो विठ्ठलः (बालकृष्णः) अस्य सम्प्रदायस्य महाराष्ट्रे जन्म अभवत्, तत्रैवास्य प्रचारः प्रसारश्च।

महाराष्ट्रियाः सन्ताः प्रायः अस्य सम्प्रदायस्यानुयायिनः सन्ति।

धर्मसिन्धुकारेण काशीनाथेनास्यशब्दस्य अनयारीत्या व्याख्या कृता।

विदा = ज्ञानेनठान् = शून्यान् लाति गृह्णातीतिविठ्ठलः। अर्थात्—विठ्ठलो भगवान् सर्वेषां ग्रहणं करोति। अज्ञानां ज्ञानवताञ्च महान् कृपालुः।

१. वैष्णव सम्प्रदायों का साहित्य और सिद्धान्त आचार्य बलदेव उपध्याय पृ.सं. ७३।

अस्य सम्प्रदायस्य कदा आविर्भावो जात, इति तु प्रमाणाभावात्, निश्चेतुं न शक्यते किन्तु हरिहरेन्द्र महाराजस्य १२०९ ई. तमस्यवर्षस्य शिलालेखेनयत् सन्तज्ञानेश्वरात् सप्ततिः वर्ष पूर्वेऽपि वरकरी सम्प्रदायस्य प्रचार-प्रसारश्च आसीत्, महाराष्ट्रे अस्यं सम्प्रदायस्य प्रसिद्धाः सन्ताः—

सन्त नाम	कालः (शकवत्सरानुसारेण)	समाधिस्थानम्
१. निवृत्ति नाथः	११९५-१२१९	त्र्यम्बकेश्वरः
२. ज्ञानेश्वर महाराजः	११९७-१२१८	आनन्दी
३. सोपानदेवः	११९९-१२१८	सासबडः
४. मुक्ताबाई	१२०१-१२१९	एदलाबादः
५. विसोषाखेचरः	१२३१	
६. नामदेवः	११९२-१२७२	पण्ढरपुरम्
७. गोराकुम्भारः	११८९-१२३९	तेरः
८. सावतामाती	१२१७	अरणभेदी
९. नरहरी सोनारः	१२३५	पण्ढरपुरम्
१०. चोरवामेला	१२६०	पण्ढरपुरम्
११. जगमित्रनागा	१२५२	परली (वैजनाथः)
१२. कूर्मदासः	११५३	लऊलः
१३. जनाबाई		पण्ढरपुरम्
१४. चांगदेवः	१२२७	पुणतांवे इति
१५. भानुदासः	१३७०	पैठणः
१६. एकनाथः	१४७०-१५२१	पैरणः
१७. राघवचैतन्यः	१४७०-१५२१	पैरणः
१८. राघवचैतन्यः		ओतूरः

१९. केशव चैतन्यः	१३३९	गुलवर्गा इति
२०. लुकारामः	१५७२	देहु इति
२१. निलोवाराया:	१५७२	पिपर्लेनेरः
२२. शंकरस्वामी	१५७२	शिरूरः
२३. मल्लाप्पा	१५७२	आलन्दी
२४. मुकुन्दराजः	१५७२	आवे इति
२५. कान्होपात्रा	१५७२	पण्ढरपुर इति
२६. जोगापरनन्दः	१५७२	वार्शी...

वारकरी सम्प्रदायस्योपसम्प्रदायः

१. चैतन्यसम्प्रदाय, २. स्वरूपसम्प्रदायः, ३. आनन्दसम्प्रदायः, ४. प्रकाशसम्प्रदायः।

निबोलारायानुसारेण चैतन्यसम्प्रदायस्य प्रवर्तकः महाविष्णुरेव, चैतन्यसम्प्रदाये द्वौ भेदौस्तः एकस्मिन् सम्प्रदाये षड़क्षरमन्त्रस्योपासना अन्यस्मिन् सम्प्रदाये द्वादशाक्षरमन्त्रस्योपासना भवति।

यस्मिन् सम्प्रदाये द्वादशाक्षर मन्त्रस्योपासना तस्य गुरुपरम्परा।

१. आदिनाथः, २. मच्छेन्द्र नाथः, ३. गोरखनाथः, ४. गहिनीनाथः, ५. निवृत्ति नाथः, ६. ज्ञानेश्वरः।

वैष्णवधर्मस्य लौहकालः १४०० ई. वर्षतः १९०० ई. यावत्। महाराजपृथ्वीराजस्यमृत्योरनन्तरं हिन्दूनां सौभाग्यसूर्यं अस्ताचलं गतः। इतिहासस्य मध्ययुगीनकाले यवनशासकैरत्याचारेण उग्राचारेण हिन्दवस्त्रस्ता आसन् लोदीत्युपाधियुक्तस्य यवनरराजस्य सिकन्दरस्य शासनकाले १४८९ ईस्वीतः १५१७ ईस्वीयवर्षं यावत् हिन्दूनामुपरि महान् अत्याचार आसीत्। मूर्तिखण्डनम् मन्दिरमठध्वंसनम संस्कृतग्रन्थानामग्निसात् करणम्, इस्लामधर्मास्वीकारे मृत्युदण्डेन दण्डनम्, हिन्दुमात्रोपरिजजिया करनिर्धारणम् येन सन्त्रस्ता हिन्दवः,

उद्धारार्थं लालायिताः आसन। यवनपीड्या पीड़िताः जनाः आत्मशान्त्यर्थः सन्तसमीपं। गत्वोपदेशामृतेन तृप्ताः भक्तौ तत्पराः अभवन्। तस्मिन्नेव काले रामावतसम्प्रदायस्याविर्भाव उत्तरभारते यथा वैष्णवधर्म प्रचारः आसीत् तथा दक्षिणभारते वैष्णवधर्मस्य प्रचारो नासीत् यतोहि द्रविडदेशे शैवधर्मः प्राचीनतमोऽतस्तत्र तस्यैवाधिकः प्रचारः।

उत्तरभारते वृन्दावनतो मथुरापुरीतश्च कृष्णशाखायाः प्रचारः प्रसारः, काशीतः अयोध्यातश्च राम शाखायाश्च प्रचारः प्रसारो मुख्यतस्तु काशीत एव हि रामशाखायाः प्रचारः।

तत्कालस्य स्थिति १००० वल्लभाचार्येण कृष्णाश्रये षोडश ग्रन्थे लिखिता।

म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च।
सत्पीडा-व्यग्रलोकेषु कृष्ण एव गतिर्मम।।२।।
गंगादि - तीर्थ - वर्येषु - दुष्टैरेवावृतेष्विह।
तिरोहिताधिदेवेषु कृष्ण एव गतिर्मम।।३।।
अपरिज्ञान - नष्टेषु मन्त्रेष्व्रतयोगिषु।
तिरोहितार्थ-वेदेषु कृष्णएव गतिर्मम।।४।।

रामावतसम्प्रदायः

उत्तरभारते रामशाखायाः प्रचारः श्री १००८ रामानन्दाचार्येण कृतम् रामानन्दस्य गुरुवः १००८ राघवानन्दाचार्यः रामानुजसम्प्रदायस्याचार्य आसीत्। किन्तु उत्तरभारते वैष्णवधर्मस्य रामशाखायाः प्रचाराय प्रसराय च आचार्येण रामानन्दाय राममन्त्रस्यैवोपदेशः कृतः आचार्यप्रवरः श्रीराघवानन्दो महान् योगी द्वादशवर्षस्यावस्थायामेव रामानन्दस्य मृत्युर्जातः किन्तु आचार्येण योगवलेन जीवनं तथापूर्णायुश्च कृतम्। आचार्यप्रवराः श्रीराघवानन्दमहाराजाः समस्तभारतेदेशे भक्तेः प्रचारं कृत्वा काश्यां

स्थायिरूपेण निवासं कृतवन्तः अस्य गुरुवः श्री १००८ हरियानन्दमहाराजाः शिष्यः श्रीरामानन्दाचार्यः।

१. श्री रामचन्द्रः, २. सीता, ३. विष्वकसेनः, ४. शठकोपस्वामी, ५. श्रीनाथमुनिः, ६. पुण्डरीकाक्ष आचार्यः, ७. राममिश्रः, ८. जमुनाचार्यः, ९. महापूर्णाचार्यः, १०. श्री रामानुजः, ११. कूरेशः माधवाचार्यः, १२. वोपदेवाचार्यः, १३. देवाधिपः, १४. पुरुषोत्तमः, १५. गङ्गाधरः, १६. रामेश्वरः, १७. द्वारानन्दः, १८. देवानन्दः, १९. श्रीयानन्दः, २०. हरियानन्दः, २१. राघवानन्दः, २२. रामानन्दः।

आचार्यप्रवरणां श्री रामानन्दमहाराजानां लोदी इत्युपाधि-विशिष्टस्य राज्ञः सिकन्दरस्य राज्यकालेस्थितिरासीत्।

सिकन्दरस्य राज्यकालस्तु १४८९ ईस्वीतः १५१७ ईस्वीयवर्षं यावदासीत्। अयं खलु हिन्दुधर्मस्य आक्रान्तत्वेन प्रसिद्ध आसीत्।

रामानन्दसिद्धान्तानां 'वैष्णवमताब्जभास्करः' इति ग्रन्थः विवेचको विद्यते। अस्मिन् मूलमन्त्रस्य (ॐ रां रामाय नमः) तथा द्वय मन्त्रस्य चरम मन्त्रस्य च व्याख्या वर्तते। द्वय मन्त्रः पञ्चविंशत्यक्षरस्य— श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते रामचन्द्राय नमः इति परम मन्त्रः—

सकृदेव प्रपन्नाय तवास्मीति चं याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम।।
रहस्य त्रयस्य सूचना निम्नलिखित पद्येन ज्ञायते।
जाप्यस्तत् तारकाख्यो मनुवरमखिलैर्वह्निबीजं यदादौ।
रामोङे प्रत्ययान्तो रसमितशुभदस्त्वक्षरः स्यान्नमोऽन्तः।
मन्त्रो रामद्वयाख्यः सकृदिति चरमप्रान्वितोगुह्यगुह्यो।
भूताच्युत्संख्यवर्णः सुकृतिभिरनिशं मोक्षकामैर्निषेव्यः।।

प्राचीन कालतः रामोपासना प्रचलतिस्म। श्री शठकोपाचार्येण श्री रामानुजाचार्येणापि रामोपासना कृता।

रामानन्दसम्प्रदाये भगवतो रामस्य भगवत्याः सीतायास्तथा लक्ष्मणस्य च मूर्तीनां स्थापना भवति।

वैष्णवमत भास्करस्य ५८ श्लोके एवं रीत्या ध्यानस्य प्रतिपादनं कृतं तथाहि—

प्रसन्नलावण्यसुभुजाम्बुजं नरं शरण्यं शरणं नरोतमम्।
सहानुजं दाशरथिं महोत्सवं स्मरामि रामं सहसीतयासदा।।

आचार्यप्रवररामानन्देन रचिता तत् कर कमल लिखिता हिन्दी भाषायां श्री हनुमतः प्रशस्ता स्तुतिर्मिलति नागरी प्रचारणी सभायाः पुस्तकालये हस्तलेख सुरक्षितः।

तथाहि—

आरति कीजै हनुमान लला की। दुष्ट दलन रघुनाथ कला की।।
जाके बल-भर ते महि काँपै। रोग सोग जाकी सिमा न चाँपै।।
अंजनी-सुत महाबल दायक। साधु सन्तपरसदा सहायक।।
बाएँ भुजा सब असुर सँहारी। दहिन भुजा सब सन्त उबारी।।
लछिमन[1] धरति में मूर्छि पर्‍यो। पैठि पाताल सम कातर तोर्‍यो।।
आनि संजीवन प्रान उबार्‍यो। मही सबन पै भुजा उपार्‍यो।।
गाढ़ परे कपि सुमिरों तोहीं। होहु दयाल देहु जस मोहीं।।
लंका कोट समुन्दर खाई। जात पवनसुत बार न लाई।।
लंका प्रजारि असुर सब मार्‍यो। राजाराम के काज संवार्‍यो।।
घण्टा ताल झालरी बाजै। जगमग ज्योति अवधपुर छाजै।।
जो हनुमान जी की आरति गावै। बसि बैकुण्ठ परमपद पावै।।
लंक विध्वंस कियो रघुराई। रामानन्द आरती गाई।।
सुर-नर-मुनि सब करहिं आरती। जै जै जै हनुमान लाल की।।

एतेषामाचार्याणां प्रसिद्धाः शिष्याः

१. अनन्तानन्दः, २. सुरासुरानन्दः, ३. नरहरियानन्दः, ४. योगानन्दः, ५. सुखानन्दः, ६. भवानन्दः, ७. गालवानन्दः, ८. कबीरः, ९. रमादासः, १०. सेनाः, ११. पीपाः, १२. घनः, १३. पद्मावली।

तथाहि—

राघवानन्द एतस्य रामानन्दस्ततोऽभवत्।
सार्द्ध-द्वादश-शिष्यास्युः रामानन्दस्य सद्गुरोः।
द्वादशादित्य संकाशाः संसार-तिमिरापहाः।
श्री मदनन्तानन्दस्तु सुरसुरानन्दस्तथा।।
नरहरियानन्दस्तु योगानन्दस्तथैव च।
सुखा भवागालवं च सप्तैते नाम नन्दनाः।।
कबीरश्च रमादासः सेना पीपा धनास्तथा।
पद्मावती तदर्द्धश्च षडेते च जितेन्द्रियाः।।

रैदासोऽपि एतेषां शिष्य आसीत्, श्रीरामानन्दाचार्याणां शिष्यैः रामभक्तेर्धारा प्रवाहितासीत् किन्तु हिन्दी साहित्ये परमोज्वलप्रकाशः विक्रमादित्यस्य सप्तदशशताब्द्याः पूर्वार्द्धे गोस्वामिना तुलसीदासेन कृतः गोस्वामी तुलसीदासः उच्चकोटेर्वैष्णवभक्तस्तथापि श्री रामानन्दाचार्यस्य शिष्यपरम्परायां नामोल्लेखो नास्ति।

श्रीगोस्वामी तुलसीदासमहाराजाः स्मार्तवैष्णवाः येषां कृते विष्णुनासह शिवादिदेवेष्वपि महती आस्था विद्यते। तुलसीकृत रामायणस्य चौपाई इत्यादीनां मन्त्रवदादरो विद्यते।

तुलसीदासेन यन्मर्यादापुरुषोत्तमस्य यच्छीलादीनां प्रदर्शनं कृतं तदद्भुतं विद्यते। निर्मलभक्तेर्रामायणं कल्पतरुरस्ति।

बाल्मीकिरामायणे महर्षिणा बाल्मीकेन मर्यादारक्षणार्थं भिन्न-भिन्न परिस्थितिषु आदर्श पुरुषरूपेणस्वाभाविकं वर्णनं कृतम्

अध्यात्मरामायणे भगवतो रामस्य परब्रह्मत्वेन भगवत्याः सीतायाश्च प्रकृतित्वेन वर्णनं कृतम्। वैष्णवधर्मशिरोमणिना सन्ततुलसीदासेन भक्तिपक्षस्याश्रयणं कृतम्।

सीतारामयोर्भेदोनास्ति—

गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न।
बंदऊ सीता रामपद जिन्हहि परमप्रिय खिन्न।।

शब्दार्थयोरेकतायाः ज्ञानं तु शब्दशास्त्रतत्वज्ञाः एव जानन्ति।

अतो द्वितीयो दृष्टान्तः सन्त शिरोमणिना दत्तः, अन्येषां हरिदासी सखीत्यादि सम्प्रदायानां कृष्ण धारायामन्तर्भावः। वैरागीत्यादि-सम्प्रदायानां रामशाखायामन्तर्भावः।

।। इतिशम् ।।

卐

संस्कृत ग्रन्थ-सूची

	ग्रन्थनाम	लेखकः	प्रकाशकः
१.	अष्टोतर शतोपनिषद्	श्रीरामशर्मा	चौखम्भाविद्याभवनम्
२.	अग्नि पुराणम्	वेदव्यास	गीता प्रेस
३.	अध्यात्मरामायणम्		
४.	अलङ्कारशास्त्रस्येति-हासः	डॉ. शिवप्रसाद द्विवेदी	चौखम्बाविद्याभवनम्
५.	आत्मविज्ञानम् द्विवेदी	डॉ. कपिलदेव	उ.प्र.सं.सं.।
६.	आत्म विज्ञानम् द्विवेदी	डॉ. कपिलदेव	चौ.वि.भ.।
७.	आनन्दरामायणम् महामुनिः	महर्षि वाल्मीके	संस्कृति सं.।
८.	उज्जवलनीलमणिः	पाण्डुरंगम्	निर्णयसागर प्रेस
९.	काव्य प्रकाशः	मम्भटः	चौ.वि. भवन।
१०.	कालिदास ग्रन्थावली	कालिदासः	बनारस हि.वि.वि.
११.	काव्य मीमांसा	श्रीराजशेखरः	चौ.वि. भवन
१२.	काव्यालंकारकारिका द्विवेदी	डॉ. रेवा प्रसाद	चौ.वि. भवन
१३.	काव्यालंकारः	रूद्रटः	चौ.वि. भवन
१४.	कृष्णोपनिषत्		
१५.	गोपालोपनिषत्		
१६.	चन्द्रालोकः	जयदेवः	चौ.सुरभारतीप्रकाशन

१७.	छन्दोमञ्जरी	श्री गङ्गादासः	चौ. अमरभारती प्रकाशनम्
१८.	ध्वन्यालोकः	आनन्दवर्धनाचार्यः	मोतीलालबनारसी दासः
१९.	नैषधीयचरितम्	श्रीहर्षविरचितम्	निर्णयसागर प्रेसः
२०.	पद्मपुराणम् (पञ्चम पातालखण्डः)	वेदव्यासः	
२१.	पुराणदिग्दर्शनम्	माधवाचार्यशास्त्री	चौ.वि.भ.
२२.	ब्रह्मसूत्रशांकरभाष्यम्	आद्यशङ्कराचार्यः	चौ.वि.भ.
२३.	ब्रह्मवादः	ब्रजंनाथः	चौ.वि.भ.
२४.	भट्टिकाव्यम्	भट्टिकविः	चौ.वि.भ.
२५.	मनुस्मृतिः		
२६.	रसगङ्गाधरः	पण्डितराज-जगन्नाथः	चौ.वि.भ.
२७.	वृत्तरत्नाकरः	श्रीमत्केदारप्रणीतः	चौ.सं.सं.
२८.	शिशुपालवधम्	श्री माघप्रणीतम्	निर्णयसागर प्रेस
२९.	साहित्यदर्पणम्	श्री विश्वनाथ-कविराज	चौ.वि.भ.
३०.	सर्वदर्शनसंग्रहः	श्री माध्वाचार्य प्रणीतः	आनन्दश्रमग्रन्थावली
३१.	सिद्धान्तकौमुदी	भट्टोजीदीक्षितः	चौ.वि.भवन
३२.	श्री बाल्मीकीय-रामायणम्	श्रीमहर्षिबाल्मीकः	गीताप्रेसः
३३.	श्रीमद्भागवतपुराणम्	महर्षिव्यासः	गीताप्रेसः

।। इतिशम् ।।

卐

हिन्दी ग्रन्थ सूची

	ग्रन्थनाम	लेखक	प्रकाशकः
१.	अष्टछाप	धीरेन्द्र वर्मा	चौ.सं. भवन
२.	अष्टछाप और वल्लभ सम्प्रदाय	दीनदयाल गुप्त	हिन्दी साहित्य सम्मेलन
३.	अनासक्ति योग	सूरजमल मेहता	सस्ता साहित्यमण्डल प्रकाशन
४.	अभिनन्दन ग्रन्थ	नारायणदास	सतुआबाबा आश्रम
५.	आचार्य शङ्कर	स्वामी अपूर्वानन्द	चौ. संस्कृत भवन
६.	उपनिषद् दर्शन का रचनात्मक सर्वेक्षण	रामचन्द्र	चौ. संस्कृत भवन
७.	कहावत रत्नाकर	रामचन्द्र	चौ. संस्कृत भवन
८.	काव्याङ्ग निर्णय	जङ्ग बहादुर मिश्र	चौ.सं. भवन
९.	गीताङ्क		गीता प्रेस
१०.	तुलसीकृतरामायण	तुलसीदास	गीता प्रेस
११.	दर्शन संग्रह	डॉ. दीवानचन्द्र	चौ. अमर भारती प्रकाशन
१२.	धर्मवेदान्त	रामकृष्ण विवेका-नन्द	चौ. अमर भारती प्रकाशन
१३.	पौराणिक धर्म एवं समाज	सिद्धेश्वरी नारायण	चौ. अमर भारती प्रकाशन
१४.	पुराण विमर्श	आचार्य बलदेव उपाध्याय	चौ. अमर भारती प्रकाशन

१५.	ब्रह्म सूत्रों के वैष्णव भाष्यों का तुलनात्मक अध्ययन	श्रीरामकृष्णाचार्य	चौ. अमर भारती प्रकाशन
१६.	संस्कृत साहित्य का इतिहास	श्री वाचस्पति	चौ. अमर भारती प्रकाशन
१७.	संस्कृत महाकाव्य की परम्परा	डॉ. केशवराव	चौ.सं. भवन
१८.	साहित्यालोक	डॉ. राजवंश सहाय	चौ.सं. भवन
१९.	साधुदर्शन तथा सत्प्रसङ्ग	डॉ. गोपीनाथ कविराज	चौ.सं. भवन
२०.	साहित्यालोक	डॉ. राजवंशसहाय	चौ.सं. भवन

।। इतिशम् ।।

卐

पत्र-पत्रिकादि विवरणम्

१.	अर्वाचीन संस्कृतम्	वाणी विहारी देववाणी परिषद नई दिल्ली।
२.	कल्याण	गीता प्रेस गोरखपुर
३.	गाण्डीवम्	सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी
४.	गायत्री	श्री नन्दलाल बाजोरिया संस्कृत महाविद्यालय
५.	पुराणम्	रामनगर किला काशी ट्रस्ट वाराणसी
६.	वेदान्त सन्देश	कानपुर (उत्तर-प्रदेश)
७.	वैराग्य ज्योति	सतुआबाबा आश्रम, मणिकर्णिका वाराणसी
८.	श्री पण्डितः	भदैनी, वाराणसी
९.	शोध पत्रिका	काशी हिन्दू विश्वविद्यालय वाराणसी
१०.	सन्त स्मृति	सतुआबाबा आश्रम, वाराणसी।

।। इतिशम् ।।


卐

भाषान्तर ग्रन्थ-सूची

१. हिन्दी विश्व कोष।
२. वैष्णव मताब्ज भा.।
३. कर्नाटक राज्य का इतिहास।
४. चैतन्य चरित्रावली।
५. आशुतोष अभिधान।
६. कृष्णाश्रय (षोडश ग्रन्थ)
७. वैष्णव सम्प्रदायों का साहित्य और सिद्धान्त।
८. रूपकला।

।। इतिशम् ।।

卐



अनन्तश्री विभूषित जगद्गुरु विष्णुस्वामी सम्प्रदायाचार्य
श्री यमुनाचार्य जी महाराज श्री सतुआ बाबा